श्रीहरिकृष्णनिबन्धमणिमालायाः
पञ्चमो (५) मणिः ।

श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता

# कारिकावली

साहित्योपाध्याय न्यायव्याकरणाचार्य श्रीसूर्यनारायणशुक्लरचित
मयूखोल्लासित सिद्धान्तमुक्तावली सहिता ।

प्रकाशकः—
श्रीहरिकृष्णनिबन्धभवनम्
बनारस-सिटी ।

( सर्वाधिकारः प्रकाशकाधीनः )

पं० रघुनंदन प्रसाद शुक्ल

श्रीगोकुलेश्वरप्रीत्यै तदीयजननोत्सवे ।
श्रीहरिकृष्णदासेन सदानन्दाभिलाषिणा ॥
विक्रमीय-युगवसुनवेन्दुमितशरदि सुतारे
स्थापितमिह शुभसहसि शुक्ल इनतिथिगुरुवारे ।
श्रीहरिकृष्णनिबन्धभवनमिति मणिमालायाः
ग्रन्थनाय बुधजनविनोदमतिमङ्गलदायाः ॥


## पाणिनीयव्याकरणे वादरत्नम्-

न्यायव्याकरणाचार्य मी० शिरोमणिना पं० श्रीसूर्यनारायणशुक्लेनविरचितम् -

इस ग्रन्थ के प्रथमभाग मे न्यास प्रकरण तथा द्वितीय भाग में परिष्कार प्रकरण है। न्यास-परिष्कार का इतना उत्तम ग्रन्थ आज पर्यन्त छपा ही नहीं। इन दोनों भागों को संग्रह करलेने से फिर न्यासरत्नावली, न्यासकौमुदी, पाणिनीतन्त्र क्रोडपत्र, शिशुतोषणी, भावकुतुहल, शास्त्रार्थरत्नावली इत्यादि किसी ग्रन्थ के संग्रह करने की आवश्यकता न होगी।

मूल्य प्रथम भाग १॥) द्वितीयभाग १।) ( तृतीय परिशिष्टभाग छपता है )।

# फक्किकासरलार्थः

## व्याकरणाचार्य पण्डितरामचरित्रत्रिवेदिः विरचितः ।

संस्कृत प्रेमी विद्यार्थियों को मालुम होवे कि आप लोगोंने फक्किका की अनेक प्रकाशित पुस्तकें देखी सुनी होगी। परन्तु हमने आप लोगों के हितके लिए अत्यन्त उपयोगि परीक्षोपयोगि फक्किका सरलार्थः नाम की पुस्तक बनवाई है। यह पुस्तक ऐसी उत्तम परीक्षा की रीति से लिखी गई है कि जीससे विद्यार्थियों की समस्त कठिनाई दूर होगई हैं प्रत्येक मध्यम परीक्षार्थी को इस पुस्तक की एक एक प्रति खरीद कर लाभ उठाना चाहिए। मूल्य भी लागत मात्र चारो खण्ड की संपूर्ण पुस्तका ॥) आठ आना मात्र रखा है।

---

प्राप्तिस्थानम्-श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी।

Library IIAS, Shimla
S 181.43 B 469.1 KSU-B 469.11
00023772

* श्रीगणेशाय ...

58

# मयूखसहितमुक्तावलीसमेता
# कारिकावली।

## अनुमानखण्डः।

न्यायसिद्धान्तमुक्तावली।

**व्यापारस्तु परामर्शः, करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥**
**अनुमायां, ज्ञायमानं लिङ्गं तु करणं न हि।**
**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥**

अनुमितिं व्युत्पादयति। व्यापारस्त्विति। अनुमितौ व्याप्तिज्ञानं करणं, परामर्शो व्यापारः।

तथा हि—येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता, पश्चात् स एव पुरुषः क्वचित् पर्वतादावविच्छिन्नमूलां धूमरेखां पश्यति, तदनन्तरं 'धूमो वह्निव्याप्य' इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति, पश्चाच्च वह्निव्याप्यधूमवानयमिति ज्ञानं, स एव परामर्श इत्युच्यते। तदनन्तरं पर्वतो वह्निमानित्यनुमितिर्जायते।

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमितिकरणमिति वदन्ति, तद् दूषयति। ज्ञायमानमिति। लिङ्गस्याऽनुमित्यकरणत्वे युक्तिमाह। अनागतादीति। यद्यनुमितौ लिङ्गं करणं स्यात्, तदाऽनागतेन लिङ्गेन, विनष्टेन, चाऽनुमितिर्न स्यात्, अनुमितिकरणस्य तदानीमभावादिति ॥ ६६ ॥ ६७ ॥

मुक्तावलीमयूखः।

व्यापार इति। तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम् परामर्शो हि व्याप्तिज्ञानजन्यः व्याप्तिज्ञानजन्यानुमितिजनकश्चेति भवति तस्य व्याप्तिज्ञानव्यापारत्वमिति।

अनागतेनेति। तथा च इयं शाला भाविवह्निमती भाविधूमात्, इयं शाला अतीतवह्निमती अतीतधूमात्, इति अनागतविनष्टाभ्यां लिङ्गाभ्यामनुमितिर्न स्यात् तदानीं लिङ्गस्य धूमस्याभावात्। मम तु धूमस्याभावेऽपि धूमज्ञानस्य सत्त्वान्न दोष इति भावः ॥ ६६ ॥ ६७ ॥

न्यायसिद्धान्तमुक्तावली ।

**व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।**

व्याप्यस्येति । व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितौ जनकं, तच्च 'पक्षे व्याप्य' इति ज्ञानं, 'पक्षो व्याप्यवान्' इति ज्ञानं वा, अनुमितिस्तु 'पक्षे व्याप्य' इति ज्ञानात् 'पक्षे साध्यम्' इत्याकारिका, 'पक्षो व्याप्यवान्' इति ज्ञानात् 'पक्षः साध्यवान्' इत्याकारिका ।

मुक्तावलीमयूखः ।

**अनुमितिस्त्विति** । अयं भावः द्विविधादपि परामर्शात् 'पक्षः साध्यवान्'इत्येवमाकारानुमितिस्वीकारे यदा व्याप्यप्रकारकपक्षविशेष्यकपरामर्शादनुमितिर्जाता तदा पक्षप्रकारकव्याप्यविशेष्यकः परामर्शो नास्ति यदा च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शादनुमितिर्जाता तदा व्याप्यप्रकारकपक्षविशेष्यकः परामर्शो नास्तीति कारणाभावे कार्योत्पादरूपव्यतिरेकव्यभिचारसत्त्वात् कस्यापि परामर्शस्य कारणत्वं न स्यात् अतः 'पक्षो व्याप्यवान्' इत्याकारकपक्षविशेष्यकपरामर्शात् पक्षविशेष्यिका 'पक्षः साध्यवान्, इत्याकारिका, 'पक्षे व्याप्य' इति व्याप्यविशेष्यकपरामर्शात् साध्यविशेष्यिका 'पक्षे साध्यम्' इत्याकारिकाऽनुमितिः स्वीक्रियते एवं च एकधर्मावच्छिन्नकार्यं प्रति यदानेकधर्मावच्छिन्नस्य कारणता तदा व्यतिरेकव्यभिचारः प्रकृते च साध्यप्रकारकपक्षविशेष्यकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकपक्षविशेष्यकपरामर्शत्वावच्छिन्नस्य; पक्षप्रकारकसाध्यविशेष्यकानुमितित्वावच्छिन्नं प्रति च पक्षप्रकारकव्याप्यविशेष्यकपरामर्शत्वावच्छिन्नस्य कारणतया एकधर्मावच्छिन्नकार्यं प्रति अनेकधर्मावच्छिन्नस्य कारणस्याभावान्न व्यतिरेकव्यभिचारः ।

एतदुक्तं भवति 'वह्निव्याप्यधूमवान् पर्वतः' इति परामर्शात् 'पर्वतो वह्निमान्' इत्याकारानुमितिः । 'पर्वते वह्निव्याप्यो धूमः' इति परामर्शात् 'पर्वते वह्निः' इत्याकारानुमितिर्जायते इति ।

ननु व्याप्यप्रकारकपक्षविशेष्यकपक्षप्रकारकव्याप्यविशेष्यकान्यतरपरामर्शत्वेन पक्षः साध्यवानित्याकारानुमितिं प्रति कारणतास्वीकारेण अन्यतरपरामर्शत्वावच्छिन्नकारणस्य सत्त्वान्न व्यतिरेकव्यभिचारः कारणतावच्छेदकावच्छिन्नप्रतियोगिताककारणाभावे कार्यतावच्छेदकावच्छिन्नकार्योत्पादस्यैव व्यतिरेकव्यभिचाररूपत्वादिति चेन्न–तद्भिन्नत्वे सति तद्भेदवान् यः तत्प्रतियोगिकभेदवत्त्वम् अन्यतरत्वम् यथा घटभिन्नत्वे सति पटभेदवद् एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वमेतद्द्वये इति इदमेव घटपटान्यतरत्वं नाम एवं पक्षविशेष्यकपरामर्शभिन्नत्वे सति व्याप्यविशेष्यकपरामर्शभिन्नं एतद्द्वयातिरिक्तं जगन्मात्रं तद्भिन्नत्वं द्विविधपरामर्शे इति इदमेव पक्षविशेष्यकव्याप्यविशेष्यकपरामर्शान्यतरत्वमिति एवं चान्यतरत्वरूपकारणतावच्छेदककुक्षौ जगतः प्रवेशेन विशेष्यविशेषणभावव्यत्यासेन व्याप्यविशेष्यकपरामर्शभिन्नत्वे सति पक्षविशेष्यकपरामर्शभिन्नो यः तद्भिन्न-

न्यायसिद्धान्तमुक्तावली ।

द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवाऽनुमितिरित्यन्ये ।

ननु 'वह्निव्याप्यधूमवान् पर्वत' इति ज्ञानं विनाऽपि यत्र पर्वतो धूमवानिति प्रत्यक्षं, ततो 'वह्निव्याप्यो धूम' इति व्याप्तिस्मरणं, तत्र ज्ञानद्वयादेवाऽनुमितेर्दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं, किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वस्याऽऽव-

मुक्तावलीमयूखः ।

स्वरूपस्य पक्षविशेष्यकपरामर्शभिन्नत्वे सति व्याप्यविशेष्यकपरामर्शभिन्नो यः तत्प्रतियोगिकभेदवत्त्वरूपस्य च अन्यतरत्वस्य विनिगमनाविरहेण कारणतावच्छेदकत्वेन गौरवेणान्यतरत्वेन कारणतायाः स्वीकर्तुमयोग्यत्वादिति ।

द्विविधादपीति । ननु द्विविधादपि परामर्शादेकविधानुमितिस्वीकारे व्यतिरेकव्यभिचार इति चेन्न व्याप्यप्रकारकपक्षविशेष्यकपरामर्शाव्यवहितोत्तरक्षणजायमानपक्षः साध्यवानित्याकारकानुमितित्वावच्छिन्नं प्रति व्याप्यप्रकारकपक्षविशेष्यकपरामर्शस्य कारणता एवं पक्षप्रकारकव्याप्यविशेष्यकपरामर्शाव्यवहितोत्तरक्षणजायमान 'पक्षः साध्यवान्' इत्याकारकानुमितित्वावच्छिन्नं प्रति पक्षप्रकारकव्याप्यविशेष्यकपरामर्शस्य काणता इति स्वीकारेण व्यतिरेकव्यभिचाराभावात् ।

वस्तुतस्तु एतदपेक्षयापि लाघवात् पक्षनिष्ठविषयतानिरूपितव्याप्यनिष्ठविषयताकपरामर्शत्वेन द्विविधपरामर्शस्य 'पक्षः साध्यवान्' इत्याकारानुमितिं प्रति कारणतास्वीकाराद् व्यतिरेकव्यभिचारवारणं बोध्यम् द्विविधपरामर्शात् पक्षविशेष्यकसाध्यविशेष्यकानुमितिद्वयस्वीकारस्तु नोचितः अनुभवविरोधादिति भावः ।

**केचित्तु** अनुभवानुरोधेन पक्षविशेष्यकादेव परामर्शादनुमितिर्जायते न तु व्याप्यविशेष्यकात् **अत एव** वह्निव्याप्यधूमवांश्चायमित्याकारकः पक्षविशेष्यक एवोपनय इति वदन्ति ।

मीमांसकः शङ्कते नन्विति । इदं हि तेषांमतम् यन्महानसादौ वह्निसहचरितधूमदर्शनेन 'धूमो वह्निव्याप्य' इति व्याप्तिग्रहे जाते पश्चाद् 'पर्वतो धूमवान्' इति पक्षधर्मताज्ञानात् 'पर्वतो वह्निमान्' इत्यनुमितिर्जायते व्याप्त्यनुभवस्यानुमितिं प्रति कारणता तु संस्कारद्वारा ।

न च संस्कारजन्यत्वेन अनुमितेः स्मृतित्वापत्तिरिति वाच्यम् संस्कारजन्यत्वस्य संस्कारध्वंससाधारण्येन स्मृतित्वाप्रयोजकत्वादिति । न्यायमते तु महानसादौ वह्निसहचरितधूमदर्शनेन 'धूमो वह्निव्याप्य' इति व्याप्त्यनुभवः ततः 'पर्वतो धूमवान्' इति पक्षवृत्तिताज्ञानं ततः व्याप्तिस्मरणं ततः परामर्शः ततोऽनुमितिरिति ।

व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानमिति । ज्ञानाकारश्च 'वह्निव्याप्यधूमवान्

न्यायसिद्धान्तमुक्तावली ।

**श्यकत्वात् तत्र विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न-**

**व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम् ।**

मुक्तावलीमयूखः ।

पर्वत' इत्येवंरूपः । वह्नेर्निरूपितत्वसम्बन्धेन व्याप्तौ तस्याश्च स्वरूपसम्बन्धेनाश्रये तस्य चाभेदेन धूमे तस्य च संयोगेन मतुबर्थाश्रये तस्यचाभेदेन पर्वतेऽन्वयः समानाधिकरणप्रकारताविशेष्यतयोरवच्छेद्यावच्छेदकभाव इत्येकं मतम् तयोरभेद इत्यपरं मतम् आद्ये वह्नित्वावच्छिन्ननिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिरूपिता या व्याप्तित्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यावच्छिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपिता या धूमत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वावच्छिन्नसंयोगसंबन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वावच्छिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता तादृशविशेष्यताशाली बोधः,

द्वितीये तु वह्नित्वावच्छिन्ननिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिरूपिता या व्याप्तित्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नस्वरूपसंबन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपिता या धूमत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नसंयोगसंबन्धावच्छिन्नप्रकारतानिरूपिता या आश्रयत्वावच्छिन्ना विशेष्यता तादृशविशेष्यत्वाभिन्नाभेदसंबन्धावच्छिन्नप्रकारतानिरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता तादृशविशेष्यताशाली बोधः

**व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वेनेत्यस्य**—व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेनेति व्याप्तिप्रकारतानिरूपितहेतुविशेष्यत्वावच्छिन्नप्रकारतानिरूपितपक्षविशष्यताशालिनिश्चयत्वेनेति वार्थः आद्यं समानाधिकरणप्रकारताविशेष्यतयोरभेदवादिमताभिप्रायेण द्वितीयं तयोर्भेदमङ्गीकृत्यावच्छेद्यावच्छेदकभाववादिमताभिप्रायेणेति ध्येयम् ।

**अनुमित्युत्पत्तेरिति** । अयं भावः, व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्याभावेऽपि अनुमितिदर्शनेन व्यतिरेकव्यभिचारान्नानुमितौ व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य कारणत्वसंभव इति ।

ननु तत्रानुमितिरूपकार्यदर्शनेन कारणानुमानात् व्याप्यतावच्छेदकप्रकारकं ( पर्वतो धूमवान् ) इति ज्ञानं कल्पनीयमिति न व्यभिचार इत्यत आह—**लाघवाच्चेति**—व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः ।

न्यायसिद्धान्तमुक्तावली ।

किं च 'धूमवान् पर्वत' इति ज्ञानादनुमित्यापत्तिः, व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात् ।

न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम् । चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यात् ।

यदि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते, तदाऽनन्तकार्यकारणभावः । मन्मते तु समवायसम्बन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसम्बन्धेनाऽनुमितिं जनयतीति नाऽनन्तकार्यकारणभावः ।

यदि तु व्याप्तिप्रकारकं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणमित्युच्यते— तदा कार्यकारणभावद्वयं, 'वह्निव्याप्यो धूम आलोकवांश्च पर्वत' इति

मुक्तावलीमयूखः ।

ननु तवावच्छेदकलाघवं मीमांसकानां तु पूर्वोक्तकल्पनालाघवमित्युभयोः साम्यमित्यत आह—किंचेति ।

तत्पुरुषसमवेतज्ञानविषयीभूता या व्याप्यता तदवच्छेदकप्रकारकं पक्षधर्मताज्ञानं तत्पुरुषसमवेतानुमितौ हेतुः, इति कार्यकारणभावस्वरूपमिति भावः न च तत्पुरुषसमवेतमेव भिन्नकालीनं व्याप्तिज्ञानं पक्षधर्मताज्ञानं चादायानुमितिप्रसङ्गः मम तु भिन्नकालीनज्ञानाभ्यामनुमितिकारणीभूतस्य विशिष्टज्ञानस्यानुदयान्नायं दोष इति वाच्यम् ज्ञानचा वर्तमानकालीनत्वस्य बोधनेन ग्रहे तत्कालीनत्वस्यापि लाभेनादोषात् ।

कार्यकारणभावद्वयमिति । ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुत्वेत्यत्र विनिगमनाविरहेण हेतुताद्वयं तत्रापि ।

न च व्याप्तिप्रकारकहेतुविशेष्यकनिश्चयत्वेन हेतुविशेष्यकव्याप्तिप्रकारकनिश्चयत्वेन व्याप्तिप्रकारकज्ञानस्य, व्याप्यतावच्छेदकप्रकारकपक्षविशेष्यकनिश्चयत्वेन पक्षविशेष्यकव्याप्यतावच्छेदकप्रकारकनिश्चयत्वेन पक्षधर्मताज्ञानस्य, कारणत्वेन मीमांसकस्य कार्यकारणभावचतुष्टयमिति, नैयायिकमते द्वयमेवेति तदपेक्षया लाघवमेवेति वाच्यम् । नैयायिकमते व्याप्तिप्रकारत्वहेतुप्रकारत्वपक्षविशेष्यतानां त्रयाणां विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभावत्रयसत्त्वेन मीमांसकापेक्षया गौरवात् तथा हि— व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेन, पक्षविशेष्यतानिरूपितहेतुप्रकारतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वेन, व्याप्तिप्रकारतानिरूपिता या पक्षविशेष्यतानिरूपिता हेतुप्रकारता तादृशप्रकारताशालिनिश्चयत्वेन, इति विनिगमनाविरहेण परामर्शकारणतायाः कार्यकारणभावत्रयमिति—इत्यपरितोषादाह वह्निव्याप्यो धूम इति ।

न्यायसिद्धान्तमुक्तावली ।

ज्ञानादप्यनुमितिः स्यात् । इत्थं च यत्र ज्ञानद्वयं, तत्राऽपि विशिष्टज्ञानं कल्पनीयं, फलमुखगौरवस्यादोषत्वात् ॥

व्याप्यो नाम व्याप्त्याश्रयः, तत्र व्याप्तिः केत्यत आह । व्याप्तिरिति ।

**व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥ ६८ ॥**

वह्निमान् धूमादित्यादौ साध्यो वह्निः, साध्यवान् महानसादिः, तदन्यो जलह्रदादिः, तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वान्नाऽतिव्याप्तिः ।

मुक्तावलीमयूखः ।

ननु व्याप्यतावच्छेदकानां धूमत्वादीनां कारणतावच्छेदककुक्षौ निवेशेन नायं दोष, इति चेन्न—'वह्निव्याप्यधूमवान्पर्वतः' 'वह्निव्याप्यालोकवान् पर्वतः', 'वह्निव्याप्यवान्पर्वतः' इति ज्ञानत्रयसाधारणकारणत्वानुरोधेन वह्न्यभाववन्निरूपितवृत्तित्वाभावप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेन कारणतायास्तार्किकैः स्वीकारेणहेतुतावच्छेदकभेदेन कारणभेदाभावेन लाघवात् 'मीमांसकस्य तु व्याप्यतावच्छेदकधूमत्वादीनां निवेशे व्याप्यतावच्छेदकभेदेनानेककार्यकारणभावापत्तेरेव दोषत्वादिति ।

ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पने कल्पनागौरवं तार्किकाणामित्यत आह इत्थं चेति ।

**फलमुखेति** । फलं कार्यकारणभावग्रहस्तन्मुखं तदधीनं गौरवं गौरवज्ञानमित्यर्थः । कार्यकारणभावग्रहोत्तरमुत्पन्नस्य गौरवज्ञानस्य कारणतानिश्चयप्रतिबन्धकत्वासम्भव इति भावः । एतदुक्तं भवति गौरवं नाम कार्यलिङ्गकानुमानातिरिक्तप्रमाणासिद्धतत्तदनुमित्यव्यवहितपूर्ववर्तिस्वाश्रयकत्वम् । स्वं गौरवम् । अनुमित्यव्यवहितपूर्ववर्ती स्वाश्रयः परामर्शः तद्वृत्तित्वं गौरवे । स्वाश्रयकत्वमित्यस्य स्वाश्रयवृत्तित्वमर्थः विशिष्टज्ञानत्वेन कारणतानिश्चये सति कार्यलिङ्गेन तत्तदनुमित्यव्यवहितपूर्ववर्तिपरामर्शनिश्चयः ततः तादृशगौरवज्ञानमिति ।

परामर्शनिरूपणानन्तरं व्याप्तिनिरूपणे उपोद्घातसंगतिं दर्शयति—व्याप्यो नामेति । उपपाद्योपपादकभावः उपोद्घातः । संगतिश्च षोढा—सप्रसङ्ग उपोद्घातो हेतुवसरस्तथा । निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते इत्यभियुक्तोक्तेः ।

**तत्रेति** । घटकत्वं सप्तम्यर्थः । एवं च व्याप्यघटकीभूता व्याप्तिः केत्यर्थः । घटकत्वं स्वाविषयकप्रतीत्यविषयत्वम् ।

**साध्यवदन्यस्मिन्निति** । साध्यवत्पदं लक्षणया साध्यवत्प्रतियोगिकपरं तस्य चाभेदसम्बन्धेन अन्यपदार्थैकदेशे भेदेऽन्वयः न तु साध्यवत्पदार्थस्य प्रतियोगितासम्बन्धेन भेदे नामार्थयोरभेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात् भेदवतश्च सप्तम्यर्थनिरूपितत्वसम्बन्धेन वृत्तित्वरूपे सम्बन्धपदार्थे तस्य च प्रतियोगितासम्बन्धेनाभावे । एवं च साध्यवत्प्रतियोगिकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरिति तदर्थः ।

न्यायसिद्धान्तमुक्तावली ।

अत्र येन सम्बन्धेन साध्यं, तेनैव सम्बन्धेन साध्यवान् बोध्यः, अन्यथा समवायसम्बन्धेन वह्निमान् वह्नेरवयवः, तदन्यो महानसादिः, तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात् ।

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः, तेन यत्किञ्चिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षतिः ।

येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यवृत्तित्वं बोध्यं, तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः ।

साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः, तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि नाऽतिव्याप्तिः ।

मुक्तावली मयूखः ।

**अत्र येन सम्बन्धेनेति ।** अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः एवं च समवायेन वह्निमान् न इति प्रतीतिसाक्षिकभेदीयप्रतियोगितावच्छेदकता वन्हिनिष्ठा सा च न साध्यतावच्छेदकसम्बन्धावच्छिन्ना या च साध्यतावच्छेदकसम्बन्धावच्छिन्ना संयोगेन वन्हिमान्नेति भेदीया प्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिकताकभेदश्च न पर्वत इति नाव्याप्तिरिति ।

**साध्यवत्त्वावच्छिन्नेति ।** अयं भावः साध्यतावच्छेदकसंम्बन्धावच्छिन्ना साध्यतावच्छेदकावच्छिन्ना या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरुपितवृत्तित्वाभावो व्याप्तिरित्यर्थः ।

**अयं भावः,** पर्वतः संयोगेन महानसीयवह्निमान्नेति भेदीयप्रयोगितावच्छेदकता न साध्यतावच्छेदकमात्रावच्छिन्ना इति तादृशो भेदो धर्तुं न शक्यते यश्च तादृशः संयोगेन वह्निमान्नेति प्रतीतिसाक्षिकः स च न पर्वते इति नाव्याप्तिः ।

**येन सम्बन्धेन हेतुतेति ।** अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकावच्छिन्ना या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तदभावो व्याप्तिरित्यर्थः' एवं च संयोगेन वह्निमान्नेति प्रतीतिसाक्षिभेदकभेवद्धूमावयवनिरूपिता समवायसम्बन्धावच्छिन्ना वृत्तिता यद्यपि धूमे वर्तते तथापि साध्यवद्भिन्ननिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तिताया अभावो वर्तत एवेति नाव्याप्तिः ।

**साध्यवदन्यवृत्तित्वत्वावच्छिन्नेति ।** अयं भावः साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यता-

न्यायसिद्धान्तमुक्तावली ।

अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नाऽस्ति, तथाऽपि हेतुतावच्छेदकरूपेणाऽवृत्तित्वं वाच्यं, हेतुतावच्छेदकं तादृशवृत्तितानवच्छेदकमिति फलितोऽर्थः ॥ ६८ ॥

ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याऽप्रसिद्धत्वादव्याप्तिः, किञ्च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिश्चात आह—

अथ वा हेतुमन्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥

अथ वेति । हेतुमति निष्ठा—वृत्तिर्यस्य स तथा विरहः—अभावः,

मुक्तावलीमयूखः ।

वती या प्रतियोगिता तन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावो व्याप्तिः । एवं च धूमवान् वह्नेरित्यत्र धूमवदन्यजलनिरूपितवृत्तित्वं वह्नौ नास्तीति प्रतीतिसाक्षिकाभावीया प्रतियोगिता वृत्तितात्वावच्छिन्ना यथा वर्तते तथा निरूपितत्वसम्बन्धेन जलावच्छिन्नाऽपि वर्तते इति तादृशाभावो धर्तुं न शक्यते किन्तु धूमवदन्यनिरूपितवृत्तित्वं नास्तीति एवंस्वरूपः स च न वह्नौ इति नातिव्याप्तिः । वृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकेत्यस्य वृत्तितात्वनिष्ठावच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपिका सती वृत्तितात्वनिष्ठावच्छेदकता निरूपिका या प्रतियोगिता तन्निरूपकेत्यर्थः इति भावः ।

हेतुतावच्छेदकमिति । साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तदनवच्छेदकं यद्धेतुतावच्छेदकं तद्वत्त्वं व्याप्तिरिति लक्षणं पर्यवसन्नम् ॥ ६८ ॥

अथ वेत्यादिलक्षणमवतारयितुमाद्यलक्षणे दोषमाह—नन्विति । अयंभावः, इदं ज्ञेयं वाच्यत्वादित्यादौ ज्ञेयत्वरूपसाध्यवद्भेदस्याप्रसिद्ध्या ऽव्याप्तिः एवं सत्तावान् जातेरित्यत्र सत्तावदन्यसामान्यादिनिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या तदभावाप्रसिद्ध्याऽव्याप्तिरिति ।

ननु भेदप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वनिश्चयकाले पक्षताघटकसंशयाभावान्नानुमितिः तच्छून्यकाले च भ्रमात्मकव्याप्तिज्ञानादेवानुमितिः सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतात्वोपगमेऽपि मीमांसकमते केवलान्वयिसाध्यकानुमित्यनङ्गीकारान्नेदं दूषणमित्यरुचेराह—किंचेति ।

हेतुमदिति । हेतुनिष्ठं हेत्वधिकरणनिष्ठात्यन्ताभावाप्रतियोगिसाध्यसामाना-

न्यायसिद्धान्तमुक्तावली।

तथा च हेत्वधिकरणवृत्तियोऽभावस्तद्प्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते।

अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः।

न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम्। तत्तद्वह्न्यादेरप्युभयाभावसत्त्वात्, एकसत्त्वेऽपि द्वयं नाऽस्तीति प्रतीतेः। गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च।

तथाऽपि प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम्।

मुक्तावलीमयूखः।

धिकरण्यं व्याप्तिः। पर्वतो वह्निमान्धूमादित्यत्र हेतुर्धूमस्तदधिकरणं पवर्तस्तन्निष्ठोऽत्यन्ताभावः घटो नास्तीति प्रतीतिसाक्षिकस्तत्प्रतियोगी घटः, अप्रतियोगी वह्निः स एव साध्यः तेन सामानाधिकरण्यं धूमे इति लक्षणसमन्वयः।

अत्रेति। वह्निमान् धूमादित्यत्र हेतुर्धूमस्तदधिकरणं पर्वतस्तन्निष्ठोऽत्यन्ताभावः महानसीयवह्निर्नास्तीति प्रतीतिसाक्षिकः हेत्वधिकरणे महानसे पर्वतीयवह्निर्नास्तीति तत्प्रतियोगी चालनीन्यायेन महानसीयवह्न्यादिरप्रतियोगी न कोऽपि वह्निरित्यव्याप्तिः।

तत्तद्वह्न्यादेरपीति। वह्निमान धूमादित्यत्र हेत्वधिकरणे पर्वते पर्वतीयवह्निघटोभयं नास्तीति प्रतीतिसाक्षिकपर्वतीयवह्निघटोभयाभावस्य सत्त्वात् तत्प्रतियोगी पर्वतीयवह्निरिति समानाधिकरणवह्निधूमयोरेवव्याप्तिरित्युक्तावपि न निस्तार इति भावः। इदमुपलक्षणम्। विशिष्टाभावमादायाव्याप्तिरित्यपि बोध्यम्।

ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणान्नायं दोष इत्यरुचेराह—गुणवानिति। अत्र हेतोरेकव्यक्तितया समानाधिकरणयोरेव व्याप्तिरित्युक्तावपि न निस्तारः तथा हि गुणवान् द्रव्यत्वादित्यत्र द्रव्यत्वाधिकरणे जले गन्धो नास्ति हेत्वधिकरणे पृथिव्यां स्नेहो नास्ति तादृशे वायौ रूपं नास्तीति चालनीन्यायेन तत्तद्गुणानामभावसत्त्वात् प्रतियोगित्वमेव तत्तत्साध्ये इत्यव्याप्त्या सामानाधिकरणयोरेव व्याप्तिरित्यभ्युपगन्तुमशक्यमिति भावः।

तद्रूपवान् तद्रसादित्यत्र लक्षणसमन्वयसंभवेनासम्भवाभावादव्याप्त्यभिधानम्।

तथापीति। एवंच हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणं निष्पन्नम्, तथा च गुणवान् द्रव्यत्वादित्यत्र द्रव्यत्वाधिकरणे गुणो नास्तीत्यभावो धर्तुं न शक्यते किन्तु रूपं नास्ति रसो नास्तीत्येवमादिरेव तदीया प्रतियोगिता रूपरसादिनिष्ठा प्रतियोगितावच्छेदकं रूपत्वादिकमनवच्छेदकं गुणत्वं तदेव साध्यतावच्छेदकं तदवच्छिन्नेन गुणेन द्रव्यत्वरूपहेतोः सामानाधिकरण्यसत्त्वात्समन्वयः।

न्यायसिद्धान्तमुक्तावली।

ननु रूपत्वव्याप्यजातिमत्त्वात् पृथिवीत्वादित्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयः, तासां च शुक्लत्वादिस्वरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न—

तत्र परम्परया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात्, न हि तादृशधर्मावच्छिन्नाभावः क्वाऽपि पृथिव्यामस्ति, रूपत्वव्याप्यजातिमान्नाऽस्तीति बुद्ध्यापत्तेः।

एवं दण्डयादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकं तच्च प्रतियोगितानवच्छेदकमिति।

साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदन्ति।

मुक्तावलीमयूखः।

**नन्विति।** रूपत्वव्याप्यजातिमत्त्वात् पृथिवीत्वादित्यत्र पृथिवीत्वाधिकरणे पीतघटे नीलो नास्ति, रक्तघटे पीतो नास्तीत्येवं चालनीन्यायेन सर्वेषामपि रूपाणामभावसत्त्वात्सर्वा अपि रूपत्वव्याप्या नीलत्वादिजातयः प्रतियोगितावच्छेदिकाः संपन्नास्ता एव च साध्यतावच्छेदिकाः इति हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितानवच्छेदिका न संपन्ना इत्यव्याप्तिः।

**परम्परयेति।** स्वाश्रयसमवायसम्बन्धेनेत्यर्थः। स्वं रूपत्वव्याप्यजातित्वं तदाश्रयः रूपत्वव्याप्यनीलत्वादिजातिः तत्समवायो रूपे एवं च पृथिवीत्वाधिकरणे स्वाश्रयसमवायसंम्बन्धेन रूपत्वव्याप्यजातित्ववान्नास्तीत्यभावो धर्तुं न शक्यते पृथिवीत्वाधिकरणे स्वाश्रयसमवायसंबन्धेन रूपत्वव्याप्यजातित्ववतो नीलरूपादेः प्रतियोगिनः सत्त्वादिति प्रतियोगितावच्छेदकं पूर्वोक्तरीत्या नीलत्वादिकमनवच्छेदकं रूपत्वव्याप्यजातित्वं तदेव साध्यतावच्छेदकमित्यदोषः।

**एवमिति।** मठो दण्डिमान् दण्डिसंयोगादित्यत्र दण्डिसंयोगाधिकरणमनुयोगितासंबन्धेन मठः तन्निष्ठोऽभावः तद्दण्डी नास्तीति तदभावीया प्रतियोगिता तत्तद्दण्डिनिष्ठा प्रतियोगितावच्छेदको दण्डः स एव साध्यतावच्छेदक इत्यव्याप्तिः स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन दण्डत्वस्य साध्यतावच्छेदकत्वाङ्गीकारे तु—दण्डिसंयोगाधिकरणे स्वाश्रयाश्रयत्वसंबन्धेन दण्डत्ववान्नास्तीति वक्तुं न शक्यते अपि तु घटत्ववान्नास्तीत्येवामादिरिति नाव्याप्तिः।

**साध्यादिभेदेनेति।** तादृशस्थले लक्षणान्तरमेव कर्तव्यम्। हेत्वधिकरणनिष्ठात्यन्ताभावीयप्रतियोगितावच्छेदकतानवच्छेदकं यत्साध्यतावच्छेदकतावच्छेदकं तदाश्रयावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणमास्थेयमित्यर्थः।

ननु द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ 'विशिष्टं शुद्धान्नातिरिच्यते' इति

न्यायसिद्धान्तमुक्तावली।

हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम् तेन द्रव्यं गुण-कर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य नाऽव्याप्तिः।

एवं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं बोध्यं, तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाऽव्याप्तिः।

अभावश्च प्रतियोगिव्यधिकरणो बोध्यः। तेन कपिसंयोग्येतद्वृक्ष-त्वादित्यादावेतद्वृक्षत्ववृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाऽव्याप्तिः।

न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं, तदा तथैवाऽव्याप्तिः, प्रतियोगिनः कपिसंयोगस्याऽनधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात्। यदि तु प्रतियोग्यधिकरणा-

मुक्तावलीमयूखः।

न्यायाच्छुद्धसत्ताधिकरणं गुणस्तन्निष्ठाभावः 'द्रव्यत्वं नास्तीति' प्रतीतिसाक्षिकस्तदीयप्रतियोगितावच्छेदकं द्रव्यत्वं तदेव साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं न जातमित्यव्याप्तिरत आह—हेत्वधिकरणमिति। न च हेतुतावच्छेदकविशिष्टसत्तात्वविशिष्टसत्त्वस्य गुणे सत्त्वादेवं विवक्षायामप्यव्याप्तेरप्रतीकार इति वाच्यम्—हेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वविशिष्टस्य हेत्वधिकरणपदेन विवक्षणात्, एवं च विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वं द्रव्य एव न गुणे द्रव्यं विशिष्टसत्तावदिति प्रतीतेरित्यदोष इति भावः।

नन्वेमपि वह्निमान्धूमादित्यत्र समवायेन धूमाधिकरणं धूमावयवस्तन्निष्ठोऽभावः वह्निर्नास्तीतिप्रतीतिसाक्षिकः तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिरत आह—हेतुतावच्छेदकसंबन्धेनेति। तथा च हेतुतावच्छेदकसंबन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वविशिष्टनिष्ठाभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः, इति लक्षणस्वरूपं निष्पन्नम्।

ननु, कपिसंयोगी एतद्वृक्षत्वादित्यत्र एतद्वृक्षत्वाधिकरणमेतद्वृक्षः तन्निष्ठोऽभावः मूलावच्छेदन कपिसंयोगो नास्तीति प्रतीतिसाक्षिकः तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वमित्यव्याप्तिरत आह—अभावश्चेति। तथा च एतद्वृक्षे शाखावच्छेदेन कपिसंयोगस्य सत्त्वात् प्रतियोगिसमानाधिकरण एव कपिसंयोगाभावः न प्रतियोगिव्यधिकरणः किन्तु घटाभावादिरेव तथा तत्प्रतियोगितावच्छेदकं घटत्वमनवच्छेदकं कपिसंयोगत्वं तदवच्छिन्नसामानाधिकरण्यमेतद्वृक्षत्वे इत्यदोषः।

ननु प्रतियोगिव्यधिकरण इत्यस्य प्रतियोग्यनधिकरणवृत्तीत्यर्थाङ्गीकारे कपिसंयोगी एतद्वृक्षत्वादित्यत्र प्रतियोगिनः कपिसंयोगस्य अनधिकरणं गुणादिकं तन्निष्ठोऽभा-

न्यायसिद्धान्तमुक्तावली ।

**वृत्तित्वं, तदा संयोगी सत्त्वादित्यादावतिव्याप्तिः—सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम्**

**हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्, स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः ।**

**प्रतियोग्यनधिकरणत्वं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम्, तेन विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादौ विशिष्टसत्ताभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि न क्षतिः ।**

मुक्तावलीमयूखः ।

वः कपिसंयोगाभावः प्रतियोगिव्यधिकरणः स एव वृक्षे अधिकरणभेदेनाभावभेदानभ्युपगमादिति तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वमित्यव्याप्तिः न च प्रतियोगिव्यधिकरणेत्यस्य प्रतियोग्यधिकरणावृत्तीत्यर्थः, तथाच वृक्षवृत्तिकपिसंयोगाभावस्य प्रतियोग्यधिकरणवृत्तितया प्रतियोग्यधिकरणवृत्तिभिन्नत्वाभावान्नाव्याप्तिरिति वाच्यम्, एवमपि संयोगी सत्त्वादित्यत्र सत्त्वाधिकरणे गुणादौ वर्तमानो यः संयोगाभावः तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वात्प्रतियोग्यधिकरणावृत्तित्वं नास्ति किन्तूदासीनस्यैव घटाभावादेः तत्प्रतियोगितावच्छेदकं घटत्वादिकमनवच्छेदकं संयोगत्वमित्यतिव्याप्ते-र्दुर्वारत्वादित्यत आह–**हेत्वधिकरणे** इति । हेत्वधिकरणावच्छेदेन प्रतियोग्यनधिकरणवृत्तीत्यर्थः, तथा च कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभावो न हेत्वधिकरणावच्छेदेनप्रतियोग्यनधिकरणवृत्तिः गुणस्य हेत्वधिकरणत्वाभावात् संयोगी सत्वादित्यत्र च संयोगाभावस्तथा गुणस्य हेत्वधिकरणत्वादिति नाव्याप्त्यतिव्याप्ती इति भावः ।

नन्वेवं हेतुसमानाधिकरणेत्यस्य वैयर्थ्यं सत्तावान् जातेरित्यत्र सत्ताभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिवैयधिकरण्याभावादव्याप्त्यभावादित्यत आह—**स्वप्रतियोगीति** । स्वपदं लक्षणघटकाभावपरम् ।

**निष्कर्ष** इति । प्रतियोग्यसमानाधिकरणाभावस्येत्यर्थः । तथा च हेतुसमानाधिकरणेति विशेषणादेव हेत्वधिकरणे इत्याद्यर्थलाभ इति न हेतुसमानाधिकरणेत्यस्य वैयर्थ्यमिति भावः ।

ननु विशिष्टसत्तावान् जातेरित्यत्र जात्यधिकरणं गुणस्तन्निष्ठोऽभावः विशिष्टसत्ताभावः स च सत्तारूपप्रतियोगिसमानाधिकरण एव इत्युदासीन एवाभावो लक्षणघटको वाच्य इत्यतिव्याप्तिरत आह—**प्रतियोग्यनधिकरणत्वमिति** । प्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताशून्यत्वं तदर्थः । तथा च विशिष्टसत्तात्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्वं न गुणे, इति तन्निष्ठोऽभावः विशिष्टसत्ताभावः प्रतियोगिव्यधिकरणः संजात इति नातिव्याप्तिरिति भावः ।

एवं च स्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताशून्यो हेतु-

न्यायसिद्धान्तमुक्तावली।

अत्र साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम्, तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया ज्ञानाधिकरणत्वेऽपि न क्षतिः। इत्थं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः।

ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्प्रतियोगिनोऽनधिकरणत्वं तत्सामान्यस्य वा यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम्।

मुक्तावलीमयूखः।

तावच्छेदकसंबन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणतावान् यः तन्निष्ठाभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्न साध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणं निष्पन्नम्।

नन्वेवमपि ज्ञानवान् सत्त्वादित्यत्र सत्ताधिकरणं घटादिकं तन्निष्ठोभावः, समवायेन ज्ञानं नास्तीति प्रतीतिसाक्षिकः स च विषयतासंबन्धेन ज्ञानरूपप्रतियोगिसमानाधिकरणः, इति प्रतियोगिव्यधिकरणो न जातः किन्तूदासीन एव तथेत्यतिव्याप्तिरत आह **साध्यतावच्छेदकसंवन्धेनेति**। साध्यतावच्छेदकसंबन्धश्च प्रकृते न विषयता किन्तु समवाय एव तेन च संबन्धेन घटे ज्ञानं न वर्तत इति प्रतियोगिव्यधिकरणो ज्ञानाभावः तत्प्रतियोगिताच्छेदकं ज्ञानत्वे, इति नातिव्याप्तिः।

एतेन बह्निमान् धूमादित्यत्र हेत्वधिकरणे पर्वते समवायेन बह्निर्नास्तीति प्रतीतिसाक्षिकाभावमादायाव्याप्तिमाशङ्क्य हेत्वधिकरणवृत्तिरभावः साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताको ग्राह्य इति कस्यचिदुक्तिः परास्ता, पर्वतनिष्ठस्य समवायेन वह्न्यभावस्य प्रतियोगिनो वह्नेः संयोगेन पर्वतवृत्तितया प्रतियोगिवैयधिकरण्याभावेन लक्षणाघटकत्वात्। तथा च साध्यतावच्छेदकसंबन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताशून्य इत्यादि लक्षणं निष्पन्नम्।

**ननु प्रतियोगितावच्छेदकावच्छिन्नस्येति**। विशिष्टसत्तावान् जातेरित्यत्राव्याप्तिवारणाय प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वरूपं विवक्षितं तत्र प्रतियोगितावच्छेदकावच्छिन्नयत्किंचित्प्रतियोगिनोऽनधिकरणं विवक्षितम् किं वा प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणं विवक्षितम् आहोस्वित् यत्किंचित्प्रतियोगितावच्छेदकोधर्मस्तदवच्छिन्नानधिकरणत्वं विवक्षितम्, **आद्ये** वृक्षः कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः, एतद्वृक्षत्वाधिकरणनिष्ठो यो मूलावच्छेदेन कपिसंयोगो नास्तीत्यभावः तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वं तदवच्छिन्नो वृक्षावृत्तिकपिसंयोगोऽपि तदनधिकरणं हेत्वधिकरणमेतद्वृक्षस्तन्निष्ठाऽभावीयप्रतियोगितावच्छेदकत्वमेव कपिसंयोगत्वे, इति अव्याप्तिः तद्वारणार्थं यदि प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणं विवक्ष्यते तदा 'वृक्षः कपिसंयोगी एतद्वृक्षत्वात्'

न्यायसिद्धान्तमुक्तावली ।

आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यादौ तथैवाऽव्याप्तिः—कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिकपिसंयोगोऽपि भवति तदनधिकरणं वृक्ष इति ।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः—सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् । नच वह्निमान् धूमादित्यादौ घटाभावादेःपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेः, तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् । घटाभावे यो वह्न्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादिरित्येवंक्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात् । यदि च घटाभावादौ वह्न्यभावादिर्भिन्न इत्युच्यते, तदापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः—तत्र साध्य-

मुक्तावलीमयूखः ।

इत्यत्र न दोषः तथा हि प्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नसामान्यस्यानधिकरणीभूतं हेत्वधिकरणमेतद्वृक्षो नास्ति किन्तु प्रतियोगितावच्छेदकघटत्वावच्छिन्नस्यानधिकरणं हेत्वधिकरणमेतद्वृक्षः तद्वृत्त्यभावीयप्रतियोगितावच्छेदकं घटत्वम् अनवच्छेदकं कपिसंयोगत्वं तदेव साध्यतावच्छेदकमित्यव्याप्त्यभाव इति ।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति । प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणमिति विवक्षणे 'वह्निमान् धूमात्' इत्यत्र सद्धेतुमात्रे लक्षणस्यासंभवः, तथा हि धूमाधिकरणे पर्वते वर्तमानो यः घटाभावः पूर्वक्षणवृत्तित्वविशिष्टः तस्यैव उत्तरक्षणावच्छेदेन अभावोऽपि वर्तते इति पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावः पर्वते इति 'विशिष्टं शुद्धान्नातिरिच्यते' इति विशिष्टघटाभावः शुद्धघटाभावस्वरूपोऽस्ति इति घटाभावस्य प्रतियोगी घटः घटाभावाभावश्च घटाभावस्य तृतीयाभावरूपत्वात् इति घटरूपप्रतियोगिनः पर्वतेऽसत्त्वेऽपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिनः सत्वेन नायं प्रतियोगिव्यधिकरणोऽभावः, एवं पटाभावादिरपीति प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः

न च ज्ञानवान् द्रव्यत्वादित्यत्रातिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं विवक्षितम् , इति पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपघटाभावप्रतियोगिनः स्वरूपेण पर्वते सत्त्वेऽपि साध्यतावच्छेदकसंयोगसंबन्धेनासत्त्वात् प्रतियोगिवैयधिकरण्यमक्षतम्, इति न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् । एवमपि घटाभावे यो वह्न्यभावः स घटाभावस्वरूपः अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात् इति घटाभावस्य प्रतियोगी वह्निरपि स चसाध्यतावच्छेदकसंयोगसंबन्धेन पर्वते वर्तते इति प्रतियोगिव्यधिकरणाभावाप्रसिद्धितादवस्थ्यात् । यदि

न्यायसिद्धान्तमुक्तावली ।

तावच्छेदकसम्बन्धः स्वरूपसम्बन्धः तेन सम्बन्धेन सर्वस्यैवाभावस्य पूर्ववृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति ।

तृतीये तु कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तिः—तत्रात्मावृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्य गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्यात्मन इति मैवम्—

यादृशप्रतियोगिताच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् ।

ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः—हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणात् ।

मुक्तावली मयूखः ।

च घटाभावे वह्न्यभावो भिन्न एव न घटाभावस्वरूप इत्युच्यते तदा वह्निमान् धूमादित्यत्र लक्षणसमन्वयेनासंभवाभावेऽपि यत्र स्वरूपेण साध्यता ह्रदो धूमाभाववान् वह्न्यभावादिति तत्राव्याप्तिः ।

तृतीयेत्विति । तथा च घटाभावीययत्किञ्चित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे सत्त्वेन न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति न वह्निमान् धूमादित्यादावव्याप्तिसंभव इति भावः ।

कपिसंयोगभाववानिति । अयं भावः । कपिसंयोगाभावाभावः कपिसंयोगः तत्र च गुणत्वं कपिसंयोगत्वं चेति धर्मद्वयं वर्तते, इति कपिसंयोगाभावाभावप्रतियोगितावच्छेदकं गुणसामान्याभावत्वं कपिसंयोगाभावत्वं च भवितुमर्हति ततश्च यत्किञ्चित्प्रतियोगितावच्छेदकपदेन गुणसामान्याभावत्वं धृतं तदवच्छिन्नानधिकरणत्वमात्मन इति तन्निष्ठोऽभावः कपिसंयोगाभावाभावः तत्प्रतियोगितावच्छेदकं कपिसंयोगाभावत्वं तदेव साध्यतावच्छेदकमित्यव्याप्तिरिति ।

यादृशेति । तथा च प्रकृते हेत्वधिकरणस्यात्मनो यादृशप्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वं कपिसंयोगाभावत्वस्य वर्तते एवेति नाव्याप्तिरिति ।

कालोघटवानिति । अयं भावः कालपरिमाणाधिकरणे महाकाले समवायसंबन्धेन पटो नास्तीत्यभावो यद्यपि धर्तुं शक्यते तथापि सोऽभावः साध्यतावच्छेदककालिकसंबन्धेन प्रतियोगिसमानाधिकरण एव जातः, इति कालिकसंबन्धेन काले वस्तुमात्रस्य सत्त्वेन अभावान्तरमपि प्रतियोगिसमानाधिकरणमिति प्रतियोगिव्यधिकरणभावाप्रसिद्धिरिति ।

न्यायसिद्धान्तमुक्तावली।

अत्र केचित्—महाकालभेदविशिष्टघटाभावस्तत्र 'प्रतियोगिव्यधिकरणः—महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात्, महाकाले महाकालभेदाभावात्।

वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्। व्यापकसामानाधिकरण्यं च व्याप्तिः। (यत्संबन्धः साध्यताच्छेदकसम्बन्धः यद्धर्मः साध्यतावच्छेदकधर्मः। तत्र यदि यद्धर्मावच्छिन्नाभावमात्रमित्युच्यते यदा समवायेन यो वह्न्यभावस्तस्य प्रतियोगितावच्छेदकसम्बन्धः समवायस्तेन प्रतियोग्यधिकरणपर्वतादिवृत्तिः स एव, तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिः स्यात्। यदि च यत्सम्बन्धावच्छिन्नत्वाभावमात्रमित्युच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वसत्त्वादव्याप्तिः स्यादत उभयमुपात्तम्।)

इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसम्बन्धेन घटाभावप्रतियोगिनोऽपि घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावः, तस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः।

मुक्तावलीमयूखः।

अत्र केचिदिति। स्वरूपसंबन्धेन महाकालभेदः भूतले वर्तते तत्रैव घटोऽपि वर्तत इति महाकालभेदविशिष्टो घटो जातः, वैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन, इति महाकालभेदविशिष्टो घटो महाकाले न वर्तते तत्र स्वरूपसम्बन्धेन महाकालभेदाभावेन महाकालभेदविशिष्टघटस्याभावादिति महाकालभेदविशिष्टघटाभावः प्रतियोगिव्यधिकरणः तत्प्रतियोगितावच्छेदकं महाकालभेदविशिष्टघटत्वमनवच्छेदकं घटत्वं तदवच्छिन्नसामानाधिकरण्यं कालपरिमाणे इति समन्वयः।

वस्तुतस्त्विति। पर्वतो वह्निमान् धूमादित्यादौ प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तिरभावः संयोगेन घटो नास्तीति प्रतीतिसाक्षिकः तदीयप्रतियोगितासामान्ये संयोगसम्बन्धावच्छिन्नत्ववह्नित्वावच्छिन्नत्वोभयाभावो वर्तते, 'एकसत्त्वे' द्वयं नास्तीति प्रतीतेः, इति संयोगसंबन्धेन वह्नित्वावच्छिन्नो धूमहेतोर्व्यापकः तत्सामानाधिकरण्यं च धूमे व्याप्तिलक्षणसमन्वयः, एवं कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगितावच्छेदकसमवायसम्बन्धेन घटरूपप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिरभावः समवायेन घटो नास्तीति प्रतीति साक्षिकः तदीयप्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वात् कालिकसम्बन्धेन घट-

न्यायसिद्धान्तमुक्तावली।

ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वादिति चेद् न—

कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगताविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति संक्षेपः ॥६९॥

पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह—

सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।

स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥

सिषाधयिषयेति। सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता, तद्वान्पक्ष इत्यर्थः।

मुक्तावलीमयूखः।

त्वावच्छिन्नः कालपरिमाणरूपहेतोर्व्यापक इति तत्सामानाधिकरण्यं कालपरिमाणे इति व्याप्तिलक्षणसमन्वयः।

**प्रमेयवह्निमानिति।** अयं भावः गुरुधर्मस्य प्रमेयवह्नित्वादेः प्रतियोगितानवच्छेदकत्वात् प्रतियोगितायां प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धम् एवं च धूमाधिकरणवृत्तिघटाभावीयप्रतियोगितायां प्रमेयवह्नित्वावच्छिन्नत्वस्याप्रसिद्धत्वेन तद्घटितोभयाभावाप्रसिद्ध्याऽव्याप्तिरिति भावः।

**कम्बुग्रीवादिमान्नास्तीति।** अयं भावः कम्बुग्रीवादिमान्नास्तीति प्रतीतौ यदि कम्बुग्रीवादिमत्प्रतियोगिताकाभावो विषयः स्यात्तदा यत्किंचिद्घटवत्यपि भूतले कम्बुग्रीवादिमान्नास्तीति प्रतीतेः प्रमात्वं स्यादतः कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावो विषयो वाच्यः एवं च गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमङ्गीकर्तव्यमिति न प्रतियोगितायां प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धमिति।

ननु प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे गुरुधर्मावच्छिन्नसाध्यकस्थलेऽव्याप्तिशङ्कैव नोचिता गुरुधर्मे साध्यतावच्छेदकत्वस्यैवानङ्गीकारादिति चेन्न—स्वरूपसम्बन्धरूपावच्छेदकताया एव गुरुधर्मे प्राचीनैरनङ्गीकारेण विषयताविशेषरूपायाः साध्यतावच्छेदकताया गुरुधर्मेऽप्यङ्गीकारसत्त्वेनादोषादित्यलम् ॥ ६९ ॥

व्याप्तिनिरूपणानन्तरं पक्षतानिरूपणे अनुमितिलक्षणैककार्यानुकूलत्वं संगतिः। परामर्शनिरूपणानन्तरं पक्षतानिरूपणे तूपोद्घातसंगतिः तां तु ग्रन्थकृत्स्वयमाह **पक्षवृत्तित्वमित्यादिना।**

**सिषाधयिषाविरहेति।** अयं भावः 'पर्वतो वह्निमान्' इति निश्चयः सिद्धिरित्युच्यते। सा च 'पर्वतो वह्निमान्' इत्यनुमितौ प्रतिबन्धिका, प्रतिबन्धकत्वं च कारणीभूताभावप्रतियोगित्वम्। प्रकृते च सिद्ध्यभावस्यानुमितिं प्रति कारणत्वात् तत्प्रतियोगित्वं सिद्धाविति भवति तस्याः प्रतिबन्धकत्वम्। परन्तु सिद्धिसत्त्वे 'पर्वते वह्नय-

न्यायसिद्धान्तमुक्तावली।

सिषाधयिषामात्रं न पक्षता, विनापि सिषाधयिषां घनगर्जितेन मेघानुमानात्।

अत एव साध्यसन्देहोऽपि न पक्षता विनापि सन्देहं तदनुमानात्।

सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव, अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम्।

तथाच यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता, यत्र सिषाधयिषास्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता, यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता, सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात्।

ननु यत्र परामर्शानन्तरं सिद्धिस्ततः सिषाधयिषा तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः, यत्र सिद्धिपरामर्शसिषाधयिषाः

मुक्तावलीमयूखः।

नुमितिर्मे जायताम्' इतीच्छा सिषाधयिषा तस्यां सत्यामनुमितिर्जायते इति सिषाधयिषाया उत्तेजकत्वम्। उत्तेजकत्वं च प्रतिबन्धकसमानकालीनकार्यजनकत्वम्। एवं च सिषाधयिषाविरहविशिष्टसिद्धिः अनुमितेः प्रतिबन्धिका, तदभावश्च पक्षता सा चानुमितौ कारणम्।

मेघानुमानादिति। गगनं मेघवत् घनगर्जनादिति हि अनुमानस्वरूपम्।

तथाचेति। यत्र सिषाधयिषासिद्धी तत्र सिद्धिरूपविशेष्यसत्त्वेऽपि सिषाधयिषाविरहरूपविशेषणस्याभावात् विशेषणाभावप्रयुक्तो विशिष्टाभावः। यत्र सिषाधयिषा अस्ति सिद्धिश्च नास्ति तत्र सिद्धिरूपविशेष्यस्य सिषाधयिषाविरहरूपविशेषणस्य चाभावादुभयाभावप्रयुक्तो विशिष्टाभावः। यत्र सिषाधयिषा नास्ति सिद्धिश्च नास्ति तत्र सिषाधयिषाविरहरूपविशेषणस्य सत्त्वेऽपि सिद्धिरूपविशेष्यस्याभावात् विशेष्याभावप्रयुक्तो विशिष्टाभावः। इति त्रिषु स्थलेषु अनुमितिर्भवति यत्र च सिषाधयिषा नास्ति सिद्धिश्चास्ति तत्र सिषाधयिषाविरहविशिष्टसिद्धेस्सत्त्वात् सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताया असत्त्वेन नानुमितिरिति।

सिषाधयिषाविरहवैशिष्ट्यं च सिद्धौ एककालावच्छेदेनैकशरीरावच्छेदेनैकात्मवृत्तित्वम् तेन सिषाधयिषाकालीनसिद्धेः कालिकसम्बन्धेन सिषाधयिषाविरहविशिष्टत्वेन, घटावच्छेदेनैकस्मिन्नात्मनि सिषाधयिषाविरहविशिष्टत्वेन, वा नानुमितिक्षतिः एककालीनैकशरीरावच्छेदेनैकात्मवृत्तित्वस्याभावादिति।

परामर्शरूपकारणसत्त्वे सिद्धिरूपप्रतिबन्धकसत्त्वे यदि सिषाधयिषा स्यात्तदा सिषाधयिषाया उत्तेजकत्वं वाच्यं न चैतत्संभवतीत्याशयेनाशङ्कते ननु यत्रेति।

अयं भावः प्रथमं परामर्शस्तद्द्वितीयक्षणे सिद्धिः सिद्ध्युत्पत्तिद्वितीयक्षणे सिषा-

न्यायसिद्धान्तमुक्तावली ।

क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेर्नाशात्प्रतिबन्धकाभावादेवानुमितिः, यत्र सिषाधयिषासिद्धिपरामर्शाः सन्ति तत्र परामर्शकाले सिषाधयिषैव नास्ति, एवमन्यत्रापि सिद्धिकाले परामर्शकाले वा न सिषाधयिषा—योग्यविभुविशेषगुणानां यौगपद्यनिषेधात्, तत्कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेद् न—

यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिषाधयिषा तत्र पक्षतासंपत्तये तद्विशेषणस्यावश्यकत्वात् ।

अत्रेदं बोध्यम् । यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता । तेन सिद्धिपरामर्शसत्त्वेऽपि यत्किञ्चिज्ज्ञानं जायतामिती-

मुक्तावलीमयूखः ।

धयिषा तत्र सिषाधयिषाकाले परामर्शस्य नाशात् नानुमितिः, यत्र च क्रमेण सिषाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले सिषाधयिषाया नष्टत्वात् उत्तेजकाभावेन प्रतिबन्धकसद्भावान्नानुमितिः, यत्र च क्रमेण सिद्धिपरामर्शसिषाधयिषास्तत्र सिषाधयिषाकालेसिद्धेर्नाशेन प्रतिबन्धकाभावादेवानुमितिः, यत्र च परामर्शसिषाधयिषासिद्धयस्तत्र परामर्शनाशादेव नानुमितिः, यत्र च सिषाधयिषापरामर्शसिद्धयः तत्र उत्तेजकाभावात्प्रतिबन्धकसद्भावान्नानुमितिः, यत्र च सिद्धिसिषाधयिषापरामर्शाः तत्र प्रतिबन्धकाभावादेवानुमितिः, इति सिद्धिकाले परामर्शकाले च न सिषाधयिषा इति सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणं व्यर्थमिति ।

प्रत्यक्षमिति । ननु वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षानन्तरं सिषाधयिषैव नोदेति सिषाधयिषायामिष्टसाधनताज्ञानस्य कारणत्वात्तस्य च प्रकृतेऽभावात् तादृशप्रत्यक्षात्पूर्वमिष्टसाधनताज्ञानकल्पने च प्रत्यक्षमेव न स्यादिच्छासामग्र्याप्रतिबन्धात् प्रत्यक्षानन्तरमिष्टसाधनताज्ञानोपगमे च सिषाधयिषाकाले तादृशप्रत्यक्षस्य नाशादनुमितिरेव न स्यात्परामर्शरूपकारणाभावादिति चेन्न—प्रत्यक्षमित्यस्य अनुमितीष्टसाधनताविषयकमितिशेषः एवं च 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान् अनुमितिरिष्टसाधनम्' इति समूहालम्बनात्मकज्ञानानन्तर सिषाधयिषासद्भावेन परामर्शसद्भावेन चानुमितिरित्याशयात् ।

सिद्धिपरामर्शसत्त्वे इति । ननु यत्किञ्चिज्ज्ञानस्यैव सिद्धित्वेन तस्य पूर्वमेवसत्त्वेन सिषाधयिषाविषयसिद्ध्या सिषाधयिषायाः प्रतिबन्धात् सिषाधयिषैव न स्यादिति चेन्न सिद्धिपरामर्शसत्त्वे 'एतदुत्तरकालीनं यत्किञ्चिज्ज्ञानं जायताम्' इतीच्छाविषयसिद्धेः पूर्वमसत्त्वेन एवंरूपायाः सिषाधयिषा उत्पत्तौ बाधकाभावादिति ।

न्यायसिद्धान्तमुक्तावली ।

च्छायामपि नानुमितिः । वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां तु भवत्येव । एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमितिः ।

सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशिष्यैव तत्तदनुमितौ प्रतिबन्धिका वक्तव्या, तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः ।

परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका । पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि ।

इदं तु बोध्यम् । यत्रायं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञानं तत्रासत्यामनुमित्सायां पुरुषस्य प्रत्यक्षं भवति न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत्स्वातन्त्र्येण प्रतिबन्धिका ।

एवं परामर्शानन्तरं विना प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः, प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका ॥७०॥

मुक्तावलीमयूखः ।

नन्वनुमितित्वप्रकारिकेच्छैवोत्तेजिका तेन च यत्किञ्चिज्ज्ञानं जायतामितीच्छामादाय नानुमितिः सम्भवति इति यादृशयादृशेत्येवंरीत्या सिषाधयिषायाः परिचयं कृत्वा तत्तद्व्यक्तित्वेनोत्तेजकत्वकल्पनमफलमिति चेदत आह—प्रत्यक्षातिरिक्तमिति। एवं च अनुमितित्वप्रकारिकेच्छैव उत्तेजिकेति वक्तुमशक्यम् प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छाया अनुमितित्वाप्रकारकत्वेऽप्युत्तेजकत्वादिति भावः ।

भवत्येवेति । अनुमितिरिति शेषः ।

विशिष्यैवेति । वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयः वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकानुमितौ प्रतिबन्धक इति भावः ।

इदं त्विति । अयं पुरुषो नवेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञाने जाते चक्षुःसंयोगादिरूपायां प्रत्यक्षसामग्र्यां च सत्यामनुमितिर्न भवति किं तु प्रत्यक्षं भवति अतः प्रत्यक्षसामग्री अनुमितिप्रतिबन्धिका तत्रैवानुमित्सासत्त्वे तु अनुमितिर्भवति इति अनुमित्साया उत्तेजकत्वं बोध्यम् तथा च अनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री अनुमितिप्रतिबन्धिकेति ।

स्वातन्त्र्येणेति । यथा कामिनीजिज्ञासा ज्ञानमात्रे विरोधिनी तथा अनुमित्साविरहविशिष्टप्रत्यक्षसामग्री अनुमितौ विरोधिनीति भावः । स्वातन्त्र्येण पक्षताकुक्ष्यप्र-

न्यायसिद्धान्तमुक्तावली ।

हेतुप्रसङ्गाद्धेत्वाभासान्विभजते—

**अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।**
**कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ ७१ ॥**

अनैकान्त इति । तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् । तथाहि—व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधि-

मुक्तावलीमयूखः ।

विष्टत्वेनेत्यर्थः अयं भावः यथा सिद्धिः सिद्ध्यभावरूपानुमितिकारणीभूतपक्षताविघटनद्वाराऽनुमितिप्रतिबन्धिका तथा नेयमिति । एतेन यज्ञपत्युपाध्यायोक्ता सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्र्योरन्यतराभावरूपपक्षता नाभ्युपगन्तव्येति सूचितम् ।

ननु प्रत्यक्षसामग्र्या अनुमितिप्रतिबन्धकत्वे भिन्नविषयकप्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यनुदयप्रसङ्ग इत्याह—**एवमिति** । अयं भावः वह्निव्याप्यधूमवान् पर्वत इति परामर्शानन्तरं यदि पर्वतप्रत्यक्षसामग्री चक्षुःसंयोगादिरूपा वर्तते तदाऽनुमितिरेव जायते न प्रत्यक्षमिति विभिन्नविषयकप्रत्यक्षस्य अनुमितिसामग्री प्रतिबन्धिका भवति यदि च प्रत्यक्षेच्छावर्तते तदा विभिन्नविषयकप्रत्यक्षं जायते इति प्रत्यक्षेच्छाया उत्तेजकत्वम् एवं च प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री विभिन्नविषयकप्रत्यक्षस्य प्रतिबन्धिकेति ॥७०॥

**हेतुप्रसङ्गादिति** । स्मृतत्वे सति उपेक्षानर्हत्वं प्रसङ्गसंगतिः । विजयलक्षणैककार्यकारित्वमप्यत्र सङ्गतिर्बोध्या ।

यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं यद्विषयकत्वं च यद्रूपावच्छिन्नविषयकत्वम् ज्ञानस्येत्यत्र ज्ञानपदमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरं षष्ठ्या निष्ठत्वमर्थः विरोधित्वं प्रतिबन्धकत्वम् । तत्त्वमित्यस्य तद्रूपवत्त्वमित्यर्थः । तथा च अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता यद्रूपावच्छिन्नविषयकत्वावच्छिन्ना तद्रूपवत्त्वम् हेत्वाभासत्वम् , 'ह्रदो वह्निमान्' इत्यनुमितौ 'वह्न्यभाववान् ह्रद' इति बाधनिश्चयः प्रतिबन्धकः तथा च प्रकृतानुमितिः 'ह्रदो वह्निमान्' इत्याकारिका सा च प्रतिबध्या, इति प्रतिबध्यता तन्निष्ठा तन्निरूपिता प्रतिबन्धकता 'वह्न्यभाववान् ह्रद' इति अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चये तत्र च वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वं वर्तते इति प्रतिबन्धकता वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्ना तद्रूपवान् वह्न्यभाववद्ध्रद इति तस्य दोषत्वम्, एवं पर्वतो धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तिवह्नेर्दोषत्वम् तथा हि हेत्वाभासलक्षणेऽनुमितिपदमनुमितितत्करणान्यतरपरम् इति प्रकृतानुमितिकरणं धूमाभाववद्वृत्तिर्वह्निरिति व्याप्तिज्ञानं तन्निष्ठप्रतिबध्यतानिरूपिप्रतिबन्धकता 'धूमाभाववद्वृत्तिर्वह्निः' इति निश्चये तदवच्छेदकं धूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयकत्वमिति धूमाभाववद्वृत्तिवह्निर्व्यभिचारदोष इति ।

Acc No. 23772

न्यायसिद्धान्तमुक्तावली ।

त्वात्ते दोषाः । यद्विषयकत्वं च यादृशविशिष्टविषयकत्वम् , तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि न क्षतिः । तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याऽसिद्धत्वान्न हेतुदोषः ।

न च वह्न्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात्तत्र वह्न्यभावव्याप्यवान्पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् ,

इष्टापत्तेः, अन्यथा बाधस्याप्यनित्यदोषत्वापत्तेः । तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वम् , भ्रमादनुमितिप्रतिबन्धमात्रं, हेतुस्तु न दुष्टः ।

इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः । तद्वत्त्वं च हेतौ येन केनापि सम्बन्धेनेति नव्याः ।

परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् , सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा तद्वत्त्वं च हेतोर्ज्ञानरूपसम्बन्धेन । न चैवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात्सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यम्, तत्र ज्ञानस्य सम्बन्धत्वा-

मुक्तावलीमयूखः ।

यादृशविशिष्टविषयकत्वमिति । यद्रूपावच्छिन्नविषयकत्वमित्यर्थः । तेन पर्वतो वह्निमान् इत्यनुमितौ 'पर्वतो वह्न्यभाववान्' इति बाधभ्रमस्यानुमितिप्रतिबन्धकत्वेऽपि सा प्रतिबन्धकता न वह्न्यभाववत्पर्वतत्वावच्छिन्नविषयकत्वावच्छिन्ना वह्न्यभाववत्पर्वतत्वावच्छिन्नविषयस्यैवाप्रसिद्धेः ।

नचेति । 'वह्निव्याप्यधूमवान् पर्वतः' इति परामर्शकाले वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत इति परामर्शे सति धूमहेतोस्सत्प्रतिपक्षत्वं न स्यात् वह्न्यभावव्याप्यपाषाणमयत्ववत्पर्वतरूपविषयस्याप्रसिद्धेरिति भावः । प्रकृतलक्षणेऽवच्छेदकता च अनतिरिक्तवृत्तित्वरूपा गृह्यते एवं च अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयता प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताऽनतिरिक्तवृत्ति तद्रूपवत्त्वं लक्षणं पर्यवसन्नम् ।

ननु वह्न्यभाववद्ध्रदरूपबाधस्य जलादिहेतावसत्त्वात्तस्य दुष्टत्वव्यवहारो न स्यादत आह—तद्वत्त्वं चेति । अयं भावः 'वह्न्यभाववान् ह्रदः जलं च' इति ज्ञाने एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन वह्न्यभाववद्ध्रदरूपबाधो जलादिहेतौ वर्तते इति तत्र बाधितत्वव्यवहारे क्षत्यभाव इति ।

सत्प्रतिपक्षस्यानित्यदोषतामभ्युपगन्तॄणां मतमाह—परे त्विति । बाधभ्रमे

न्यायसिद्धान्तमुक्तावली।

कल्पनात्, अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्, तत्र बाधित इति व्यवहाराभावादित्याहुः।

अनुमितिविरोधित्वं च अनुमितितत्करणान्यतरविरोधित्वम्। तेन व्यभिचारिणि नाव्याप्तिः। दोषज्ञानं च यद्धेतुविषयकं तद्धेतुकानुमितौ प्रतिबन्धकं तेनैकहेतौ व्यभिचारज्ञाने हेत्वन्तरेणानुमित्युत्पत्तेः, तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति संक्षेपः।

यादृशसाध्यपक्षहेतौ यावन्तो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वम्। पञ्चत्वकथनन्तु तत्सम्भवस्थलाभिप्रायेण।

एवञ्च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम्। साधारणः साध्य-

मुक्तावलीमयूखः।

बाधितत्वव्यवहारो न भवति सत्प्रतिपक्षभ्रमे तु सत्प्रतिपक्षित इति व्यवहारो भवति इति बाधितः सत्प्रतिपक्षित इति व्यवहारयोः स्वानुभवमात्रसाक्षिकत्वम् आहुरित्यस्वरसबीजम्।

ननु 'ह्रदो वह्निमान्' इत्यनुमितिविरोधित्वं ह्रदो वह्न्यभाववान् इति बाधबुद्धेरेव न तु वह्न्यभाववद्वृत्तिजलमिति व्यभिचारबुद्धेरिति व्यभिचारे हेत्वाभासलक्षणाव्याप्तिरत आह—अनुमितितत्करणेति। एवं च बाधबुद्धेरनुमितिविरोधित्वाद्व्यभिचारबुद्धेश्च अनुमितिकरणव्याप्तिज्ञानविरोधित्वात् तयोर्लक्षणसमन्वय इति भावः।

ननु व्यभिचारबुद्धेरपि अनुमितिविरोधित्वमस्तु किमिति अनुमितिपदस्य अनुमितितत्करणान्यतरपरत्वमास्थीयते इत्यत आह—दोषज्ञानं चेति। अयं भावः 'पर्वतो वह्निमान् द्रव्यत्वात्' इत्यत्र वह्न्यभाववद्वृत्तिद्रव्यत्वरूपव्यभिचारज्ञानेऽपि धूमहेतुका 'पर्वतो' वह्निमान्, इत्यनुमितिर्भवति किं च व्यभिचारबुद्धेः साध्याभावावगाहित्वाभावान्न साध्यवत्ताबुद्धिप्रतिबन्धकत्वमिति न व्यभिचारबुद्धेरनुमितिप्रतिबन्धकत्वमतोऽनुमितिपदस्य अनुमितितत्करणान्यतरपरत्वोपवर्णनं युक्तमेवेति मन्तव्यम्।

ननु निर्वह्निपर्वतो वह्निमान् इत्यनुमितौ न कोऽपि हेत्वाभासः स्यात् 'निर्वह्निपर्वतो वह्निमान्' इत्याहार्यानुमितेरप्रसिद्ध्या तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्य कुत्राप्यसत्वादत आह—यादृशसाध्यपक्षेति। तद्धर्मावच्छिन्नसाध्यपक्षकानुमितित्वेन किमुद्दिश्यन्यायप्रयोगे यद्धर्मावच्छिन्ने दोषव्यवहारः संप्रदायसिद्धस्तावदन्यान्यत्वं तत्रत्यदोषसामान्यलक्षणम्। एवं च निर्वह्निपर्वतो वह्निमान् धूमादित्यत्र अनुमितेरप्रसिद्धावपि अस्मिल्लक्षणेऽनुमितेरप्रवेशान्न क्षतिः, प्रकृते च वह्निविशिष्टपर्वतरूपाश्रयासिद्धौ धूमाभावविशिष्टनिर्वह्निरूपस्वरूपासिद्धौ दोषव्यवहारः इष्ट इति। वायुर्गन्धवान् स्नेहादित्यत्र सर्वहेत्वाभाससंभवः। स्वविरुद्धधर्मधर्मितावच्छेदकक-स्वप्रकारकज्ञानमाहार्यज्ञानम्।

न्यायसिद्धान्तमुक्तावली ।

वदन्यवृत्तिः, तेन च व्याप्तिज्ञानप्रतिबन्धः क्रियते । असाधारणः साध्यासमानाधिकरणो हेतुः, तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते । ( यथा शब्दो नित्यः शब्दत्वादित्यादावसाधारण्यं शब्दोऽनित्यः शब्दत्वादित्यादौ त्वसाधारण्यभ्रमः ) ।

अन्ये तु सपक्षावृत्तिरसाधारणः । सपक्षश्च निश्चितसाध्यवान् । इत्थञ्च शब्दोऽनित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदा नासाधारण्यं-तत्र हेतोर्निश्चयादिति वदन्ति ।

अनुपसंहारी चात्यन्ताभावाप्रतियोगिसाध्यकादिः, अनेन व्यतिरेकव्याप्तिज्ञानप्रतिबन्धः क्रियते ।

विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी, अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः । सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः, अत्र तु हेतुरेवेति विशेषः । साध्याभावसाधक एव साध्यसाधकत्वेनोपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः ।

सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः । अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीनगृहीताप्रामाण्यकतदभावव्याप्यवत्त्वोपस्थिति-

मुक्तावलीमयूखः ।

तेन चेति । साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः क्रियते इति ।

साध्यसामानाधिकरण्यग्रह इति । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपव्याप्तिग्रहः प्रतिबध्यते इति भावः, अनुपसंहारी च साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिग्रहं प्रतिघ्नाति एवं च साधारणासाधारणानुपसंहारिणां त्रयाणामपि अव्यभिचारग्रहप्रतिबन्धकतया एकरूपेण ( अनैकान्तिकत्वेन ) हेत्वाभासतेति ध्येयम् ।

पक्षे साध्यसंदेहदशायामेव असाधारणस्य हेत्वाभासता न तु निश्चयदशायां तदानीं पक्षस्यैव निश्चितसाध्यवत्त्वेन सपक्षतया सपक्षव्यावृत्तत्वस्य हेतोरभावादित्यसाधारणस्यानित्यदोषतावादिमत आह—अन्ये त्विति । नीलपटावृत्तित्वज्ञानस्य घटवत्ताज्ञाने इव निश्चितसाध्यवदवृत्तित्वरूपासाधारण्यज्ञानस्य साध्यसमानाधिकरण्यग्रहे प्रतिबन्धकताविरहेण साधारणादित्रयाणामेकहेत्वाभासतानुपपत्तिरत्रास्वरसबीजं वदन्तीत्यनेन सूचितम् ।

व्यतिरेकव्याप्तीति । साध्याभावव्यापकीभूताभावप्रतियोगित्वस्वरूपा व्यतिरेकव्याप्तिः । केवलान्वयिसाध्यकेऽन्वयव्याप्तिज्ञानादेवानुमितिरिति भावः । विरुद्धस्य साध्याभावग्रहसामग्रीत्वेन साध्याभावोन्नायकतया साध्यवत्ताग्रहविरोधित्वम् ।

नन्वेवं सत्प्रतिपक्षविरुद्धयोरुभयोरपि साध्याभावसाध्यकतया भेदो न स्यादत आह—सत्प्रतिपक्षे त्विति ।

न्यायसिद्धान्तमुक्तावली ।

विषयस्तथेत्यन्ये ।

अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धः फलम् ।

अत्र केचित्–यथा घटाभावव्याप्यवत्ताज्ञानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते, यथा च शङ्खे सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीर्जायते, एवं कोटिद्वयव्याप्यदर्शनेऽपिकोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति, तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव । यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः । फलबलेन चाधिकसमबलभावः कल्प्यत इति वदन्ति ।

तन्न तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयाल्लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्, न तूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकता–गौरवात् । तथाच प्रतिबन्धकसत्त्वात्कथमनुमितिः ? न हि लौकिकसन्नि-

मुक्तावलीमयूखः ।

रत्नकोशकारमतमुपपादयति—अत्रेति । सत्प्रतिपक्षस्य संशयजनकत्वं दूषकताबीजं नत्वनुमितिप्रतिबन्धकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमितिप्रतिबन्धकत्वे मानाभावादिति तेषामाकूतम् ।

अनुमितिर्भवत्येवेति । ननु यद्यपि तद्वत्ताज्ञाने तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावेन परस्परानुमितिप्रतिबन्धः सत्प्रतिपक्षस्थले न संभवति तथापि निश्चयोत्पादने कल्प्तशक्तिकयोस्तद्व्याप्यवत्तातदभावव्याप्यवत्ताज्ञानयोर्मिलितयोः साध्यसंशयहेतुत्वं कल्पनीयमिति गौरवमिति चेन्न । तत्तत्परामर्शस्य तत्तद्विधेयकानुमितित्वमेव कार्यतावच्छेदकं न तु निश्चयत्वमपि तद्घटकं किन्तु एकैकपरामर्शसत्त्वे कोट्यन्तरभासकसामग्र्यभावात् निश्चयात्मिकानुमितिर्भवतिउभयपरामर्शसत्त्वे च कारणबलादुभयकोट्योर्विरोधितया भानेऽर्थात्संशयरूपानुमितिर्भवतीति अधिककार्यकारणभावकल्पनाऽभावेन गौरवाभावादिति भावः ।

ननु यद्युभयभासकसामग्रीसत्त्वे उभयभानं तदा पित्तादिदोषसत्त्वेऽपि पीतत्वशुक्लत्वोभयस्मृतावुभयोर्भानापत्तिरत आह—फलबलेनेति । तथा च तत्र पीतत्वसाक्षात्कारस्यैव आनुभविकत्वमिति शुक्लत्वग्रहेऽपि पित्तरूपदोषस्य प्रतिबन्धकत्वं कल्पयित्वा पीतत्वसाक्षात्कारसामग्र्या अधिकबलवत्त्वं, दूरत्वदोषे च स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैवोदयात्समबलत्वं कल्प्यते इति भावः ।

रत्नकोशकृन्मतं निरस्यति—तन्नेति । उपनीतभानविशेषः—ज्ञानलक्षणासन्निकर्षः ।

न्यायसिद्धान्तमुक्तावली।

कर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम्। यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्संशयो नान्यथा अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति।

असिद्धिस्त्वाश्रयासिद्ध्याद्यन्यतमत्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः। यत्र च काञ्चनमयः पर्वतो वह्निमानिति साध्यते तत्र 'पर्वतो न काञ्चनमय' इति ज्ञाने विद्यमाने काञ्चनमयपर्वते परामर्शप्रतिबन्धः फलम्।

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। तत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम्।

साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्भूताः। साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः एतज्ज्ञाने जाते काञ्चनमयवह्निमानित्यादौ साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्।

एवं हेतौ हेतुतावच्छेदकस्याभावः साधनाप्रसिद्धिः, यथा काञ्चनमयधूमादित्यादौ, अत्र हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभावात्तद्धेतुकव्याप्तिज्ञानादेरभावः फलम्।

एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति।

बाधस्तु पक्षे साध्याभावादिः। एतस्यानुमितिप्रतिबन्धः फलम्। तद्धर्मिकतदभावनिश्चयो लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति।

मुक्तावलीमयूखः।

केषांचिन्मतमाह—एवं वह्निमानिति। वदन्तीत्यनेनास्वरसः सूचितः। तद्बीजं तु नीलधूमे व्याप्तिसत्त्वात्कथं व्याप्यत्वासिद्धिः।

न च तत्र व्याप्तिसत्त्वेऽपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यम्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात्।

न च स्वरूपसंबन्धरूपावच्छेदकत्वस्याभावाद्व्याप्यत्वासिद्धिरिति वाच्यम् तथा सति 'पशुमान् सास्नादिमत' इत्यत्रापि व्याप्यत्वासिद्ध्यापत्तेः सास्नापेक्षया गोत्वस्य लघुत्वेन सास्नादेः स्वरूपसंबन्धरूपावच्छेदकत्वाभावात् तस्माद्व्यर्थविशेषणस्थले न व्याप्यत्वसिद्धि"त्वाभासः किन्त्वधिकोक्तिरूपनिग्रहस्थानेन पुरुषो निगृह्यते इति भावः।

धूमाभाववद्ध्रदः स्वरूपासिद्धिः। काञ्चनमयत्वाभाववत्पर्वतः आश्रयासिद्धिः।

न्यायसिद्धान्तमुक्तावली।

न तु तत्र संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम्—अप्रसिद्ध-साध्यकानुमित्यनापत्तेः, साध्यसंशयादिकं विनाप्यनुमित्युत्पत्तेश्च।

एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकं—मानाभावात् गौरवाच्च। अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः। किन्तु भ्रमत्वज्ञानानास्कन्दितबाधादिबुद्धेः प्रतिबन्धकता। तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचिदुपयुज्यते।

न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यम्, बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात्।

मुक्तावलीमयूखः।

काञ्चनमय वाभाववद्वह्निः साध्याप्रसिद्धिः। काञ्चनमयत्वाभाववद्धूमः साधनाप्रसिद्धिः। प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षः सत्प्रतिपक्षः मतभेदेन साध्याभावव्याप्यवत्पक्षः सत्प्रतिपक्षः।

कस्यचिन्मतं दूषयति नत्विति। श्रुत्यात्सनिश्चयवतोऽपि सिषाधयिषयाऽनुमित्युपपादनाय संशयनिश्चयसाधारणसाध्यसंसर्गज्ञानत्वेन साध्यसंसर्गज्ञानमनुमितिकारणमिति तदाशयः।

नन्वेवं बाधनिश्चयकाले साध्यसंसर्गज्ञानाभावादेवानुमितिर्न भविष्यति इति बाधनिश्चयस्य नानुमितिविरोधित्वमिति बाधस्य हेत्वाभासत्वं न स्यादित्यत आह—तद्विरोधितयेति। अनुमितिकारणीभूतसाध्यसंसर्गज्ञानविरोधितयैव बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वन्नत्वनुमितिविरोधितयेति भावः।

अप्रसिद्धसाध्यकेति। पूर्वमगृहीतसाध्यविधेयकेत्यर्थः। 'पृथिवीतरत्वव्यापकाभावप्रतियोगिगन्धवती पृथिवी' इति व्यतिरेकपरामर्शजन्यायाः अप्रसिद्धेतरभेदरूपसाध्यविधेयिकायाः 'पृथिव्यामितरभेद' इत्यनुमितेरभावापत्तिरिति यावत्।

नन्वप्रसिद्धसाध्यिकाऽनुमितिः कुत्रापि न भवत्येवेत्यत आह—साध्यसंशयेति।

तथा च घनगर्जितेन मेघानुमितिस्थले संशयनिश्चययोर्द्वयोरप्यभावेन साध्यवत्ताज्ञानं नानुमितिहेतुरितिभावः।

पक्षविशेष्यकसाध्याभावज्ञाने प्रमात्वनिश्चयोऽनुमितिप्रतिबन्धकः तदभावोऽनुमितिकारणमिति तादृशप्रमात्वमेव बाध इति प्राचीनमतं दूषयति—एवं साध्याभावेति।

मानाभावादिति। ग्राह्याभावानवगाहिनः साध्याभावज्ञानधर्मिकप्रमात्वनिश्चयस्य विरोधित्वे मानाभावादित्यर्थः।

गौरवाच्चेति। पक्षविशेष्यकत्वापेक्षया पक्षविशेष्यकसाध्याभावज्ञानविशेष्यकस्य साध्याभावनिश्चयत्वापेक्षया साध्याभाववतिसाध्याभावप्रकारकत्वरूप (प्रमात्व) निश्चयत्वस्यातिगुरुत्वादिति भावः।

न्यायसिद्धान्तमुक्तावली।

किञ्च यत्र परामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिञ्चित्करत्वाद्बाधस्यानुमितिप्रतिबन्धकत्वं वाच्यम्। एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम्।

न च पक्षे घटे गन्धसत्त्वात्कथं बाध इति वाच्यम्, पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति।

बाधतद्व्याप्यभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति। अन्यथा हेत्वाभासाधिक्यप्रसङ्गात्। बाधव्याप्यसत्प्रतिपक्षो भिन्न एव स्वतन्त्रेच्छेन मुनिना पृथगुपदेशात्। सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रघट्टकार्थः॥ ७१॥

**आद्यः साधारणस्तु स्यादसाधारणकोऽपरः।**
**तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत्॥ ७२॥**
**यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः।**

यः सपक्ष इति। सपक्षविपक्षवृत्तिः साधारण इत्यर्थः। सपक्षः–निश्चितसाध्यवान्। विपक्षः–साध्यवद्भिन्नः। विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम्।

मुक्तावलीमयूखः।

अकिंचित्करत्वादिति। व्यभिचारज्ञानं नानुमितौ साक्षात्प्रतिबन्धकं किन्तु परामर्शप्रतिबन्धद्वारा तथा च परामर्शोत्तरकालीनो व्यभिचारग्रहो नानुमितिं प्रतिरोद्धुं शक्नोति परामर्शस्य जातत्वात् किन्तु बाधबुद्धिरेव प्रतिबन्धिकेति भावः।

व्यभिचारासंकीर्णमपि बाधं दर्शयति—एवमिति। उत्पत्तिकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादिति हि तादृशं स्थलम्। अत्र हि पक्षे हेतुसत्त्वात् स्वरूपासिद्धत्वस्य, प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारस्य, चाभावादिति भावः।

बाधतद्व्याप्येति। बाधः साध्याभाववत्पक्षः तद्व्याप्यस्सत्प्रतिपक्षः तद्भिन्नाः व्यभिचारविरुद्धासिद्धाः। तद्व्याप्याः—व्यभिचारादिव्याप्याः, तत्रैव–व्यभिचारादिष्वेव अन्तर्भवन्ति इत्यर्थः, व्यभिचारादयो यथा व्याप्तिग्रहप्रतिबन्धकज्ञानविषयत्वेन हेत्वाभासास्तथा व्यभिचारादिव्याप्या अपीति तेषां पञ्चविधहेत्वाभासानन्तर्गतत्वे तेषामतिरिक्तहेत्वाभासत्वं स्यादिति भावः।

सत्प्रतिपक्षव्याप्यस्त्विति। 'साध्याभावव्याप्यवान् पर्वत' इति बुद्धेः साध्यवत्ताज्ञानविरोधित्वेऽपि साध्याभावव्याप्यव्याप्यवानिति बुद्धेः साध्यवत्ताज्ञानविरोधित्वे मानाभावादिति भावः॥ ७१॥

न्यायसिद्धान्तमुक्तावली ।

वस्तुतो विपक्षवृत्तित्वमेव वाच्यम्, विरुद्धस्य साधारणत्वेऽपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात् ।

यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥ ७३ ॥

यस्तूभयस्मादिति । सपक्षविपक्षव्यावृत्त इत्यर्थः । सपक्षः-साध्यवत्तया निश्चितः । विपक्षः-साध्यशून्यतया निश्चितः । शब्दोऽनित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वस्य सन्देहस्तदा सपक्षत्वं विपक्षत्वं च घटादीनामेव तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारणम् । यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधारण्यम् । इदं प्राचां मतम् । नवीनमतं तु पूर्वमुक्तम् ॥ ७२ ॥ ७३ ॥

तथैवानुपसंहारी केवलान्वयिपक्षकः ।
( पर्वतो वह्निमान् सत्त्वादिति तत्रादिमो भवेत् ॥
पृथ्वी नित्या गन्धवत्त्वादिति स्यादपरस्तथा ।
सर्वं तुच्छं प्रमेयत्वादिति तत्रान्तिमो भवेत् । )

तथैवेति । सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात्सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः । इदं तु न सम्यक्—पक्षैकदेशे सहचारग्रहेऽपि क्षतेरभावात् । अस्तु वा सहचाराग्रहस्तावताप्यज्ञानरूपासिद्धिरेव, न तु हेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् ।

यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥ ७४ ॥
( गोत्वादिसाध्ये हेतुर्हि यत्राश्वत्वादिको भवेत् ॥ )

यः साध्यवतीति । एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभावो बोधितः । तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ॥ ७४ ॥

मुक्तावलीमयूखः ।

वस्तुत इति । ननु 'विपक्षवृत्तिः साधारण' इति स्वीकारे साध्यासामानाधिकरणो हेतुर्विरुद्ध इति लक्षणलक्षिते' अयं गौः अश्वत्वात्' इतिविरुद्धेऽश्वत्वे साधारणत्वापत्तिरिति चेन्न इष्टापत्तेः । नन्वेवं तयोः पार्थक्यं किं निबन्धनमिति चेदुच्यते साध्याभाववद्वृत्तित्वरूपसाधारणस्य साध्याभावदवृत्तित्वरूपव्याप्तिज्ञाने, विरुद्धस्य च साध्यसामानाधिकरण्यरूपव्याप्तिग्रहेप्रतिबन्धकत्वेन तयोर्दूषकताबीजस्य पार्थक्येन तयोरपि पार्थक्यमिति भावः ॥ ७२-७३ ॥

न्यायसिद्धान्तमुक्तावली ।

असिद्धिं विभजते—

आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५ ॥

आश्रयासिद्धिरित्यादि ॥ ७५ ॥

पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥

पक्षासिद्धिरिति । आश्रयासिद्धिरित्यर्थः । अपरेति । स्वरूपासिद्धिरित्यर्थः ॥ ७६ ॥

व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।

नीलधूमादिक इति । नीलधूमत्वादिकं गुरुतया न हेतुतावच्छेदकं स्वसमानाधिकरण–व्याप्यतावच्छेदक–धर्मान्तरघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरणेति ॥

विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥
( श्रावणत्वादितो नित्योऽनित्यो जन्यत्वहेतुभिः ॥ )

विरुद्धयोरिति । कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षितत्वमत उक्तं–विरुद्धयोरिति । तथाच स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥७७॥

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥

साध्यशून्य इति । पक्षः–पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यम् ।७८।

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यामनुमानखण्डम् ॥

---

मुक्तावलीमयूखः ।

स्वसमानाधिकरणेति । स्वं नीलधूमत्वं तत्समानाधिकरणं प्रकृतसाध्यव्याप्यतावच्छेदकं धर्मान्तरं धूमत्वं तद्घटितत्वं नीलधूमत्वस्येति न तस्य व्याप्यतावच्छेदकत्वमिति भावः धूमत्वे धूमप्रागभावत्वसामानाधिकरण्याभावात् प्रकृतसाध्यव्याप्यतावच्छेदकधूमत्वघटितत्वेऽपि न व्याप्यतावच्छेदकत्वहानिर्धूमप्रागभावत्वस्येति बोध्यम्॥ ७८॥

इति सूर्यनारायणशुक्लविरचिते मुक्तावलीमयूखेऽनुमान खण्डः संपूर्णः ।

न्यायसिद्धान्तमुक्तावली।

उपमितिं व्युत्पादयति—

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥ ७९॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदानां तु शक्तिधीरुपमाफलम्॥ ८०॥

ग्रामीणस्येति। यत्रारण्यकेन केनचिद् ग्रामीणं प्रत्युक्तं 'गोसदृशो गवयपदवाच्य' इति। पश्चाच्च ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टस्तत्र गोसादृश्यदर्शनं यज्जातं तदुपमितिकरणम्। तदनन्तरं 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः। तदनन्तरं 'गवयो गवयपदवाच्य' इति ज्ञानं यज्जायते तदुपमितिः। न तु 'अयं

मुक्तावलीमयूखः।

अवसरसंगत्या उपमानं निरूपयितुमाह—उपमितिमिति। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्त्याऽनन्तरवक्तव्यत्वमवसरः। प्रत्यक्षोपजीवकत्वं हि प्रत्यक्षनिरूपणानन्तरमनुमानोपमानयोर्निरूपणे संगतिः तत्र प्रत्यक्षनिरूपणानन्तरमनुमानमुपमानं वा निरूपणीयमिति सन्देहे अनुमानं बहुवादिसम्मतमतो निरसनीयाल्पवादिविप्रतिपत्तिकमतः सुगममिति अनुमानं प्राङ्निरूपणीयमिति शिष्यजिज्ञासा जायते सा च अनुमानात् प्रागुपमाननिरूणे प्रतिबन्धिका अनुमाननिरूपणे च कृते उपमाननिरूपणप्रतिबन्धिका पूर्वोक्ता शिष्यजिज्ञासा निवृत्ता इति उपमानमवश्यं निरूपणीयमिति अवसरसंगतिः।

तदुपमितिकरणमिति। इदमुपलक्षणं वैधर्म्यविशिष्टपिण्डदर्शनं करणं 'जलादिविधर्मगुणवती पृथिवी' इत्यतिदेशवाक्यार्थस्मरणं व्यापारः पृथिवीत्वावच्छेन पृथिवीपदवाच्यत्वप्रकारकज्ञानमुपमितिफलमित्यपि बोध्यम्।

गोसादृश्यदर्शनमिति। ननु यदि सादृश्यज्ञानमुपमितिकारणं तदा उपमानस्य प्रत्यक्षोपजीवकत्वं न संभवतीति चेन्न सादृश्यदर्शनपदस्य सादृश्यप्रत्यक्षपरत्वेन उपमानस्य प्रत्यक्षोपजीवकत्वात्।

यज्जायते इति। सादृश्यविशिष्टपिण्डदर्शनं 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणे उद्बोधकमिति भावः।

व्यापार इति। अतिदेशवाक्यार्थस्मरणं हि सादृश्यविशिष्टपिण्डप्रत्यक्षजन्यं तादृशप्रत्यक्षजन्योपमितिजनकं चेति भवति अतिदेशवाक्यार्थस्मरणस्य व्यापारत्वम्।

तदुपमितिरिति। 'गवयो गवयपदवाच्य' इति शक्तिग्रह एवोपमितिरिति भावः।

न्यायसिद्धान्तमुक्तावली।

गवयपदवाच्य' इत्युपमितिःगवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥७९-८०॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्य्यविरचितायां सिद्धान्तमुक्तावल्यामुपमानखण्डम् ॥

मुक्तावलीमयूखः।

यत्तु 'गोसदृशो गवयपदवाच्य' इत्यारण्यकवाक्याज्जायमानः शब्दबोध एवोपमितिर्न तु प्रमित्यन्तरमिति उपमानं नाम प्रमाणान्तरं नाङ्गीकर्तुमलमिति तन्न—

उक्तवाक्यार्थघटकगवयपदश्रवणेऽपि तदर्नी गवयत्वजातेरप्रत्यक्षतया गवयत्वविशिष्टे शक्तिग्राहकप्रमाणाभावेन गवयपदजन्यगवयत्वावच्छिन्नोपस्थितेरभावेन गवयत्वावछिन्नधर्मिकगोपदवाच्यत्वप्रकारकशाब्दबोधासंभवेन तादृशोपमितेः प्रमित्यन्तरत्वस्यावश्यकत्वेनोपमानस्यापि प्रमाणान्तरत्वावश्यकत्वात्।

न च तव मतेपि गवयत्वस्य गोसादृश्यस्य च प्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्न गोसादृश्यावच्छेदेनेति वाच्यम्। उपमितेस्तौल्येऽपि गवयत्वजात्वेपक्षया गोसादृश्ये गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वप्रकारकोपमितेरनुदयादित्यलमप्रस्तुतानल्पजल्पनेनेति।

ननु नोपमानं प्रमाणान्तरं प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वाभावात् उपमितेः प्रत्यक्षादिविजातीयत्वेमानाभावादिति चेन्न—

चक्षुरादिव्यापारविगमेऽप्युपमितेरुत्पादेन तस्याश्चाक्षुषत्वासम्भवः मानसोत्तरमनुत्पद्यमानाया उपमिनोमीति प्रतीतेर्विषयत्वान्न मानसत्वम्। अत एव उपमित्यनन्तरं साक्षात्करोमीति अनुव्यवसायाभावः उपमिनोमीति अनुव्यवसायश्च एतेनाप्युपमितेः प्रत्यक्षत्वायोगः। व्याप्तिज्ञानमन्तराप्युदयान्नानुमितित्वम्। 'नापि शाब्दत्वं पदज्ञानाजन्यत्वात्। नापि स्मृतित्वमननुभूतार्थस्य स्मरणायोगादिति उपमितेः प्रमित्यन्तरत्वेन तत्करणतयोपमानस्या प्रमाणान्तरत्वसंभवादितिशिवम् ॥७९-८०॥

इति न्यायव्याकरणाचार्य सूर्यनारायणशुक्लविरचिते मुक्तावलीमयूखे उपमानखण्डः संपूर्णः।

श्रीगणेशाय नमः ।

# मयूखसमेतमुक्तावलीसमेता

# कारिकावली ।

## शब्दखण्डः ।

न्यायसिद्धान्तमुक्तावली ।

शाब्दबोधप्रकारं दर्शयति—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ ॥

पदज्ञानं त्विति । न तु ज्ञायमानं पदं करणं, पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् ।

पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः ।

तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात्समवायसम्बन्धेनाऽऽकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः ।

वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः । अत्रैव शक्तिज्ञानस्योपयोगः । शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य हि एकसम्बधिज्ञानविधयार्थस्मारकत्वम् ।

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः । आधुनिके नाम्नि शक्तिरस्त्येव—'एकादशेऽहनि पिता नाम कुर्यात्' इतीश्वरेच्छायाः सत्त्वात् । आधुनिकसङ्केतिते तु न शक्तिरिति सम्प्रदायः ।

मुक्तावलीमयूखः ।

व्यापार इति । पदार्थस्मरणं हि पदज्ञानजन्यं पदज्ञानजन्यशाब्दबोधजनकं चेति भवति तस्य व्यापारत्वमिति भावः ।

आकाशस्मरणे इति । एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्येत्यादिः ।

अत्रैव पदजन्यपदार्थोपस्थितावेवेत्यर्थः ।

अस्माच्छब्दादयमर्थो बोद्धव्य इति । इदंपदोत्तरपञ्चम्या अभेदोऽर्थः शब्दपदोत्तरपञ्चम्या जन्यत्वमर्थः बुधधात्वर्थो ज्ञानम् तव्यप्रत्ययार्थः विषयताश्रयः । तत्र इदं

न्यायसिद्धान्तमुक्तावली।

नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव तेनाधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः।

शक्तिग्रहस्तु व्याकरणादितः। तथाहि—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित्सति बाधके त्यज्यते। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः। तच्च गौरवात्त्यज्यते। किन्तु कृतौ शक्तिग्रहो लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते।

मुक्तावलीमयूखः।

पदार्थस्य पञ्चम्यर्थभेदे प्रतियोगित्वसम्बन्धेन, तस्य च पञ्चम्यर्थाभावे प्रतियोगित्वसम्बन्धेन, अभावस्य च स्वरूपसंबन्धेन शब्दपदार्थे, तस्य च पञ्चम्यर्थजन्यत्वसम्बन्धेन बोधे, तस्य निरूपितत्वसम्बन्धेन विषयतायाम्, तस्याश्च स्वरूपेण आश्रये, तस्याभेदेन अर्थे, अन्वयः। एवं च एतदभिन्नशब्दनिष्ठजनकतानिरूपितजन्यतावद्बोधविषयीभूताभिन्नःएतदभिन्नोऽर्थ इति बोध इति पदप्रकारिका अर्थविशेष्यिका इयमिच्छा।

नन्वीश्वरेच्छाया नित्यत्वादेकत्वाच्च 'घटपदाद्घटो बोद्धव्यः' 'पटपदात्पटो बोद्धव्य' इति समूहालम्बनात्मकेश्वरेच्छाविषयतायाः पटेऽपि सत्त्वेन पटस्य घटपदवाच्यत्वापत्तिः एवं गङ्गापदजन्यबोधविषयत्वप्रकारकेश्वरेच्छायास्तीरेऽपि सत्त्वाच्छक्त्यैव तीरबोधे लक्षणाया उच्छेदापत्तिश्चेति चेन्न—

तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छैव तत्पदशक्तिरिति स्वीकारेण 'तीरं बोधविषयो भवतु' 'बोधश्च गङ्गापदजन्यो भवतु' इति विशृङ्खलेश्वरेच्छाया लक्षणास्थले स्वीकारेण तीरनिष्ठविशेष्यताया बोधविषयतात्वावच्छिन्नप्रकारतानिरूपितत्वेऽपि गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितत्वाभावान्न तादृशसम्बन्धेनेश्वरेच्छावत्त्वं तीरस्येति न लक्षणोच्छेदः 'घटो घटपदाद्बोद्धव्यः' 'पटः पटपदाद्बोद्धव्य' ईदृश्या ईश्वरेच्छाया शक्तिस्थले स्वीकारेण घटपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छाया घटे एव सत्त्वेन पटे न घटपदवाच्यत्वव्यवहार इत्याशयात्।

ननु आधुनिकपाणिन्यादिसङ्केतितनदीवृद्ध्यादिपदाद्बोधो न स्यादीश्वरेच्छारूपशक्तेरभावादित्यस्वरसादाह नव्यास्त्विति।

अपभ्रंशगगर्यादिपदाद्बोधस्तु उभयमतेऽपि शक्तिभ्रमादेवेति मन्तव्यम्।

व्याकरणादिति। भू सत्तायां, वर्तमानेलडित्यादिव्याकरणादित्यर्थः।

वैयाकरणैरिति। फलव्यापारौ धात्वर्थः। कर्तृप्रत्यये कर्ता, कर्मप्रत्यये कर्म, प्र-

न्यायसिद्धान्तमुक्तावली ।

**न च कर्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यम् , कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् ।**

**संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः । कर्मत्वादीत्यस्येतरविशेषणत्वतात्पर्याविषयत्वमर्थः तेन चैत्र इव मैत्रो**

मुक्तावलीमयूखः ।

त्ययार्थः, । कालसंख्ये चोभयत्र प्रत्ययार्थः । तत्र देवदत्तादेरभेदेन एकत्वस्य च स्वरूपसम्बन्धेन प्रत्ययार्थे आश्रयेऽन्वयः तस्य कालस्य च वृत्तित्वसम्बन्धेन व्यापारे कर्मणश्च वृत्तित्वसम्बन्धेन फलेऽन्वयः । फलस्य च अनुकूलत्वसंबन्धेन व्यापारेऽन्वयः

एवं च देवदत्तस्तण्डुलं पचतीत्यत्र देवदत्ताभिन्नैकत्वावच्छिन्नाश्रयवृत्तिः तण्डुलनिष्ठविक्लित्त्यनुकूलो वर्तमानकालिको व्यापार इति बोधः, देवदत्तेन तण्डुलः पच्यते इत्यत्र देवदत्ताभिन्नकर्तृवृत्तिवर्तमानकालिकव्यापारजन्यतण्डुलाभिन्नैकत्वावच्छिन्नाश्रयवृत्तिविक्लित्तिरिति बोधः इति वैयाकरणाः ।

कर्तरि कर्मणि च लस्य शक्तिस्वीकारे कर्तृत्वं कृतिमत्त्वं तच्च कृतिः कर्मत्वं फलवत्त्वं तच्च फलमेव शक्यतावच्छेदकं कृतौ फले च शक्तिस्वीकारे शक्यतावच्छेदकलाघवमतो नैयायिकैः कृतौ कर्मणि च शक्तिरुपेयते इति । एतन्मते च देवदत्तस्तण्डुलं पचतीत्यत्र तण्डुलवृत्तिविक्लित्त्यनुकूलव्यापारानुकूलवर्तमानकालिककृतिमानेकत्वावच्छिन्नो देवदत्त इति बोधः, देवदत्तेन तण्डलः पच्यते इत्यत्र च देवदत्तवृत्तिकृतिजन्यव्यापारजन्यविक्लित्त्याश्रय एकत्वावच्छिन्नस्तण्डुल इति बोधः ।

**तत्र**–तृतीयायाम् ।

**तन्त्रत्वादिति** । प्रयोजकत्वादित्यर्थः । अयंभावः **अनभिहिते** इत्यस्य **कर्तृकरणयोस्तृतीयेत्येतदेकवाक्यतापन्नद्वयेकयोर्द्विवचनैकवचने** इति संख्यावाक्येनान्वयात् कर्तृगतैकत्वेऽनभिहिते तृतीयैकवचनम् एवं कर्मगतैकत्वेऽनभिहिते द्वितीयैकवचवचनमित्यर्थः **न तु** अनभिहिते कर्मणि कर्तरि वेत्यर्थः एवं च कर्तृसङ्ख्यानभिधानस्यैव तृतीयाप्रयोजकत्वमिति ।

**कर्मत्वाद्यनवरुद्धइति** । 'चैत्रः पचति तण्डुल' इत्यत्र कर्मत्वादिलाक्षणिकप्रथमान्तपदोपस्थाप्ये तण्डुलादौ संख्यान्वयवारणाय कर्मत्वाद्यनवरुद्ध इति दलम् ।

ननु चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवार्थसादृश्ये प्रतियोगितासम्बन्धेन सादृश्यस्य च अनुयोगितासम्बन्धेन मैत्रेऽन्वयात् 'संयोगानुकूलव्यापारानुकूलकृतिमान् चैत्रसदृशो मैत्र' इति बोधस्तत्र तिबर्थैकत्वस्य चैत्रेऽन्वयः चैत्रस्य कर्मत्वानवरुद्धत्वात्प्रथमान्तपदोपस्थाप्यत्वाच्च किं च पक्वमन्नं भुज्यते इत्यत्र पाककर्मत्वस्यान्नेऽन्वयेन प्रथमान्तपदोपस्थाप्यत्वेऽपि कर्मत्वावरुद्धत्वात् अन्ने संख्यानन्वयापत्तिरतः कर्मत्वाद्यनवरुद्ध इत्यस्यार्थमाह—**इतरविशेषणत्वतात्पर्याविषयत्वमिति** । चैत्र इव मैत्रो

न्यायसिद्धान्तमुक्तावली ।

गच्छतीत्यादौ न चैत्रे संख्यान्वयः । यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय प्रथमान्तेति ।

यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः । तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम् । स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम् । तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणमिति ।

एवं व्यापारेऽपि न शक्तिर्गौरवात् । रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा । जानातीत्यादौ आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा ।

उपमानाद्यथा शक्तिग्रहस्तथोक्तम् ।

मुक्तावलीमयूखः ।

गच्छतीत्यत्र चैत्रस्य इवार्थविशेषणत्वेन तात्पर्यविषयत्वान्न तत्र संख्यान्वयः पक्वमन्नं भुज्यते इत्यत्र अन्नस्य इतरविशेषणत्वेन तात्पर्यविषयत्वाभावात्संख्यान्वय इति भावः विशेषणत्वतात्पर्याविषयत्वमित्येव सिद्धे इतरपदं व्यर्थमिति ध्येयम् ।

ननु चैत्र एव पचतीत्यत्र 'चैत्रेतरावृत्तिपाककृतिमान् चैत्र' इति बोधात् चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वात् संख्यानन्वयापत्तिः किं च चैत्रश्चैत्रंपश्यतीत्यत्र चैत्रे संख्यानन्वयापत्तिः 'चैत्रवृत्तिचक्षुःसंयोगजन्यज्ञानाश्रयश्चैत्र' इति बोधे चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वादिति चेन्न—

इतरविशेषणत्वमात्रेण तात्पर्याविषयत्वमित्यर्थात् एवं च प्रकृते चैत्रे विशेष्यत्वस्यापि सत्त्वेन विशेषणत्वमुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात् विशेषणत्वमात्रेण तात्पर्याविषयत्वात्संख्यान्वये बाधकाभावात । एवं च तण्डुलं पचतीत्यादौ यत्र विशेषणत्वमुख्यविशेष्यत्वाभ्यां तण्डुलस्यैवान्वयो विवक्षितः तत्र तण्डुले संख्यान्वयवारणाय प्रथमान्तेति दलम् । किं च चैत्रेण सुप्यत इत्यत्र धात्वर्थस्यापि संख्यान्वयवारणाय प्रथमान्तेति दलम् ।

द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं वक्तुमन्यथा प्रथमदलार्थमाह यद्वेति ।

फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति मीमांसकैकदेशिमण्डनमतं खण्डयितुमाह—

एवं व्यापारेऽपीति ।

गौरवादिति । व्यापारसमूहरूपक्रियाया वाच्यत्वे गौरवं कृतित्वापेक्षयेति भावः।

नन्वाख्यातस्य यत्नार्थकत्वं न सम्भवति रथोगच्छतीत्यत्र व्यभिचारादत आह—

रथो गच्छतीति । व्यापारे लक्षणाङ्गीकारपक्षे 'संयोगानुकूलव्यापारवान् एकत्वावच्छिन्नो रथः' इति बोधः । यदि तु रथोगच्छतीत्यत्र गमनानुकूलव्यापारस्य न बोधः किन्तु गमनानुकूलाश्रयत्वस्यैवेति नवीनमतमाश्रित्य आश्रयत्वे लक्षणा तदा 'संयोगानुकूलव्यापाराश्रयतावान्' इति बोधः । कृते रथेऽन्वयानुपपत्तिरिह लक्षणा बीजम् ।

न्यायसिद्धान्तमुक्तावली ।

एवं कोशादपि शक्तिग्रहः । सति बाधके क्वचित्त्यज्यते । यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिः । नीलादिविशिष्टे तु लक्षणेति ।

एवमाप्तवाक्यादपि । यथा 'कोकिलः पिकपदवाच्य' इत्यादिशब्दात्पिकादिपदानां कोकिले शक्तिग्रहः ।

एवं व्यवहारादपि । यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति । ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति । इत्थं च भूतले नीलो घट इत्यादिवाक्यान्न शाब्दबोधः । घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात् कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात्तदभावान्न शाब्दबोध इति केचित् ।

तन्न प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात् । अत एव–चैत्र पुत्रस्ते जातः; कन्या ते गर्भिणी जाता–इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति । तथाच व्यभिचारात्कार्यान्विते न शक्तिः । न च तत्र तं पश्येत्यादि शब्दान्तरमध्याहार्यं, मानाभावात् । चैत्र ! पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च । इत्थञ्च लाघवादन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति ।

मुक्तावलीमयूखः ।

कोशेनेति । गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वतीति कोशेनोभयत्र शक्तिबोधनादिति भावः ।

नीलादावेव शक्तिरिति । नीले शक्तौ नीलत्वं शक्यतावच्छेदकमिति लाघवम्, नीलवति शक्तौ नीलवत्त्वं शक्यतावच्छेदकं तच्च नील एवेति गौरवमिति भावः ।

आवापोद्वापाभ्यामिति । आवापः कस्यचित्पदस्य प्रक्षेपः । उद्वापः कस्यचित्पदस्य निस्सारणम् ।

सुखःदुखे इति । देवदत्तः सुखी मुखप्रसादवत्त्वात्, देवदत्तो दुःखी मुखमालिन्यवत्त्वात्, इत्यनुमानम् ।

शाब्दबोधमिति । देवदत्तवृत्ति दुःखं सुखं वा शाब्दबोधजन्यं शाब्दबोधेतरकारणाजन्यत्वे सति कारणजन्यत्वादिति अनुमानाकारः ।

तद्धेतुतयेति । दुःखकारणीभूतः शाब्दबोधः प्रकृतवाक्यजन्यः अन्यथासिद्धयनिरूपकत्वे सति प्रकृतवाक्यानन्तरभावित्वादिति ।

न्यायसिद्धान्तमुक्तावली।

एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः कङ्गौ च म्लेच्छानाम्। तत्र हि-'यदान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति'

वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥

इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते, कङ्गौ तु शक्तिभ्रमात्प्रयोगो नानाशक्तिकल्पने गौरवात्। हर्यादिपदे तु विनिगमकाभावान्नानाशक्तिकल्पनम्।

एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम् यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटपदस्य कलशे शक्तिग्रहः। एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते।

एवं प्रसिद्धपदस्य सांनिध्यादपि शक्तिग्रहः। यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य कोकिले शक्तिग्रह इति।

तत्र जातावेव शक्तिर्न तु व्यक्तौ-व्यभिचारादानन्त्याच्च। व्यक्तिं विना जातिभानस्यासम्भवाद्व्यक्तेरपि भानमिति केचित्। तन्न शक्तिं

मुक्तावलीमयूखः।

यवमय इति। तदुक्तं न्यायमालाविस्तरे—

यवादिशब्दाः किंद्व्यर्था, नो वार्यम्लेच्छसाम्यतः।
दीर्घशूकप्रियंग्वाद्या, द्वयेऽप्यर्था विकल्पिताः॥
यत्रान्या इति शास्त्रस्था, प्रसिद्धिस्तु बलीयसी।
शास्त्रीयधर्मे तेनात्र, प्रियंग्वादि न गृह्यते॥

मीमांसकमतमाह—तत्र जाताविति। जातिविशिष्टव्यक्तौ शक्तिस्वीकारे 'नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छति' इति न्यायाज्जातौ शक्तिग्रहस्यावश्यकतया जातावेव शक्तिर्लाघवात् न तु जातिविशिष्टव्यक्तौ तदुक्तं 'विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे' इति तेषामभिप्रायः।

ननु व्यक्तावेव शक्तिरस्तु न जातावित्यत आह—न तु व्यक्ताविति। अयं भावः व्यक्तिशक्तिपक्षे एकस्यां व्यक्तौ शक्तिरस्ति सर्वासु वा नाद्यः अगृहीतशक्तिकव्यक्तावपि विषयता सम्बन्धेन शाब्दबोधरूपकार्यस्य सत्त्वेन शक्तिग्रहरूपकारणस्याभावेन व्यतिरेकव्यभिचारात न द्वितीयः व्यक्तिभेदेन शक्तिभेदात् शक्यानन्त्यप्रसङ्गादिति जातिशक्तिपक्षे तु न व्यभिचारो न वा शक्यानन्त्यमिति।

जातिभानस्यासम्भवादिति। कुतो न सम्भव इति चेदुच्यते व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे जातिविषयकशक्तिज्ञानस्य हेतुता तेन जातिभानासम्भव इति।

न्यायसिद्धान्तमुक्तावली।

विना व्यक्तिभानानुपपत्तेः। न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात्। न च व्यक्तिशक्तावानन्त्यम्, सकलव्यक्त्यावेकस्या एव शक्तेः स्वीकारात्। न चाननुगमः, गोत्वादेरेवानुगमकत्वात्। किञ्च गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शब्दबोधं प्रति च हेतुत्वात्। किञ्च गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं

मुक्तावलीमयूखः।

व्यक्तिभानानुपपत्तेरिति। वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दबोधे हेतुतया व्यक्तौ शक्तिं विना व्यक्तेर्भानं न स्यादिति भावः। लक्षणेति तावतैव वृत्तिप्रयोज्यपदार्थोपस्थितेः सत्त्वेन व्यक्तिबोधसम्भवादिति भावः।

अनुपपत्तिप्रतिसंधानमिति। गामानयेत्यादौ गोत्वे आनयनान्वयानुपपत्त्या गोपदस्य गोव्यक्तौ लक्षणासम्भवेऽपि गौरस्तीत्यत्र गोत्वेऽस्तित्वान्वयेऽनुपपत्त्यभावेन अन्वयानुपपत्तिरूपलक्षणावीजस्यासत्त्वेन न लक्षणासम्भव इति भावः मीमांसका हि अन्वयानुपपत्तिमेव लक्षणावीजं वदन्ति न तात्पर्यानुपपत्तिं तन्मते वेदस्यापौरुषयतया इच्छारूपतात्पर्यस्याभावेन 'आदित्यो यूप' इत्यत्र तात्पर्यानुपपत्त्यभावेन लक्षणाभावप्रसङ्गात्।

व्यक्तौ शक्तिरिति। गौः शक्येति विशिष्टज्ञानं प्रमात्मकमेव तव [प्रभाकरस्य] मतेऽन्यथाख्यात्यभावात् प्रमायाश्च वस्तुसाधकत्वादिति भावः।

ननु शक्तिं विनापि व्यक्तिभानं भविष्यति सर्वत्र पदजन्यपदार्थोपस्थितेः हेतुत्वे मानाभावात् कथमन्यथा शाब्दबोधे संसर्गभानम्। न चैवं पदानुपस्थितघटादेरपि शाब्दबोधे भानापत्तिरिति वाच्यम्। गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वस्याङ्गीकारेणादोषादित्यपरितोषादाह किञ्चेति।

समानप्रकारकत्वेनेति। गोत्वप्रकारकपदार्थस्मरणं, गोत्वप्रकारकशाब्दबोधं, च प्रति गोत्वप्रकारकशक्तिज्ञानस्य हेतुत्वादिति भावः।

अत एवापूर्ववादेऽपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह इत्याशङ्क्य कार्यत्वेन घटादिषु शक्तिग्रहात् कार्यतया शाब्दबोधेऽपूर्वभानमित्युक्तम्।

ननु कार्यत्वाद्युपाधिप्रकारशाब्दबोधस्थले समानप्रकारकशक्तिज्ञानस्य हेतुत्वेऽपि जातिप्रकारकशाब्दबोधस्थले समानप्रकारकशक्तिज्ञानस्य न हेतुतेति नायं दोष इत्यरुचेराह किं चेति।

तच्छब्दस्य वक्तृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने शक्तिः।

ननु तत्पदे घटत्वादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः न

न्यायसिद्धान्तमुक्तावली ।

वाच्यम्, गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्, तथाच गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात्तवैव गौरवम् । तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति ।

शक्तं पदम्, तच्चतुर्विधम्-क्वचिद्यौगिकं, क्वचिद्रूढं, क्वचिद्योगरूढं, क्वचिद्यौगिकरूढम्, तथाहि—

यत्रावयवार्थ एव बुध्यते तद्यौगिकम्, यथा पाचकादिपदम् ।

यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्, यथा गोमण्डलादिपदम् ।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्, यथा-पङ्कजादिपदम् । तथाहि—पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति । न च केवलयाऽवयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्, रूढिज्ञानस्य केवल-

मुक्तावलीमयूखः ।

च शक्यतावच्छेदकानां भिन्नत्वेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्यैक्याच्च शक्तिभेद इति वाच्यम् तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तद्भानापत्तेरिति चेन्न— बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतानवच्छेदकत्वात् उपलक्षणस्य शाब्दबोधे भानानङ्गीकारात् ।

विशेषणत्वं च तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वम् ।

उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वमिति ।

इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदोरूपम् ।<br>अदसस्तुविप्रकृष्टं तदिति परोक्षे विजानीयात ॥

इत्यभियुक्तोक्तेः—

इदमः प्रत्यक्षबुद्धिविषये शक्तिः ।<br>एतदः समीपतरप्रत्यक्षबुद्धिविषये शक्तिः ।<br>अदसः विप्रकृष्टप्रत्यक्षविषये शक्तिः ।<br>तदः परोक्षबुद्धिविषये शक्तिः ।<br>किंपदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः ।

सर्वपदस्य व्यापकत्वविशिष्टे शक्तिः 'सर्वे घटा रूपवन्तः' इत्यत्र घटत्वव्यापकं रूपवत्त्वमिति बोधात् ।

क्वचिदिति । किंचिदित्यर्थः एवमग्रेऽपि ।

पद्मं बोधयतीति । पङ्कजनिकर्त्रभिन्नं पद्ममिति बोधः ।

न्यायसिद्धान्तमुक्तावली ।

यौगिकार्थज्ञाने प्रतिबन्धकत्वादिति प्राञ्चः ।

वस्तुतस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति-सान्निध्यात् ।

यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः। यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मत्वस्य च बाधस्तत्राव-यवशक्तिमात्रेण निर्वाह इत्यप्याहुः ।

यत्र तु स्थलपद्मादावयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रू-पेण बोधः । यदि तु स्थलपङ्कजं विजायतीयमेव तदा लक्षणयैवेति ।

यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् यथो-द्भिदादिपदम् । तत्र हि उद्भेदनकर्ता तरुगुल्मादिरपि बुध्यते यागविशे-षोऽपीति ॥ ८१ ॥

लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः ।

लक्षणेति । गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षण-या तीरस्य बोध इति ।

सा च शक्यसम्बन्धरूपा । तथाहि—प्रवाहरूपशक्यार्थसम्बन्धस्य

मुक्तावलीमयूखः ।

प्रतिबन्धकत्वादिति । न च रूढिज्ञानस्य यौगिकार्थबुद्धिं प्रति प्रतिबन्धकत्वे पङ्कजशब्दात्पद्ममित्येव बोधः स्यान्न तु पङ्कजनिकर्त्रभिन्नं पद्ममिति वाच्यम् । पद्मत्वा वच्छिन्नविशेष्यत्वानिरूपितपङ्कजनिकर्तृत्वावच्छिन्नविषयताकशाब्दबुद्धित्वावच्छिन्नं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मविशेष्यकयौगिकार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रा-न्तत्वेनादोषात् तदेतदाह--केवलयौगिकार्थज्ञाने इति । एवं प्रतिबध्यप्रतिब न्धकभावस्वीकारे विरोधिविषयकज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविघटकत्वेनैवेति नियमभङ्गरूपोऽस्वरसः प्राञ्च इत्यनेन सूचितः ।

मणिकारमतमाह वस्तुतस्त्विति ।

स्वातन्त्र्येणेति । विशेष्यविशेषणभावानवगाहित्वेनेत्यर्थः ।

लक्षणयैवेति । रूढ्यर्थतावच्छेदकपद्मत्वजातेस्तत्राभानेन रूढ्या तद्बोधना-सम्भवादिति भावः ।

शक्तिमात्रेणेति । मात्रपदेन लक्षणानादरः सूचितः ।

यागविशेषोऽपीति । 'उद्भिदा यजेत पशुकाम' इत्यत्र उद्भिच्छब्दो यागवि-शेषनामधेयम् तथाच न्यायमाला—

गुणोऽयं नामधेयं वा, खनित्रेऽस्य निरुक्तितः ।

न्यायसिद्धान्तमुक्तावली ।

तीरे गृहीतत्वात्तीरस्य स्मरणम् । ततः शाब्दबोधः ।

परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्–यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभावात् । तेन यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा ।

एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा–सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात् ।

एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा । इयमेवाजहत्स्वार्था लक्षणेत्युच्यते । एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात् ।

यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा क्वचिद्गङ्गापदस्य तीरे, क्वचिद्घोषपदस्य मत्स्यादौ, लक्षणेति नियमो न स्यात् ।

इदन्तु बोध्यम् । शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः । यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम् । अत एव लक्ष्यतावच्छेदके न लक्षणा–तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः । परन्तु एवं क्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्, तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम् ।

यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते । यथा द्विरेफादिपदात् रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते इति तत्र लक्षितलक्षणा ।

किन्तु लाक्षणिकं पदं नानुभावकम् । लाक्षणिकार्थस्य शाब्दबोधे

मुक्तावलीमयूखः ।

ज्योतिष्टोमं समाश्रित्य, पश्वर्थं गुणचोदना ॥
फलोद्भेदात्समानैषा, निरुक्तिर्यागनाम्न्यपि ।
नामत्वमुचितं याग, सामानाधिकरण्यतः ॥ इति ॥ ८१ ॥

प्रतिसन्धीयते इति । प्रतिसंधानं–स्मरणम् ।

छत्रिपदस्येति इदं वाक्यलक्षणावादिमताभिप्रायेण । न्यायमते तु छत्रपदस्यैकसार्थवाहित्वे लक्षणा प्रत्ययार्थश्च संबन्धी एकसार्थवन्तो गच्छन्तीत्यन्वयः एकसार्थवाहित्वमेकसार्थ एव नत्वेकसार्थगतत्वं निराकाङ्क्षतया यान्तीत्यस्यानन्वयापत्तेः ।

एकसार्थवाहित्वे–एकसार्थवाहित्वविशिष्टे ।

परम्परासम्बन्धरूपा—स्ववाच्यरेफद्वयघटितपदवाच्यत्वरूपा ।

न्यायसिद्धान्तमुक्तावली ।

तु पदान्तरं कारणम्-शक्तिलक्षणान्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात् ।

वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणापि नास्ति । यत्र गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा । गभीरपदार्थस्य नद्या सहाभेदेनान्वयः-क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात् ।

यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यग्राहकम् ।

बहुव्रीहावप्येवम् । तत्र हि चित्रगुपदादौ यदैकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोस्वामिनि लक्षणा गवि चित्राभेदान्वयः यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम् । एवमारूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरारोहणकर्मणि लक्षणा, आरूढपदं तात्पर्यग्राहकम् । एवमन्यत्रापि बोध्यम् ।

तत्पुरुषे तु पूर्वपदे लक्षणा । तथाहि—राजपुरुष इत्यादौ राजपदार्थेन पुरुषपदार्थस्य साक्षान्नान्वयो-निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् अन्यथा राजा पुरुष इत्यत्रापि तथान्वयबोधः स्या-

मुक्तावलीमयूखः ।

ननु तच्छाब्दबोधे तच्छक्तपदज्ञानत्वेन हेतुत्वाल्लाक्षणिकाच्छब्दाच्छाब्दबोधः कथमित्याह—किन्त्विति । पदान्तरं-समभिव्याहृतं शक्तं पदमित्यर्थः ।

सामर्थ्यावधारणादिति । 'कुमतिः पशुः' इति सर्वलाक्षणिकस्थलेशाब्दबोधस्यानुभवसिद्धतया लाक्षणिकार्थस्याप्यानुभाविकत्वम् अत्र हि मतिशब्दस्य कुत्सितमतिमति लक्षणा कुपदं तात्पर्यग्राहकं पशुशब्दस्य च पशुसदृशे लक्षणेति सर्वलाक्षणिकत्वं बोध्यमिति नवीनाः ।

नास्तीति । ननु 'गभीरायां नद्यां घोष' इत्यत्र नदीपदस्य नदीतीरे लक्षणायां गभीरपदार्थस्यैकदेशान्वयापत्तिरतो वाक्यलक्षणाङ्गीकर्तव्येति शङ्कां समाधत्ते--यत्र गभीरायामिति ।

क्वचिदिति । चैत्रस्य गुरुरित्यादौ षष्ठ्यर्थनिरूपितत्वस्य स्वरूपेण गुरुत्वेऽन्वयेन चैत्रनिरूपितं यद् गुरुत्वं तदाश्रयस्य कुलमित्यर्थेनैकदेशान्वयस्य दर्शनादिति ।

तात्पर्यग्राहकमिति । अत्र मीमांसकाः, वाक्यलक्षणयैव कार्यनिर्वाहे गभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तम् न च वाक्ये शक्तेरभावात् शक्यसम्बन्धरूपलक्षणा न सम्भवतीति वाच्यम् । स्वबोध्यसबन्धस्यैव लक्षणापदार्थत्वेनादोषात् एवं च गभीरायां नद्यामिति वाक्यबोध्या गभीराभिन्ना नदी तत्सबन्धस्तीरे इति तीरबोधोपपत्तिरित्याहुः ।

तत्र स्वबोध्यसम्बन्धो लक्षणेत्यत्र स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं

न्यायसिद्धान्तमुक्तावली।

त्। घटः पटो न इत्यादौ घटपटाभ्यां नञः साक्षादेवान्वयान्निपातातिरिक्तेति। नीलो घट इत्यादौ नामार्थयोरभेदसम्बन्धेनान्वयाद् भेदेनेति। न च राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम्, अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्माद्राजपदादौ राजसम्बन्धिनि लक्षणा, तस्य च पुरुषेण सहाभेदान्वयः।

द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते, तत्र न लक्षणा। न च साहित्ये लक्षणेति वाच्यम्, साहित्यशून्ययोरपि द्वन्द्वदर्शनात्। न चैकक्रियान्वयित्वरूपं साहित्यमस्तीति वाच्यम् क्रियाभेदेऽपि धवखदिरौ पश्य छिन्धीत्यादिदर्शनात्, साहित्यस्याननुभवाच्च।

मुक्तावलीमयूखः।

तदा गङ्गायां घोष इत्यत्र लक्षणानुपपत्तिः तत्र गङ्गापदेन प्रवाहविषयकशाब्दबोधाजननेन प्रवाहस्य गङ्गापदबोध्यत्वाभावात् किन्तु शक्त्या स्वजन्यज्ञानविषयत्वं वाच्यम् एवं च वाक्ये न लक्षणासम्भवः शक्त्यभावात्।

न च स्वजन्यज्ञानविषयत्वमात्रं स्वबोध्यत्वमस्तु शक्त्येति व्यर्थं ततश्च न दोष इति वाच्यं समवायेन घटपदस्मारितस्याकाशस्यापि स्वबोध्यत्वापत्तौ तत्सम्बन्धज्ञानेन घटपदेन पटादेर्बोधप्रसङ्गादित्यलम्।

पुरुषेण सहाभेदान्वय इति। अन्ये तु राजपुरुष इति तत्पुरुषे न लक्षणा किन्तु राज्ञ एव स्वत्वसम्बन्धेन पुरुषेऽन्वयो व्युत्पत्तिवैचित्र्यात् अत एव 'दशैते राजमातङ्गा तस्यैवामीतुरङ्गमा' इत्यत्र यच्छब्देन राज्ञः परामर्शः राजसम्बन्धिनि राजपदस्य लक्षणायां तु राज्ञः पदार्थैकदेशत्वात्तदा परामर्शो न स्यादिति वदन्ति।

आकाशघटगतद्वित्वस्याकाशेऽपि सत्त्वदाकाशावित्यस्य प्रामाण्यापत्तिरतः उद्देश्यतावच्छेदकव्याप्यसंख्याबोधकत्वं सुपामिति नियम आस्थीयते एवं च धवखदिरावित्यत्र यदि धवत्वं खदिरत्वं च प्रत्येकमुद्देश्यतावच्छेदकं स्यात् तदा धवद्वयस्य खदिरद्वयस्य च बोधापत्तिरिति धवखदिरपदस्य धवखदिरसाहित्याश्रये लक्षणा स्वीक्रियते एवं च उद्देश्यतावच्छेदकीभूतसाहित्यव्याप्यत्वं न धवगतद्वित्वस्य नापि खदिरगतद्वित्वस्य किन्तु धवखदिरगतद्वित्वस्यैवेति न धवद्वयादेर्बोध इति मीमांसकाः। तन्मतेनाशङ्कते—**न च साहित्ये इति**। साहित्याश्रये इत्यर्थः सहवृत्तित्वरूपं साहित्यमेकक्रियान्वयित्वरूपं वा लक्ष्यमिति विकल्प्याद्यं दूषयति **साहित्यशून्येति**। सहवृत्तित्वशून्ययोर्घटत्वपटत्वयोरित्यर्थः। द्वितीयं दूषयति **नचैकेति**। **अननुभवाच्चेति**। वस्तुगत्या एकक्रियान्वयित्वरूपस्य धवखदिरयोः सत्त्वेऽप्येकक्रियान्वयित्वस्य शाब्दबोधे भानाभावादित्यर्थः।

न्यायसिद्धान्तमुक्तावली ।

अत एव, 'राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इत्यत्र लक्षणाभावाद् द्वन्द्व आश्रीयते । तस्मात्साहित्यं नार्थः, किन्तु वास्तवो भेदो यत्र तत्र द्वन्द्वः । न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम्, तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा । अभेद इत्यस्य चाश्रयाभेद इत्यर्थात् ।

मुक्तावलीमयूखः ।

यजेयातामिति । तथा च न्यायमालायाम्—

सायुज्यकामौ यजतोऽनेन राजपुरोहितौ ।
राज्ञः पुरोहितौ राज्ञोऽन्तौ वा राजात्मकावुभौ ॥
द्वयोर्द्वन्द्वसमासोवा तुल्यत्वायाग्रिमौ द्वयोः ।
सिद्ध्यै द्वितीयो राजोक्तिसार्थत्वाय तृतीयकः ॥
अध्याहृत्यै चतुर्थः स्याद्वचनाद्भिन्नकल्पता ।
तनूनपान्नराशंसौ विकल्प्येते समत्वतः ॥ इति ।

ननु यदि द्वन्द्वे न लक्षणा तर्हि कर्मधारयाद् द्वन्द्वस्य भेदो न स्यादत आह किन्त्विति । चार्थे द्वन्द्व इति हि पाणिनीयं सूत्रं तत्र चार्थाः समुच्चयान्वाचयेतरेतरयोगसमाहारभेदाच्चत्वारः । तत्र इतरेतरयोग इत्यस्य इतरस्येतरस्मिन् योगः सम्बन्धः इतरेतरयोगः इति भेदे द्वन्द्व इति लभ्यते तत्र पदभेदे, पदार्थभेदे, पदार्थतावच्छेदकभेदे, वा द्वन्द्वः नाद्यतृतीयौ नीलोत्पलमित्यत्र पदभेदस्य पदार्थतावच्छेदकभेदस्य च सत्त्वेन द्वन्द्वप्रसङ्गात् परिशेषात् पदार्थभेदे द्वन्द्व इति लभ्यते ।

नन्वेवं नीलघटयोरभेद इति व्यवहारासंगतिः पदार्थभेदाभावादत आह तत्रेति— तथा च नीलत्वघटत्वयोराश्रयाभेद इत्यर्थ इति न दोषः ।

वस्तुतस्तु पदार्थतावच्छेदकभेद एव द्वन्द्वः नीलोत्पलमित्यत्र तु सहविवक्षाभावात् कर्मधारयेण बाधाद्वा न द्वन्द्वः कर्मधारयेण द्वन्द्वस्य बाधसिद्ध्यर्थमेवाकडारादेका संज्ञेति सूत्रे आचार्यादेकासंज्ञेति न्यासो भाष्यकृता कृतः स्पष्टं चेदं लघुमञ्जूषायां प्रथमाकारके इति । एवं च नीलघटयोरभेद इति स्वरसत उपपद्यते । न चैवं घटा इत्यत्र द्वन्द्वाप्राप्त्या 'उत्सर्गसमानदेशा अपवादा' इतिन्यायेन द्वन्द्वापवाद एकशेषो न स्यादिति वाच्यम् । सरूपसूत्रस्य हरी इत्यत्र चारितार्थ्येन घटा इत्यत्रैकशेषाभावेऽपि क्षत्यभावात् घटपदेनैव अर्थतन्त्रमाश्रित्य नानाघटोपस्थितिसम्भवात न च सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्तिविरोध इति वाच्यम् । अर्थः वृत्तिजन्योपस्थितिविषयः । तत्र वृत्तौ सकृदित्यस्यान्वयेन सकृदुच्चरितः शब्दः एकवृत्तिजन्योपस्थितिविषयं बोधयतीत्यर्थात् एकशक्त्या नानाघटोपस्थितौ बाधकाभावादिति ध्येयम् ।

न्यायसिद्धान्तमुक्तावली ।

समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते, तदाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा, पूर्वपदं तु तात्पर्यग्राहकम् । न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयस्तस्यापेक्षाबुद्धिविशेषरूपस्य वदनासम्भवादिति वाच्यम्, परम्परासम्बन्धेन तदन्वयात् । एवं पञ्चमूलीत्यादावपि ।

परे तु अहिनकुलमित्यादौ अहिर्नकुलश्च बुध्यते प्रत्येकमेकत्वान्वयः । समाहारसंज्ञा च यत्रैकत्वं नपुंसकत्वं च 'द्वन्द्वश्च प्राणितूर्य' इत्यादिसूत्रेणोक्तं तत्रैव, अन्यत्रैकवचनमसाध्वित्याहुः ।

पितरौ श्वशुरावित्यादौ पितृपदे जनकदम्पत्योः, श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा । एवमन्यत्रापि । घटा इत्यादौ न लक्षणा–घटत्वेन रूपेण नानाघटोपस्थितिसम्भवात् ।

कर्मधारयस्थले तु, नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थ उत्पलपदार्थे प्रकारः । तत्र च न लक्षणा ।

अत एव 'निषादस्थपतिं याजयेत्' इत्यत्र न तत्पुरुषो लक्षणापत्तेः,

मुक्तावलीमयूखः ।

अहिनकुलमित्यत्र अहिनकुलमात्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा न वा शक्तिरित्यभिप्रायेणोक्तं यदीति ।

परम्परासम्बन्धेनेति । स्वाश्रयवृत्तित्वरूपेणेत्यर्थः स्वं समाहारः ।

निषादस्थपतिं याजयेत इति । तथा च न्यायमालाविस्तरे माधवः—

द्विजः स्थपतिरन्यो वा, द्विजः षष्ठीसमासतः ।

कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत् ॥

अयमाशयः वास्तुमयं रौद्रं चरुं निर्वपेत् इति प्रकृत्य श्रूयते एतया निषादस्थपतिं याजयेदिति तत्र रौद्रेष्टौ यागकर्तृत्वं निषादस्य स्थपतिरिति विग्रहेण कस्य चित् त्रैवर्णिकस्य, निषादश्चासौ स्थपतिश्चेति विग्रहेण संकरजात्यवच्छिन्नस्य वेति संकरजातिविशेषावच्छिन्नस्य शूद्रतया वेदानधिकारात् षष्ठीतत्पुरुषस्यैवौचित्येन त्रैवर्णिकस्यैवेति पूर्वपक्षे पूर्वपदस्य निषादसंबन्धिनि लक्षणायां गौरवात् लाघवात् कर्मधारयस्यौचित्येन संकरजातिविशेषावच्छिन्न एव कर्तेति सिद्धान्तः ततश्च श्रुतिबलात् तात्कालिकाचार्योपदेशादिना विद्यां संपाद्य धनिको निषादो रौद्रयागं कुर्यादिति तात्पर्यम् ।

ननु ।

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।

याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ।

न्यायसिद्धान्तमुक्तावली।

किन्तु कर्मधारयो लक्षणाभावात्। न च निषादस्य सङ्करजातिविशेषस्य वेदानधिकाराद्याजनासम्भव इति वाच्यम्, निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनीयत्वात्। लाघवेन मुख्यार्थस्यान्वये तदनुपपत्त्या तत्कल्पनायाःफलमुखगौरवतयाऽदोषत्वादिति।

उपकुम्भमर्धपिप्पलीत्यादौ परपदे तत्सम्बन्धिनि लक्षणा, पूर्वपदार्थप्रधानतया चान्वयबोध इति। इत्थञ्च समासे न क्वापि शक्तिः—पदशक्त्यैव निर्वाहादिति॥

**आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते॥ ८२॥**

**कारणं, संनिधानं तु पदस्यासत्तिरुच्यते।**

आसत्तिरिति। आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे कारणम्। तत्रासत्तिपदार्थमाह—संनिधानं त्विति। अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः तज्ज्ञानं शाब्दबोधे कार-

मुक्तावलीमयूखः।

इति स्मृत्या याजनस्य ब्राह्मणजीविकात्वेन परिगणनात्तत्र रागत एव प्रवृत्तिसंभवाच्छुत्या याजनस्य विधानमनुपपन्नमिति चेन्न याजयेदित्यस्य यजेदित्यत्रैव तात्पर्येणादोषात् शूद्रस्य अज्ञतया यागे प्रवृत्त्यसंभवात् ब्राह्मणस्य प्रवर्तकतया याजयेदित्युक्तेरिति सर्वं समञ्जसम्।

तत्पुरुषइति। षष्ठीतत्पुरुष इत्यर्थः यथाश्रुतं तु नयुक्तम्। कर्मधारयस्यापि तत्पुरुषत्वादिति।

लक्षणापत्तेरिति। ननु लक्षणाकल्पनं न दोषः निषादानां स्थपतिरिति षष्ठीसमासे निषादसंबन्ध्यभिन्नस्थपतिविषयकबोधाय लौकिकवाक्ये लक्षणयाः कृतत्वात्। तदनुरोधेन न तादृशशाब्दबोधे लक्षणाज्ञानहेतुत्वकल्पनप्रयुक्तं गौरवमपीति चेन्न—

वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं लक्षणाज्ञानव्यक्तिकल्पनागौरवस्यैव दोषत्वमित्याशयात् न च वैदिकवाक्यजन्यशाब्दबोधात्पूर्वं शक्तिज्ञानव्यक्तिकल्पनं तव, मम च लक्षणाज्ञानव्यक्तिकल्पनमिति किं गौरवमिति वाच्यम्। शक्यसंबन्धरूपलक्षणाज्ञानव्यक्ति कल्पयतस्तव शक्तिज्ञानव्यक्तिकल्पनाया आवश्यकत्वात्। मम शक्तिज्ञानमात्रस्यैव कल्पनेन लाघवादित्यलम्।

आसत्तिज्ञानमिति। अयं भावः। 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यत्र गिरिपदाग्निमत्पदयोरव्यवधानभ्रमेण शाब्दबोधदर्शनात् स्वरूपसत्त्या आसत्तेर्न शाब्दबोधे कारणत्वं किन्तु आसत्तिज्ञानस्यैवेति।

ननु आसत्तिर्योग्यतेति मूलकारिकापाठात् आसत्तिरित्यस्य समसाघटकत्वेन तस्य ज्ञानपदेनान्वयासंभवादासत्तिज्ञानमित्यर्थकरणमयुक्तमिति चेद्

न्यायसिद्धान्तमुक्तावली।

णम्, क्वचिद्व्यवहितेऽप्यव्यवधानभ्रमाच्छाब्दबोधादिति केचित्।

वस्तुतस्तु अव्यवधानज्ञानस्यानपेक्षितत्वात् यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्। तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ न शाब्दबोधः। नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दबोधः। आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः।

ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्याद्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेन तदुत्तरपदस्मरणासंभव इति चेद्—

न प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तेः। नानासंनिकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात्। कथमन्यथा नानावर्णैरेकपदस्मरणम्।

मुक्तावलीमयूखः।

न आसत्तियोग्यतेतिनिर्विभक्तिपाठस्यैव सांप्रदायिकत्वात् आसत्तिरितिप्रथमान्तपाठे तु आसत्तिपदमासत्तिज्ञाने लाक्षणिकमिति ध्येयम्।

केचिदित्यन्तेनोक्तं मतं दूषयति—वस्तुतस्त्विति।

ननु 'नीलो घटो द्रव्यं पटः' इत्यत्र नीलपदार्थपटपदार्थयोर्यत्रान्वयो वक्तुस्तात्पर्यविषयस्तत्र नीलपदघटपदयोरासत्तिर्न स्यात् तत्तत्पदार्थान्वयस्य तात्पर्यविषयत्वाभावादतस्तत्रेष्टापत्तिमाह—नीलो घट इत्यादिना।

तर्हि तत्र नीलो घट इति कथं शाब्दबोध इत्याह—भ्रमाच्छाब्दबोधः इति तथा च भ्रमाच्छाब्दबोधमात्रं न तु तत्रासत्तिरिति तत्त्वम्।

ननु तत्र यद्यासत्तिभ्रमस्तदा शाब्दबोधः भ्रमात्मकः स्यान्न चेष्टापत्तिः घटे नीलस्य सत्त्वेन विषयबाधाभावात् आसत्तिभ्रमाच्छाब्दप्रमाङ्गीकारे चासत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनमतविरोध इत्यत आह आसत्तिभ्रमादिति। आसत्तिभ्रमस्य न शाब्दभ्रमजनकत्वं,प्राचीनगाथा तु निर्युक्तिकत्वादश्रद्धेयैवेति भावः।

नन्वव्यवधानेन पदोपस्थितिः शाब्दबोधे कारणमित्ययुक्तम् अनेकपदघटितवाक्यस्थलेऽव्यवधानेन पदोपस्थित्यभावादित्याशङ्कते नन्विति।

नानासन्निकर्षैरिति। यथा घटचक्षुः संयोगस्य पटप्रत्यक्षे कारणत्वाभावेऽपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्यामेकं घटपटाविति समूहालम्बनात्मकं प्रत्यक्षं तथा तत्पदगोचरसंस्कारस्य भिन्नविषयकत्वांशेऽजनकत्वेऽपि तत्तत्संस्कारजन्यं एकमेव स्मरणं जायते बाधकाभावादिति भावः।

अन्यथेति। नानासंस्काराणामेकस्मरणजनकत्वाभावे इत्यर्थः।

न्यायसिद्धान्तमुक्तावली ।

परन्तु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायेन तावत्पदार्थानां क्रियाकर्मभावेनान्वयरूपः शाब्दबोधो भवतीति केचित्--

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति ॥

परेतु—

यद्यदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

तथाच खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः ।

एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः । तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति ।

मुक्तावलीमयूखः ।

नन्वाशुभङ्गुराणां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि मेलनं न संभवति अतः सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिःसमूहालम्बनात्मिकैव कारणम् । एवं चैकदैव सकलपदार्थानां विशेष्ये विशेषणमिति रीत्यैव शाब्दबोधः न तु विशिष्टस्य वैशिष्ट्यमिति रीत्या, विशिष्टबुद्धिजनकस्य विशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावादिति प्राचीनमतं दर्शयति परं त्विति ।

एकदैवेति । न तु घटमानयेत्यादौ प्रथमं घटीया कर्मता इत्येवं बोधस्तदनन्तरं च घटकर्मकमानयनमिति बोध इत्यादि क्रमेणेत्यर्थः ।

वृद्धा युवान इत्यस्य तदाहुरित्यादिः । अत्र वृद्धयुवशिशुभिः कपोतैश्चिरतरचिरसन्निहितकालोक्तानां पदार्थानां सादृश्यं बोध्यम् ।

यद्यदिति । घटादिपदार्थाकाङ्क्षितं घटपदोपस्थितिजन्य 'किंघटीयम्' इति जिज्ञासाविषयीभूतं योग्यं योग्यताज्ञानाधीनं कर्मत्वादि यद्यत् सन्निधानं प्रतिपद्यते स्वार्थोपस्थितिविषयो भवति तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते इत्यर्थः तथाच आनयनार्थरूपोपस्थितेः प्रथममेव 'घटम्' इतिवाक्याद्घटीयं कर्मत्वमिति बोधो भवति तदनन्तरं च घटकर्मकमायनमिति महावाक्यार्थ बोधः । एवं च पूर्वोक्तसमूहालम्बनात्मकं पदार्थज्ञानं विनापि निर्वाह इति भावः ।

केचित्तु वृत्त्या पदजन्यपदार्थोपस्थितिरेवासत्तिः सा च स्वरूपसती हेतुः नत्वेतादृशासत्तेः शाब्दबोधं प्रति कारणत्वे किं मानमिति वाच्यम् आनयेति वाक्यं श्रुतवतः प्रत्यक्षेण घटं पश्यतोऽपि पुंसः घटकर्मकानयनबोधापत्तेः । नचैवं 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यत्र अन्वयबोधापत्तिरिति वाच्यम् सति तात्पर्यग्रहे इष्टापत्तेः ।

नन्वेवं श्लोकेषु अन्वयप्रदर्शनानर्थक्यमिति चेन्न तात्पर्यज्ञानार्थं तदुपयोगात् वृत्त्या पदजन्यपदार्थोपस्थितिश्च स्मृतिरूपा न तु शाब्दबुद्धिरूपा तथा सति शाब्दबोधरूपाया आसत्तेः शाब्दबुद्धिं प्रति कारणत्वेऽन्योन्याश्रयप्रसङ्गात् एतेन मौनिश्लोकादौ पदाभावेन पदाव्यवधानरूपासत्त्यभवेऽपि न क्षतिरित्याहुः ।

न्यायसिद्धान्तमुक्तावली ।

इदन्तु बोध्यम् । यत्र द्वारमित्युक्तं तत्र पिधेहीत्यादि पदस्य ज्ञानादेव बोधो, न तु पिधानादिरूपार्थज्ञानात्—पदजन्यतत्तत्पदार्थोपस्थितेस्तत्तच्छाब्दबोधे हेतुत्वात् । किञ्च क्रियाकर्मपदानां तेन तेनैव रूपेणाकाङ्क्षितत्वात्, तेन क्रियापदं विना कथं शाब्दबोधः स्यात् । तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः ॥

योग्यतां निर्वक्ति—

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥ ८३ ॥

पदार्थे इत्यादिना । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः ।

नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक्सर्वत्र न सम्भवति-वाक्यार्थस्यापूर्वत्वादिति चेद्

न—तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात् ।

नव्यास्तु योग्यताज्ञानं न शाब्दबोधकारणम् । किन्तु वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् । योग्य-

मुक्तावलीमयूख ।

घट इति समुदायो न वाचकः उत्पन्नानामभिव्यक्तानां वा वर्णानां समुदायस्यैकदा प्रत्यक्षासंभवात् नापि प्रत्येकं वर्णा वाचकाः द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेरतः पूर्वपूर्ववर्णानुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवजन्यसंस्कारेणाभिव्यक्तः स्फोट एव वाचक इति वैयाकरणास्तन्मतं निरस्यति एतेनेति । पूर्वपूर्ववर्णानुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवजन्यसंस्कारेण क्रमिकवर्णविशिष्टपदस्मरणेनैव घटार्थबोधोपपत्तौ स्फोटाङ्गीकारो वृथेति भावः ।

लाघवेन पदजन्यपदार्थोपस्थितिर्न शाब्दबोधे कारणं किन्तु पदार्थोपस्थितिरेव अत एव पिधेहीत्यत्र न पदाध्याहारः किन्तु अर्थाध्याहार एवेति प्रभाकरमतं दूषयति इदन्तु बोध्यमित्यादिना । पदार्थोपस्थितिमात्रस्यहेतुत्वे प्रत्यक्षोपस्थितघटादेरपि शाब्दबोधे भानापत्तिरिति भावः ।

*ननु तात्पर्याभावादेव न प्रत्यक्षोपस्थितघटादेर्बोधे भानं तात्पर्यसत्त्वेत्विष्टापत्तिरत आह किञ्चेति ।*

*अपूर्वत्वादिति । सर्वत्र शाब्दबोधात्पूर्वमनिश्चितत्वादित्यर्थः ।*

'शङ्खो न पीत' इति निश्चयसत्त्वेऽपि पित्तादिदोषवशात् 'पीतः शङ्ख' इति प्रत्यक्षं जायते इत्याह—लौकिसंनिकर्षाजन्येति । शुक्तौ 'नेदं रजतम्' इति ज्ञानसत्त्वेऽपि मण्डूकवसाञ्जनादिदोषेण 'इदं रजतम्' इति भ्रमस्योदयादाह—दोषविशेषेति ।

ननु यत्र न योग्यताज्ञानं तत्र शाब्दबोधापत्तिरित्यत आह योग्यताज्ञानेति ।

न्यायसिद्धान्तमुक्तावली ।

तज्ज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इति वदन्ति ॥८२॥८३॥

आकाङ्क्षां निर्वक्ति—

यत्पदेन विना यस्याननुभावकता भवेत् ।
आकाङ्क्षा,

यत्पदेनेति । येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा ।

वस्तुतस्तु क्रियाकारकपदानां संनिधानमासत्त्या चरितार्थम् । परन्तु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम्, तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात्तेनैवान्वयबोधः । पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव ॥

वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥ ८४ ॥

तात्पर्यं निर्वक्ति—वक्तुरिच्छेति । यदि तात्पर्यज्ञानं कारणं न स्यात्तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात् । न च तात्पर्यग्राहकप्रकरणादीनां शाब्दबोधे कारणत्वमस्त्विति वाच्यम्, तेषामननुगमात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु ।

इत्थं च वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते । न च तत्राध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम्, सर्गादावध्यापकाभावात् ।

मुक्तावलीमयूख ।

तथा चेष्टापत्तिरिति भावः ।

वदन्तीति । परे तु लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिं प्रति तदभावनिश्चयत्वेन प्रतिबन्धकता न संभवति घटाभाववद्भूतलमिति निश्चयोत्तरमपि घटप्रकारकभूतलविशेष्यकचाक्षुषं मे जायतामितीच्छासत्त्वे घटादेरपि चाक्षुषसन्निकर्षात् भूतले घटचाक्षुषोत्पत्त्या व्यभिचारवारणाय तच्चाक्षुषेच्छाविरहविशिष्टतदभावनिश्चयत्वेन विशिष्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः । अनुमितौ च तत्प्रकारकानुमितिं प्रति इच्छाविरहवैशिष्ट्यमनन्तर्भाव्यैव तदभावनिश्चयत्वेन प्रतिबन्धकता कल्पनीया परोक्षज्ञानस्याहार्यस्यानभ्युपगमात् एवं च शाब्दबुद्धौ पृथगेवायोग्यतानिश्चयस्य प्रतिबन्धकत्वं कल्पनीयमिति तदपेक्षया शाब्दबोधे योग्यताज्ञानस्य हेतुत्वकल्पने एव लाघवमिति वदन्ति ॥ ८२ ॥ ८३ ॥

क्रियाकारकपदानामिति । अयं भावः एकपदेऽपरपदवत्त्वम्—अपरपदाव्यवहितोत्तरत्वं तत्र चाव्यवधानांशस्यासत्त्यैव लाभः आसत्तेः पदाव्यवधानरूपतायाः पूर्वमुप-

न्यायसिद्धान्तमुक्तावली ।

**न च प्रलय एव नास्ति कुतः सर्गादिरिति वाच्यम्, प्रलयस्यागमेषु प्रतिपाद्यत्वात् । इत्थं च शुकवाक्येऽपि ईश्वरीयतात्पर्यज्ञानं कारणम् । विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणम् ।**

**अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम् । तथाच शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः, वेदे त्वनादिमीमांसापरिशोधिततर्कै-रर्थावधारणमित्याहुः ॥ ८४ ॥**

**इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां शब्दखण्डं समाप्तम् ।**

मुक्तावलीमयूखः ।

वर्णितत्वादिति उत्तरत्वं च क्रियाकारकपदयोर्नापेक्षितं चैत्रः पचति पचति चैत्र इति वाक्यद्वयादपि बोधात् क्रियाकारकपदयोर्नाकाङ्क्षा किन्तु प्रकृत्यव्यवहितोत्तरत्वमेवाकाङ्क्षा तत्राव्यवधानांशस्यासत्त्वैव लाभात्प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाज्ञानं कारणमिति ।

**प्रलयस्येति** । कार्यद्रव्यानधिकरणकार्याधिकरणकालविशेषात्मकखण्डप्रलयस्येत्यर्थः।

**आगमेष्विति** । 'नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्, इत्याद्यागमेष्वित्यर्थः ।

ननु वह्निना सिञ्चतीति शुकवाक्ये ईश्वरीयतात्पर्यज्ञानं न कारणं ईश्वरेच्छाया विसंवादित्वापत्तेः इत्थं च शुकवाक्येऽपीत्यसङ्गतम् अत आह **विसंवादीति** । ईश्वरेच्छाया विसंवादित्वे ईश्वरस्य सत्यसंकल्पत्वक्षतेरिति भावः ।

**अन्येत्विति** । क्वचिदित्यस्य विवरणं **नानार्थादाविति** ।

**वेदेति** । वेदत्वं च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम् ।

**मीमांसेति** । लाघवज्ञानात्मकस्तर्क इत्यर्थः । कपिञ्जलानालभेतेत्यत्र प्रथमोपस्थितत्वलाघवेन त्रित्वस्यैव बहुवचनार्थतानिश्चय इति भावः ।

ननु **परिशोधित** इत्यस्य सहकृतार्थकत्वे लाघवानन्तर्गतं सहकृतं तर्कान्तरं किमितिचेदनुमानमेवेतिगृहाण । अनुमानाकारश्च कपिञ्जलानिति बहुवचनार्थः, त्रित्वं, बहुवचनवाच्यत्वादित्येवं रूपः । तत्र च लाघवज्ञानं सहकारि चतुष्ट्वादीनामपि बहुवचनवाच्यत्वादिति तात्पर्यम् ।

**आहुरिति** । परे तु गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वस्य तात्पर्यज्ञानजन्यतावच्छेदकत्वकल्पनापेक्षया पदजन्यानुभवत्वस्य तात्पर्यज्ञानजन्यतावच्छेदकत्वकल्पने लाघवात् तात्पर्यसंशयस्थले शाब्दबोधाननुभवाच्च शाब्दबोधमात्रे तात्पर्यज्ञानस्य हेतुत्वं कल्पनीयं ततश्च वेदस्थले तात्पर्यज्ञानाभावे नार्थनिर्णय इति वदन्ति ॥ ८४ ॥

शाब्दत्वं च यां कांचित शाब्दव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यां कांचित् प्रत्यक्षव्यक्तिमादाय तदवृत्तिजातिमत्त्वम् ।

इति न्यायव्याकरणाचार्य सूर्यनारायण शुक्लविरचित मुक्तावलीमयूखे शब्दखण्डं सम्पूर्णम् ।

# अथ स्मृतिप्रक्रिया।

न्यायसिद्धान्तमुक्तावली।

पूर्वमनुभवस्मरणभेदाद् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभवप्रकारा दर्शिताः। सुगमतया स्मरणं न दर्शितम्। तत्र हि पूर्वानुभवः कारणम्।

अत्र केचित्—अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेनैव, अन्यथा स्मरणानन्तरं स्मरणं न स्यात्—समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः।

तन्न—यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणजनिष्ट सकलविषयकस्मरणं तु नाभूत्, तत्र फलस्य संस्कारनाशकत्वाभावात्कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्, तथा च न क्रमिकस्मरणानुपपत्तिः।

मुक्तावलीमयूखः।

अनुभवप्रकारा इति। अनुभवभेदा इत्यर्थः।

सुगमतयेति। सुगमस्य स्वयमप्यूहितुं शक्यतया दुरूहे एव आदौ सुधियां जिज्ञासोदयादिति भावः। तथा च अवसरसंगत्याऽनुभवानन्तरं स्मरणनिरूपणमितिभावः।

स्मरणं न स्यादिति। अयं भावः अनुभवेन संस्कारो जन्यते तद्द्वाराऽनुभवः स्मरणं जनयति अनुभवस्य तृतीयक्षणे नाशेन स्वरूपतो हेतुत्वासम्भवात्। ततश्च तत् स्मरणं संस्कारं नाशयित्वा संस्कारान्तरमुत्पादयति तेन च संस्कारेण पुनः स्मरणमिति प्रक्रिया तत्रानुभवस्यैव स्मृतिजनकत्वेनुभवजन्यसंकारस्य प्रथमस्मरणेन नाशात् द्वाराभावात स्मरणान्तरं न स्यात् मम तु स्मरणं स्वजन्यसंस्कारद्वारा स्मरणान्तरं जनयतीत्यदोष इति।

तन्नेति। अयमाशयः संस्कारस्य न फलनाश्यत्वं किन्तु चरमफलनाश्यत्वमिति अनुभवजन्यसंस्कारस्यानष्टत्वात्तद्द्वाराऽनुभवस्य स्मरणजनकत्वमिति।

संस्कारनाशकत्वाभावादिति। समानप्रकारकस्मरणस्यैव संस्कारनाशकतया प्रकृते स्मरणस्य समानप्रकारकत्वाभावेन संस्कारनाशकत्वायोगादिति भावः।

कालस्येति। अन्यथा समूहालम्बनसंस्कारस्य नाशो न स्यात् नचेष्टापत्तिः जन्यभावस्य विनाशित्वनियमात।

ननु कालादेः कालत्वादिना नाशकत्वे संस्कारमात्रस्य क्षणिकत्वं स्यात् तत्तद्व्यक्तित्वेन नाशकत्वे तु गौरवमतआह—चरमफलस्यवेति। तथा च चरमफले वैजात्यं कल्पयित्वा तेन रूपेण नाशकत्वमिति भावः।

न्यायसिद्धान्तमुक्तावली।

न च पुनःपुनः स्मरणाद् दृढतरसंस्कारानुपपत्तिरिति वाच्यम्, झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्।

न च विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यम्, विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात्। कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्।

न चान्तरालिकस्मरणानां संस्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यम्। अनन्तसंस्कारतन्नाशकल्पनापेक्षया चरमस्मरणस्यैव लाघवात्संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात्।

इति स्मृतिप्रक्रिया।

## अथ मनोनिरूपणम्।

इदानीं क्रमप्राप्तं मनो निरूपयितुमाह—

साक्षात्कारे सुखादीनां करणं मन उच्यते।

साक्षात्कार इति। एतेन मनसि प्रमाणं दर्शितम्। तथाहि—सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवदित्यनुमानेन मनसः करणत्वसिद्धिः।

न चैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम्, लाघवादेकस्यैव तादृशसकलसाक्षात्कारकरणतया सिद्धेः। एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनसः सिद्धिर्बोद्धव्या।

मुक्तावलीमयूखः।

दृढतरसंस्कारेति। यन्मते स्मरणेन संस्कारः तद्द्वारा स्मरणं तेन च संस्कारान्तरमिति तन्मते दृढतरः संस्कारः उत्पत्तुं प्रभवति यन्मते च अनुभवजन्यसंस्कारेणैव स्मरणपरम्परा तन्मते न दृढतरसंस्कारोत्पत्तिसम्भव इति।

दार्ढ्यपदार्थत्वादिति। तथा च पुनः पुनः स्मरणान्न दृढसंस्कारोत्पत्तिः किन्तु-विद्यमानसंस्कारस्यैव पुनः पुनः स्मरणेन झटिति उद्बोधकसमवधानं जायते उद्बुद्धसंस्कारात् स्मरणान्तरमिति भावः।

आन्तरालिकस्मरणानामिति। अनुभवचरमस्मरणमध्यभाविनां स्मरणानामित्यर्थः।

व्यभिचारसंशय इति। अनुभवत्वेन हेतुत्वे व्यभिचारसंशय इत्यर्थः।

जन्यसाक्षात्कारत्वादिति। ईश्वरीयसाक्षात्कारे व्यभिचारवारणाय जन्येति।

तादृशेति। आत्मवृत्तीत्यर्थः। असमवायिकारणसंयोगेति। दुःखंसासमवायि-

न्यायसिद्धान्तमुक्तावली ।

**अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥ ८५ ॥**

तत्र मनसोऽणुत्वे प्रमाणमाह—अयौगपद्यादिति । ज्ञानानां—चाक्षुषरासनादीनाम्, अयौगपद्यम्—एककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम् । तत्र नानेन्द्रियाणां सत्यपि विषयसंनिधाने यत्सम्बन्धादेकेनेन्द्रियेण ज्ञानमुत्पद्यते, यदसम्बन्धाच्च परज्ञानं नोत्पद्यते, तन्मनः । विभुत्वे चासंनिधानं न सम्भवतीति न विभु मनः ।

न च तदानीमदृष्टविशेषोद्बोधकविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम्, तथा सति चक्षुरादीनामप्यकल्पनापत्तेः । न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदाऽनेकेन्द्रियजन्यं ज्ञानमिति वाच्यम्, मनसोऽतिलाघवात्त्वरया नानेन्द्रियसम्बन्धान्नानाज्ञानोत्पत्त्या उत्पलशतपत्रभेदादिव यौगपद्यप्रत्ययस्य भ्रान्तत्वात् ।

न च मनसः सङ्कोचविकासशालित्वादुभयोपपत्तिरस्त्विति वाच्यम्, नानावयवतन्नाशादिकल्पने गौरवाल्लाघवान्निरवयवस्याणुरूपस्यैव मनसःकल्पनादिति संक्षेपः ॥ ८५ ॥

इति मनोनिरूपणम् ।

**इति द्रव्यपदार्थो व्याख्यातः ।**

---

मुक्तावलीमयूखः ।

कारणकं भावकार्यत्वात् घटवत् इत्यनुमानेन दुःखासमवायिकरणसंयोगसिद्धौ दुःखासमवायिकारणसंयोगः किञ्चिदाश्रितः संयोगत्वादित्यनुमानेन मनसः सिद्धिरित्यर्थः ।

**दीर्घशष्कुलीभक्षणेति** । तत्र घ्राणजरासनचाक्षुषज्ञानानि युगपज्जायन्ते ।

**भ्रान्तत्वादिति** । अव्यवहितकालोत्पत्तिकत्वस्य दोषत्वादिति भावः ।

**उभयोपपत्तिरिति** । मनसः सङ्कोचे एकेन्द्रियमात्रसम्बन्धादेकमेव ज्ञानं विकाशे तु नानेन्द्रियैर्मनसः सम्बन्धाद्युगपन्नानाज्ञानानामुत्पत्तिरिति भावः ।

यद्यपि नानेन्द्रियैर्मनसः सन्निकर्षकाले चाक्षुषाद्युत्पत्तिकाले रासनाद्यनुत्पादस्य रासनादिकं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वेनैवोपपत्तेर्मनसो विभुत्वे बाधकाभावस्तथापि तथा प्रतिबध्यप्रतिबन्धकभावकल्पने गौरवान्मनसोऽणुत्वमेवाभ्युपेयमिति ।

न च त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वाच्चाक्षुषसामग्रीकाले स्पार्शनसामग्र्या नियमतः सत्त्वात् स्पार्शनापत्तिर्मनसोऽणुत्वपक्षे दुर्वारेति वाच्यम् । अनन्यगत्या स्पार्शनं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वस्वीकारात् एवमपि रासनप्रत्यक्षे चाक्षुषसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवस्याणुत्वपक्षे निष्प्रत्यूहत्वादिति तत्त्वम् ॥ ८५ ॥

न्यायसिद्धान्तमुक्तावली ।

# अथ गुणनिरूपणप्रकरणम् ।

द्रव्यं निरूप्य गुणान्निरूपयति—

**अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ।**

अथेत्यादिना । गुणत्वजातौ किं मानमिति चेत्, द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना—निरवच्छिन्नकारणताया असम्भवात् । न हि रूपत्वादिकं सत्ता वा तत्रावच्छेदिका न्यूनाधिकदेशवृत्तित्वात् । अतश्चतुर्विंशत्यनुगतं किञ्चिद्वाच्यं, तदेव गुणत्वमिति ।

द्रव्याश्रिता इति । यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः, तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः । भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति । द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं, गगनादौ द्रव्यकर्मणोरभावात्, द्रव्यत्वत्वं सामान्यत्वादिकं वा न जातिरिति तद्व्युदासः ।

निर्गुणा इति । यद्यपि निर्गुणत्वं कर्मादावपि, तथापि सामान्यवत्त्वे सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम् । जात्यादीनां न सामान्यवत्त्वं, कर्मणो न कर्मान्यत्वं, द्रव्यस्य न निर्गुणत्वमिति तत्र नातिव्याप्तिः । 'निष्क्रिया' इति स्वरूपकथनं न तु लक्षणं गगनादावतिव्याप्तेः ।

**रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥**

मुक्तावलीमयूखः ।

अवसरसङ्गतिमभिप्रेत्याह—द्रव्यं निरूप्येति । तस्मिन्निरूपिते प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तेरिति भावः ।

ननु गुणत्वस्य रूपादिषु स्वसमवेतसमवायसम्बन्धेन प्रत्यक्षसम्भवादनुमानप्रमाणोपन्यासोऽयुक्त इति चेन्न अतीन्द्रियरूपादौ तत्प्रत्यक्षासम्भवेन तत्साधारण्यं गुणत्वस्य न घटते इत्यनुमानोपन्यास इत्याशयात् ।

गुणत्वमिति । वस्तुतस्तु पारिमाण्डल्यस्य कार्यकारणतया गुणत्वस्य तत्रापि सत्त्वेन तादृशकारणतातिरिक्तवृत्तित्वेन तादृशकारणतावच्छेदकतया न गुणत्वजातिसिद्धिसम्भवः । किन्तु गुणपदशक्यतावच्छेदकतया तत्सिद्धिरिति बोध्यम् ।

द्रव्यत्वव्यापकतावच्छेदकेति । द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकेत्यर्थः । द्रव्यत्वाधिकरणं घटादिकं तन्निष्ठोभावः गुणो नास्ति सत्तावान्नास्तीति न भवति गुणस्य सत्तावतश्च तत्र वृत्तेः किन्तूदासीन एवाभावस्तथा तत्प्रतियोगितावच्छेदकं पटत्वादिकमनवच्छेदकं गुणत्वं सत्ता च तत्र सत्तायां सत्ताभि-

न्यायसिद्धान्तमुक्तावली ।

द्रवत्वस्नेहवेगाश्च मता मूर्तगुणा अमी ।

वेगा इति । वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः । मूर्तगुणा इति । अमूर्तेषु न वर्तन्त इत्यर्थः । लक्षणं तु तावदन्यान्यत्वम् । एवमग्रेऽपि ।

धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥८७॥

एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।

अमूर्तगुणा इति । मूर्तेषु न वर्तन्त इत्यर्थः ।

संख्यादयो विभागान्ता उभयेषां गुणा मताः ॥ ८८ ॥

उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः ॥ ८६ ॥ ८७ ॥ ८८ ॥

संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।

द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥ ८९ ॥

अनेकाश्रिता इति । संयोगविभागद्वित्वादीनि द्विवृत्तीनि । त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् ॥ ८९ ॥

अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।

अत इति । रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्काराद्दृष्टशब्दा इत्यर्थः ।

बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥९०॥

अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ।

बुद्ध्यादीति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः । स्पर्शान्ताः–

मुक्तावलीमयूखः ।

न्तत्वाभावात् द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नगुणत्वजतिमत्त्वं गुणे इति समन्वयः ।

उपलक्षणीयइति । वेगपदं भावनान्यसंस्कारपरमिति भावः । वेगश्चेति चकारेण गुरुत्वस्य संग्रहः ।

ननुमूर्तगुणत्वं मूर्तवृत्तिगुणत्वं तच्च संख्यादावतिव्याप्तमतआह––अमूर्तेषु न वर्तन्त इति ।

तावदन्यान्यत्वामिति । तावत्त्वावच्छिन्नप्रतियोगिताकभेदावच्छिन्नप्रतियोगिताकभेदवत्त्वम् इत्यर्थः एतदन्यतमत्वमितियावत ॥ ८६–८८ ॥

द्विपृथक्त्वमिति । द्वयोः पृथक्त्वे 'घटात दण्डपटौ पृथक्' इतिप्रतीतेर्द्विपृथक्त्वे विषयः ।

नन्वनेकाश्रितत्वं संयोगादावव्याप्तमनेकपदस्य वहुत्वविशिष्टे शक्तेरत आह––संयोगविभागद्वित्वेति ॥ ८९ ॥

न्यायसिद्धान्तमुक्तावली।

रूपरसगन्धस्पर्शा इत्यर्थः। द्रवो-द्रवत्वम्। वैशेषिकाः--विशेषा एव वैशेषिकाः। स्वार्थे ठक्। विशेषगुणा इत्यर्थः।

संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥ ९१ ॥

गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः।

संख्येति। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः।

संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥ ९२ ॥

एते तु द्वीन्द्रियग्राह्याः,

मुक्तावलीमयूखः।

स्वार्थे ठगिति। विनयादित्वादिति शेषः। विशेषगुणत्वं च भावनान्यो यो वायुवृत्तिवृत्तिस्पर्शावृत्तिधर्मसमवायी तदन्यत्वे सति गुरुत्वाजलद्रवत्वान्यगुणत्वम्। तथा हि वायुवृत्तयः स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः तद्वृत्तयः स्पर्शावृत्तयश्च धर्माः संख्यात्वादयः तत्समवायिनः संख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वसंस्काराः समवायिनि भावनान्यत्वविशेषणाद् भावनाभिन्नः संस्कार इह-ग्राह्यः तदन्यत्वमेतद्व्यतिरिक्तेषु रूपादिषु इति समन्वयः। गुरुत्वे नैमित्तिकद्रवत्वे चातिव्याप्तिवारणाय गुरुत्वाजलद्रवत्वान्यगुणत्वमिति विशेष्यदलम्। जात्यादावतिव्याप्तिवारणाय गुणत्वेति। सांसिद्धिकद्रवत्वसंग्रहायाह अजलेति। संख्यादिवारणाय सत्यन्तम्। भाव-नायामव्याप्तिवारणायाद्यमन्यान्तं सत्यन्तघटकसमवायिविशेषणम्। सत्तादिकमादायास-म्भववारणाय स्पर्शसंग्रहाय च स्पर्शावृत्तीति।

यद्वा विशेषगुणत्वं द्रव्यविभाजकोपाधिद्वयसामानाधिकरण्यावृत्तिद्रव्यकर्मावृत्तिजा-तिमत्त्वम्। द्रव्यस्य विभाजकमुपाधिद्वयं पृथिवीत्वजलत्वादि तत्समानाधिकरणः संयो-गसंख्यादिस्तत्रावृत्तिरविद्यमाना तथा द्रव्यकर्मणोरप्यविद्यमाना या रूपादिकतिपयगु-णेषु विद्यमाना जातिस्तादृशजातिमत्त्वं पूर्वोक्तविशेषगुणेष्विति समन्वयः।

**सामान्यगुणत्वं** च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदक-संयोगविभागवेगद्रवत्वावृत्तिजातिशून्यगुणत्वम्। द्रव्यविभाजकोपाधिः पृथिवीत्वादिः तद्व्याप्यतावच्छेदकं च गन्धत्वादि तच्छून्यत्वस्य संख्यादौ सत्त्वाल्लक्षणसमन्वयः। जलीयशुक्लरूपे, वायोरनुष्णाशीतस्पर्शे, चातिव्याप्तिवारणाय सत्यन्तम्। कर्मादौ तद्वा-रणाय विशेष्यम्। पृथिवीत्वादिव्याप्यतावच्छेदकतत्तत्संख्यात्वादिशून्यत्वस्य तत्त-त्संख्यायामभावादव्याप्तिवारणाय जातिपदम्। शब्दविशेषजनकतावच्छेदकजात्यव-च्छिन्नकठिनावयवद्वयविभागे, तेजोवेगातिशये, ऽत्यन्ताग्निसंयोगानाश्यतावच्छेदकवै-जात्यावच्छिन्नघृतादिवृत्तिद्रवत्वे, चाव्याप्तिवारणायावृत्त्यन्तं जातिविशेषणमिति ध्येयम्।

न्यायसिद्धान्तमुक्तावली ।

द्वीन्द्रियेति । चक्षुषा त्वचापि ग्रहणयोग्यत्वात् ।

अथ स्पर्शान्तशब्दकाः ।

बाह्यैकैकेन्द्रियग्राह्याः,

बाह्येति । रूपादीनां चक्षुरादिग्राह्यत्वात् ।

गुरुत्वादृष्टभावनाः ॥ ९३ ॥

अतीन्द्रिया, विभूनां तु ये स्युर्वैशेषिका गुणाः ।

अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ ९४ ॥

विभूनामिति । बुद्धिसुखदुःखेच्छाद्वेषयत्नधर्माधर्मभावनाशब्दा इत्यर्थः । अकारणेति । कारणगुणेन कार्ये ये गुणा उत्पद्यते ते कारणगुणपूर्वका रूपादयो वक्ष्यन्ते, बुद्ध्यादयस्तु न तादृशा आत्मादेः-कारणाभावात् ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।

स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥

स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।

अपाकजास्त्विति । पाकजरूपादीनां कारणगुणपूर्वकत्वाभावात् अपाकजा इत्युक्तम् । तथाविधम्-अपाकजम् । तथैकत्वमपि बोध्यम् ।

संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥

संयोगश्चेति । कर्मजन्यत्वं यद्यपि न साधर्म्यं-घटादावतिव्याप्तेः, संयोगजसंयोगेऽव्याप्तेश्च, तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम् । एवमन्यत्राप्यूह्यम् ॥ ९५ ॥ ९६ ॥

स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।

भवेदसमवायित्वम् ,

स्पर्शान्तेति । एकपृथक्त्वमित्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च ग्राह्यम् । पृथक्त्वपदेन चैकपृथक्त्वम् । भवेदसमवायित्वमिति । घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भव-

मुक्तावलीमयूखः ।

**स्नेहएवचेतिमूले**—स्नेहपदं वेगस्याप्युपलक्षणम् ॥ ९०–९२ ॥

**एकेन्द्रियग्राह्यत्वं** । एकेन्द्रियग्रहणयोग्यत्वमित्यर्थः । तेनातीन्द्रियरूपादौ इन्द्रियग्राह्यत्वाभावेपि नाव्याप्तिः ।

**स्पर्शान्ताः** । रूपरसगन्धस्पर्शाः ॥ ९३–९९ ॥

न्यायसिद्धान्तमुक्तावलीः।

न्ति। एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम्। शब्दस्यापि द्वितीयशब्दं प्रति। एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम्।

अथ वैशेषिके गुणे ॥ ९७ ॥

आत्मनः स्यान्निमित्तम्,

निमित्तत्वमिति। बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः।

उष्णस्पर्शगुरुत्वयोः।

वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥ ९८ ॥

द्विधैव कारणत्वं स्याद्,

द्विधैवेति। असमवायिकारणत्वं निमित्तकारणत्वं च। तथाहि—उष्णस्पर्श उष्णस्पर्शस्यासमवायिकारणं, पाकजे निमित्तम्। गुरुत्वं गुरुत्वपतनयोरसमवायिकारणं, प्रतिघाते निमित्तम्। वेगो वेगस्पन्दनयोरसमवायी, अभिघाते निमित्तम्। द्रवत्वं द्रवत्वस्यन्दनयोरसमवायि, सङ्ग्रहे निमित्तम्। भेरीदण्डसंयोगः शब्दे निमित्तं, भेर्याकाशसंयोगेऽसमवायी; वंशदलद्वयविभागः शब्दे निमित्तं वंशदलाकाशविभागेऽसमवायीति।

अथ प्रादेशिको भवेत्।

वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९९ ॥

प्रादेशिकोऽव्याप्यवृत्तिः ॥ ९७ ॥ ९८ ॥ ९९ ॥

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम्।

चक्षुरिति। रूपत्वजातिस्तु प्रत्यक्षसिद्धा। रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेन्मास्तु रूपशब्दप्रयोगः, तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव। रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दोल्लेखिनी प्रतीतिरस्त्येव। एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम्।

न चैकैका एव नीलरूपादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यम्, नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात्, अन्यथा एकनीलनाशे जगदनीलमापद्येत।

मुक्तावलीमयूखः।

अव्याप्यवृत्तित्वम् स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वम् ॥ ९६–९९ ॥

न्यायसिद्धान्तमुक्तावली ।

न च नीलसमवायरक्तसमवाययोरेवोत्पादविषयकोऽसौ प्रत्यय इति वाच्यम्, प्रतीत्या समवायानुल्लेखात् ।

न च स एवायं नील इति प्रत्ययाल्लाघवाच्चैक्यमिति वाच्यम्, उक्तप्रत्ययस्य तज्जातीयविषयकत्वात्सैवेयं गुर्जरीतिवत् । लाघवं तु प्रत्यक्षबाधितम्, अन्यथा घटादीनामप्यैक्यप्रसङ्गादुत्पादविनाशबुद्धेः समवायालम्बनत्वापत्तेरिति ।

एतेन रसादिकमपि व्याख्यातम् ।

चक्षुर्ग्राह्यमिति । चक्षुर्ग्राह्यविशेषगुण इत्यर्थः । एवमग्रेऽपि ।

द्रव्यादेरिति । उपलम्भकमुपलब्धिकारणम् । इदमेव विवृणोति—

चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥ १०० ॥

चक्षुष इति । द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम् ।

शुक्लादीति । तच्च रूपं शुक्लनीलपीतरक्तहरितकपिशकर्बुरभेदादनेकप्रकारकं भवति ।

ननु कथं कर्बुरमतिरिक्तरूपं भवति । इत्थं—नीलपीताद्यवयवारब्धोऽवयवी न तावन्नीरूपो, अप्रत्यक्षत्वप्रसङ्गात् । नापि व्याप्यवृत्तिनीलादिकमुत्पद्यते, पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् । नाप्यव्याप्यवृत्ति नीलादिकमुद्यते, व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात् । तस्मान्नानाजातीयरूपैरवयविनि विजातीयं चित्रं रूपमारभ्यते । अत एव 'एकं चित्रम्' इत्यनुभवोऽपि । नानारूपकल्पने गौरवात् । इत्थं च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनादवयविनि न पीताद्युत्पत्तिः ।

एतेन स्पर्शोऽपि व्याख्यातः ।

रसादिकमपि नाव्याप्यवृत्ति, किन्तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः । तत्र रसनयाऽवयवरस एव गृह्यते

मुक्तावलीमयूखः ।

प्रतिबन्धकत्वकल्पनादिति । समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलातिरिक्तरूपत्वेन, समवायेन पीतरूपं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन पीतातिरिक्तरूपत्वेन प्रतिबन्धकत्वमिति रीत्या प्रतिबध्यप्रतिबन्धकभावकल्पनात् । अन्यथा नानाजातीयरूपवत्कपालारब्धे घटे नीलकपालावच्छेदेन पीतोत्पादस्य दुर्वारत्वादिति भावः ।

स्पर्शोपि व्याख्यात इति । कोमलकठिनस्पर्शवदवयवाभ्यामारब्धे घटादौ

:न्यायसिद्धान्तमुक्तावली:।

रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावादवयविनो नीरसत्वेऽपि क्षतेरभावात् ।

नव्यास्तु तत्राव्याप्यवृत्त्येव नाना रूपं. नीलादेः पीतादिप्रतिबन्धकत्वकल्पने गौरवात् । अत एव—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

इत्यादिशास्त्रमप्युपपद्यते ।

न च व्याप्यवृत्त्यव्याप्यवृत्तिजातीययोर्द्वयोर्विरोधः, मानाभावात् ।

न च लाघवादेकं रूपम्, अननुभावात । अन्यथा घटादेरपि लाघवादैक्यं स्यात । एतेन स्पर्शादिकमपि व्याख्यातमिति वदन्ति ॥ १०० ॥

**जलादिपारमाणौ तन्नित्यमन्यत्सहेतुकम् ।**

जलादीति । जलपरमाणौ तेजःपरमाणौ च रूपं नित्यम् । पृथिवीपरमाणुरूपं तु न नित्यं तत्र पाकेन रूपान्तरोत्पत्तेः। नहि घटस्य पाकान्तरं तदवयवोऽपक्व उपलभ्यते । न हि रक्तकपालस्य कपालिका नीलावयवा भवति । एवं क्रमेण परमाणावपि पाकसिद्धेः । अन्यत्—जलतेजःपरमाणुरूपभिन्नं रूपं, सहेतुकं—जन्यम् ॥

रसं निरूपयति—

**रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥**
**सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ।**

रसस्त्वति । सहकारीति । रासनज्ञाने रसः कारणमित्यर्थः ।

पूर्ववदिति । जलपरमाणौ रसो नित्योऽन्यः सर्वोपि रसोऽनित्य इत्यर्थः ॥

गन्धं निरूपयति—

**घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ॥ १०२ ॥**
**सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ॥**

घ्राणग्राह्य इति । उपकारक इति । घ्राणजन्यज्ञाने सहकारिकारणमित्यर्थः । सर्वोऽपि गन्धोऽनित्य एव ॥ १०१ ॥ १०२ ॥

मुक्तावलीमयूखः ।

स्पर्शानङ्गीकारे घटस्य त्वाचप्रत्यक्षानापत्तिः त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे समवायेन स्पर्शस्य कारणत्वादिति चित्रस्पर्शोऽपि स्वीकार्य इति भावः ।

ननु अवच्छेदकतासंबन्धेन नीलं प्रति समवायेन नीलस्य हेतुतास्वीकारेणैव नाना-

न्यायसिद्धान्तमुक्तावली ।

स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥ १०३ ॥
अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः ।
काठिन्यादि क्षिताववे नित्यतादि च पूर्ववत् ॥ १०४ ॥

स्पर्श इति । उपकारक इति । स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः ॥ १०३ ॥

अनुष्णाशीतेति । पृथिव्यां वायौ च स्पर्शोऽनुष्णाशीतः, जले शीतः, तेजस्युष्णः ।

काठिन्येति । कठिनसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः । कठिनत्वादिकं तु न संयोगनिष्ठो जातिविशेषः, चक्षुर्ग्राह्यत्वापत्तेः ।

पूर्ववदिति । जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नास्त्वनित्या इत्यर्थः ॥ १०४ ॥

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् ।
तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥ १०५ ॥

एतेषामिति । एतेषां रूपरसगन्धस्पर्शानाम् ।

नान्यत्रेति । पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते । न हि शतधापि ध्मायमाने जले रूपादिकं परिवर्तते । नारे सौरभमौष्ण्यं चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते-पवनपृथिव्योः शीतस्पर्शादिवत् ।

तत्रापि पृथिवीष्वपि परमाणावेव रूपादीनां पाक इति वैशेषिका वदन्ति ।

तेषामयमाशयः-अवयविनावष्टब्धेष्ववयवेषु पाको न सम्भवति, परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः ।

मुक्तावलीमयूखः ।

जातीयरूपवत्कपालारब्धे घटे पीतकपालावच्छेदेन नीलापत्तिवारणसंभवे पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवमित्याशयेनाह--नव्यास्त्विति ॥ १००-१०३ ॥

न संयोगनिष्ठ इति । 'कठिनः संयोगः' इति प्रतीतिस्तु कठिनस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहते इति भावः ।

ध्मायमाने इति । अग्निसंयुक्ते इत्यर्थः ।

पाक इति । रूपरसगन्धस्पर्शानां परावृत्तिरित्यर्थः ।

पाको न संभवतीति । रूपादिपरावृत्तिफलकस्तेजः संयोगो न भवतीत्यर्थः । रूपनाशं प्रति साक्षात्सम्बन्धावच्छेदेन तेजःसंयोगः कारणमिति

न्यायसिद्धान्तमुक्तावली ।

पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः । तेजसामतिशयितवेगवशात्पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति ।

अत्र द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्यार्थं क्षणप्रक्रिया ।

तत्र विभागजविभागानङ्गीकारे नवक्षणा ।

तदङ्गीकारे तु विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्मत्वं स्यात् । संयोगविभागयोरनपेक्षं कारणं कर्मेति १।१।१७ वैशेषिकसूत्रम् । स्वोत्तरोत्पन्नभावान्तरानपेक्षत्वं तस्यार्थः, अन्यथा कर्मणोऽप्युत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यात् । तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा ।

अथद्रव्यनाशविशिष्टं कालमेपक्ष्य विभागजविभागः स्यात्तदैकादशक्षणा ।

अथ नवक्षणा । तथाहि वह्निसंयोगात्परमाणौ कर्म । ततः परमाण्वन्तरेण विभागः । तत आरम्भकसंयोगनाशः । ततो द्व्यणुकनाशः । १ । ततः परमाणौ श्यामादिनाशः । ५ । ततो रक्ताद्युत्पत्तिः। ३ । ततो द्रव्यारम्भानुगुणा क्रिया । ४ । ततो विभागः । ५ । ततः पूर्वसंयोगनाशः ।६। तत आरम्भकसंयोगः । ७ । ततो द्व्यणुकोत्पत्तिः । ८ । ततो रक्ताद्युत्पत्तिः । ९ ।

मुक्तावलीमयूखः ।

कार्यकारणभावादवयविनाऽवष्टब्धेषु अवयवेषु सत्सु सर्वावयवावच्छेदेन तेजःसंयोगरूपकारणाभावाद्रूपनाशासंभवादिति भावः ।

न चावयविनाऽवष्टब्धेषु तेजः संयोगः कुतो न जायते इति वाच्यम् । एवं सति आरम्भकसंयोगावच्छेदेनावयविनि तेजःसंयोगोत्पादकाले तदवच्छेदेनावयवेष्वपि नोदनाभिघातयोरन्यतरस्य जनननियमादवयेवषु विभागहेतुक्रियोत्पादेनारम्भकसंयोग नाशादवयविनाशापत्तेरिति भावः ।

वैशद्यं स्फीतता ।

विभागजविभागानङ्गीकारे इति । इदमत्रावधेयम् । विभागजविभागो द्विधा कारणमात्रविभागात्कारणाकारणविभागः, कारणाकारणविभागात् कार्याकार्यविभागश्च, ।

आद्यस्तावत् यत्र कपाले कर्म ततः कपालद्वयविभागः ततः घटारम्भकसंयोगनाशः

न्यायसिद्धान्तमुक्तावली ।

ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणा क्रियाऽस्त्विति चेद्—

न अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात्-कर्मवति कर्मान्तरानुत्पत्तेर्निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च ।

तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेद्—

न पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात् ।इति नवक्षणा ।

अथ दशक्षणा । सा च-आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात् । तथाहि-वह्निसंयोगात् द्व्यणुकारम्भके परमाणौ कर्म, ततो विभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशविभागजविभागौ । १ । ततः श्यामनाशपूर्वसंयोगनाशौ । २ । ततो रक्तोत्पत्त्युत्तरसंयोगौ । ३ । ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः । ४ । ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणा क्रिया । ५ । ततो विभागः । ६ । ततः पूर्वसंयोगनाशः । ७ । तत आरम्भकसंयोगः ।८। ततो द्व्यणुकोत्पत्तिः । ९ । ततो रक्तोत्पत्तिः । १० । इति दशक्षणा ।

अथैकादशक्षणा--वह्निसंयोगात्परमाणौ कर्म, ततो विभागः, ततो द्रव्यारम्भकसंयोगनाशः, ततो द्व्यणुकनाशः । १ । ततो द्व्यणुकनाश-

मुक्तावलीमयूखः ।

ततः घटनाशः ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशाविभागो जन्यते सोऽयं कारणमात्रविभागात् कारणाकारणविभागः ।

द्वितीयस्तु यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययः इति सोऽयं विभागः कारणाकारणविभागात् कार्याकार्यविभाग इत्युच्यते शरीरस्य हस्तकार्यत्वात् तरोश्चाकार्यत्वादिति ।

न च कर्मणैव विभागोऽङ्गीक्रियतां किमिति विभागेन विभागोऽङ्गीक्रियते इति वाच्यम् । एकस्य कर्मणः आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधादन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गादिति परिमाणनिरूपणावसरे मुक्तावल्यां स्पष्टीभविष्यति यदवच्छेदेन कमलारम्भकसंयोगस्तदवच्छेदेन क्रियानुत्पत्त्या न विकसत्कमलकुड्मलभङ्गप्रसङ्ग इति तादृशनियमे मानाभावात् कारणमात्रविभागात् कारणाकारणविभागो नाङ्गीक्रियते किन्तु कर्मणैव तादृशविभाग इत्याशयेनाह—विभागजविभागानङ्गीकारे इति ।

विभागेन विभागजनने इति । कारणविभागेन कारणाकारणविभागजनने सतीत्यर्थः ।

न्यायसिद्धान्तमुक्तावली ।

विशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ । २ । ततः पूर्वसंयोगनाशरक्तोत्पत्ती । ३ । तत उत्तरदेशसंयोगः । ४ । ततो वह्निनोदनजन्यपरमाणुकर्मनाशः । ५ । ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणा क्रिया । ६ । ततो विभागः । ७ । ततः पूर्वसंयोगनाशः । ८ । ततो द्रव्यारम्भकोत्तरसंयोगः । ९ । ततो द्व्यणुकोत्पत्तिः । १० । ततो रक्ताद्युत्पत्तिः । ११ । इति ।

मध्यशब्दवेदैकस्मादग्निसंयोगान्न रूपनाशोत्पादौ तावत्कालमेकस्याग्नेरस्थिरत्वात् । किञ्च नाशक एव यद्युत्पादकः, तदानष्टे रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात् । उत्पादकश्चेन्नाशकः, तदा रक्तोत्पत्तौ तदग्निनाशे रक्ततरता न स्यात् । इत्येकादशक्षणा ॥

अथ परमाण्वन्तरे कर्मचिन्तनात्पञ्चमादिक्षणेऽपि गुणोत्पत्तिः । तथाहि—एकत्र परमाणौ कर्म, ततो विभागः, तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी । ततस्तु द्व्यणुकनाशः, परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः । १ ततः श्यामादिनाशः, विभागाच्च पूर्वसंयोगनाश इत्येकः कालः । ३ । अथ द्व्यणुकोत्पत्तिः । ४ । ततो रक्तोत्पत्तिः । ५ । इति पञ्चक्षणा ॥

द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात्षष्ठक्षणे गुणोत्पत्तिः तथाहि-परमाणुकर्मणा परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः । अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी । १ । अथ श्यामादिनाशः, परमाण्वन्तरकर्मजो विभागश्च । २ । ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च । ३ । ततः परमाण्वन्तरसंयोगः । ४ । ततो द्व्यणुकोत्पत्तिः । ५ । अथ रक्तोत्पत्तिः । ६ । इति षट्क्षणा ॥

एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात्सप्तक्षणा । तथाहि-परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः । १ । ततः श्यामादिनाशपरमाण्वन्तरकर्मणी । २ । ततो रक्तोत्पत्तिः, परमाण्वन्तरकर्मजविभागश्च । ३ । ततः परमाण्वन्तरेण पूर्वसंयोगनाशः । ४ । ततः परमाण्वन्तरसंयोगः। ५ । ततो द्व्यणुकोत्पत्तिः । ६ । ततो रक्तोत्पत्तिः । ७ । इति सप्तक्षणा ॥

एवं रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा । तथाहि—परमाणौ कर्म ततः परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः । १ । ततः श्यामनाशः । २। ततो रक्तोत्पत्तिपरमाण्वन्तरकर्मणी । ३ । ततः परमाण्वन्तरकर्मजविभागः । ४ । ततः

न्यायसिद्धान्तमुक्तावलीः।

पूर्वसंयोगनाशः। ५। ततः परमाण्वन्तरसंयोगः। ६। ततो द्व्यणुकोत्पत्तिः। ७। अथ रक्तोत्पत्तिः। इत्यष्टक्षणा॥ १०५॥

नैयायिकानां तु नये द्व्यणुकादावपीष्यते।

नैयायिकानामिति। नैयायिकानां मते द्व्यणुकादावयविन्यपि पाको भवति।

तेषामयमाशयः--अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तः प्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते। वैशेषिकमते अनन्तावयवितन्नाशकल्पनेन गौरवात्। इत्थंच सोऽयं घट इत्यादिप्रत्यभिज्ञापि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति॥

संख्यां निरूपयितुमाह--

गणनाव्यवहारे तु हेतुः संख्याभिधीयते॥ १०६॥

गणनेति। गणनाव्यवहारासाधारणकारणं संख्येत्यर्थः॥ १०६॥

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः॥ १०७॥

नित्येष्विति। नित्येषु-परमाण्वादिषु एकत्वं नित्यम्। अनित्ये घटादावेकत्वमनित्यमित्यर्थः। द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षाबुद्धिजन्याः॥ १०७॥

मुक्तावलीमयूखः।

प्रत्यभिज्ञापि संगच्छते इति। पूर्वावयविनाशे तु उत्तरोत्पन्नावयविपूर्वावयविनोरभेदाभावादभेदावगाहि प्रत्यभिज्ञा न स्यादिति भावः॥ १०४—१०५॥

अपेक्षाबुद्धिजन्या इति। ननु प्रत्यक्षवृत्तिद्वित्वादेरपेक्षाबुद्धिजन्यत्वसंभवेऽपि अतीन्द्रियगतद्वित्वादेर्नापेक्षाबुद्धिजन्यत्वसंभवः अतीन्द्रियाणामस्मदादेरप्रत्यक्षतया 'अयमेकः' 'अयमेक' इत्यपेक्षाबुद्धेरसंभवादिति चेन्न अतीन्द्रियगतद्वित्वोत्पत्तयेऽस्मदादेरपेक्षाबुद्धेः कारणत्वासंभवेऽपि ईश्वरीयापेक्षाबुद्धेरेव तत्र कारणत्वेन द्वित्वोत्पत्तिसंभवात्।

न च अतीन्द्रियगतद्वित्वस्येश्वरीयापेक्षाबुद्धिजत्वे तदीयापेक्षाबुद्धेर्नित्यतया नाशासंभवेन तादृशद्वित्वस्यापि नित्यत्वापत्तिः अपेक्षाबुद्धिनाशस्यैव द्वित्वनाशकत्वादिति वाच्यम्। तद्द्वित्वस्येश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः क्षणविशेषस्येश्वरीयापेक्षाबुद्धिसहकारित्वानङ्गीकारे सर्गाद्यकालीनपरमाणुद्वित्वोत्पत्तेः पूर्वं तद्द्वित्वोत्पादापत्तेः।

न चापेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपित इति मूलविरोध इति वाच्यम् अपेक्षाबुद्धिनाशाच्चेति मूलस्य आश्रयनाशोपलक्षकत्ववदीश्वरीयापेक्षाबुद्धिसहकारिविशेषक्ष-

न्यायसिद्धान्तमुक्तावली ।

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥ १०८ ॥

अनेकेति । यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते, तथा प्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चन सम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते ।

अपेक्षाबुद्धिनाशादिति । प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकम्, ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति ।

यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वं-योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्, तथाप्यपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते अन्यथा निर्विकल्पककालेऽपेक्षाबुद्धिनाशानन्तरं द्वित्वस्यैव नाशः स्यात्, न तु द्वित्वप्रत्यक्षं-तदानीं विषयाभावात्, विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते।

न चापेक्षाबुद्धिनाशात्कथं द्वित्वनाश इति वाच्यम्, कालान्तरे द्वित्वप्रत्यक्षाभावात्, अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशात्तन्नाश इति कल्पनात्। अत एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते ।

न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यम्, लाघवेन द्वित्वं प्रत्येव कारणत्वस्योचितत्वात् ।

अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम्, सर्गादिकालीनपरमाणवादावीश्वरीयापेक्षाबुद्धिः, ब्रह्माण्डान्तरवर्तियोगिनामेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥ १०८ ॥

मुक्तावलीमयूखः ।

णविशेषोपलक्षकत्वस्वीकारेणादोषात् । तद्व्यक्तिमात्रनिष्ठेदंत्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिः ॥ १०६–१०७ ॥

अनेकाश्रयइति । उभयाद्याश्रय इत्यर्थः । तथा च तादृशप्रतीतेर्न द्वित्ववद्भेदाधारतावच्छेदकत्वमेकत्वे विषयः किन्तु पर्याप्तिसबन्धेन द्वित्वं तद्वद्भेदो वा एकत्वावच्छिन्ने प्रकारः एवं च पर्याप्तिसबन्धेन द्वित्वस्य प्रत्येकमभावादेको द्वावित्यादि प्रत्ययस्यैको न द्वाविति प्रत्ययस्य चोपपत्तिरिति भावः ।

लाघवनेति । द्वित्वप्रत्यक्षत्वापेक्षया द्वित्वत्वस्य कार्यतावच्छेदकत्वे लाघवादिति भावः । द्वित्वं प्रति आश्रयगतैकत्वे असमवायिकारणम्, अपेक्षाबुद्धिर्निमित्तकारणम्, आश्रयीभूतं द्रव्यं समवायिकारणमिति विवेकः ।

न्यायसिद्धान्तमुक्तावली।

अपेक्षाबुद्धिः केत्यत आह—

**अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते।**

अनेकेति। अयमेकोऽयमेक इत्याकारिका इत्यर्थः।

इदं तु बोध्यम्। यत्रानियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना बहुत्वसंख्योत्पद्यते, यथा सेनावनादाविति कन्दलीकारः।

आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते, तथाच त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नातिरिच्यते। सेनावनादावुत्पन्नेऽपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात्। इत्थं चेतो बहुतरेयं सेनेति प्रतीतिरुपपद्यते। बहुत्वस्य संख्यान्तरत्वे तु तत्तारतम्याभावान्नोपपद्येतेत्यवधेयम्॥

परिमाणं निरूपयति—

**परिमाणं भवेन्मानव्यवहारस्य कारणम्॥ १०९॥**

परिमाणमिति। परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः॥ १०९॥

**अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः।**

तच्चतुर्विधम्—अणु महद् दीर्घं ह्रस्वं चेति।

**अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्॥ ११०॥**

**संख्यातः परिमाणाच्च प्रचयादपि जायते।**

**अनित्यं,**

मुक्तावलीमयूखः।

उत्पन्नेऽपीति। अनियतैकत्वज्ञानस्यापि द्वित्वाद्युत्पादकत्वादिति भावः।

दोषादिति। नियतानेकैकत्वज्ञानाभावरूपादित्यर्थः। यद्यपि अनियतानेकैकत्वज्ञानं त्रित्वोत्पत्तिकारणं तथापि त्रित्वविशेष्यकत्रित्वत्वप्रकारकप्रत्यक्षे नियतानेकैकत्वज्ञानस्य हेतुतया तं विना न त्रित्वत्वादिप्रकारकं प्रत्यक्षमित्याशयः।

इतो बहुतरेति। इतो बहुतेरत्यत्र बहुत्वे स्वसजातीयनिरूपितोत्कर्षप्रतीत्या चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूपबहुत्वापेक्षयोत्कर्षसत्त्वात् तादृशप्रतीतिरुपपद्यते इति भावः।

तारतम्याभावादिति। त्वन्मते बहुत्वस्यैकरूपतया स्वसजातीयोत्कर्षाभावात् तारतम्यव्यवहारो न स्यादिति भावः॥ १०८॥ १०९॥

अणुमहदिति। यद्यप्यणुत्वमेव ह्रस्वत्वमस्तु महत्त्वमेव दीर्घत्वमस्तु कृतं परिमाणचातुर्विध्येन तथापि तदवधिकतयाणुत्वेन प्रतीयमानेऽपि तदवधिकह्रस्वत्वस्याव्यवहारात्, तदधिकमहत्त्ववत्तया प्रतीयमानेऽपि तदवधिकदीर्घत्वस्याव्यवहारात्परिमाणचातुर्विध्यमितिध्येयम्।

न्यायसिद्धान्तमुक्तावली ।

तत—परिमाणम् । नित्यमित्यत्र परिमाणमित्यनुषज्यते । जायत इ-इत्यत्रापि परिमाणमित्यनुवर्त्तते । अनित्यमिति पूर्वेणान्वितम् । तथा चानित्यपरिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः ॥

तत्र संख्याजन्यमुदाहरति—

द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥ १११ ॥

द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणं-परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् । द्व्यणुकपरिमाणं तु परमाण्वणुत्वापेक्षया नोत्कृष्टम् । त्रसरेणुपरिमाणं तु न सजातीयम् । अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य-द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासंमवायिकारणमित्यर्थः ॥ ११० ॥ १११ ॥

परिमाणजन्यं परिमाणमुदाहरति—

परिमाणं घटादौ तु परिमाणजमुच्यते ।

परिमाणं घटादावित । घटादिपरिमाणं कपालादिपरिमाणजन्यम्॥

प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति—

प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥ ११२ ॥

परिमाणं तूलकादौ,

प्रचय इति ॥

परिमाणं चाश्रयनाशादेव नश्यतीत्याह--

नाशस्त्वाश्रयनाशतः ।

नाश इति । अर्थात्परिमाणस्यैव ।

न चावयवविनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतु-

मुक्तावलीमयूखः ।

परमाणौ द्वित्वसंख्येति । नन्वेवं घटगतमहत्परिमाणस्यापि कपालगतद्वित्वसंख्यैव कारणमस्त्विति चेन्नद्वित्वसंख्याया महत्वाजनकत्वात् अन्यथा द्व्यणुकपरिमाणस्य परमाणुगतद्वित्वजन्यतया महत्वं स्यात् । नचोक्तापत्तिभिया द्वित्वत्वेनद्वित्वस्या जनकत्वेऽपि कपालगतद्वित्वत्वेन घटपरिमाणजनकत्वमस्त्विति वाच्यम् । कपालगतमहत्वोत्कर्षेण घटगतमहत्वोत्कर्षस्यानुभविकया कपालगतमहत्वस्यैव घटपरिमाणजनकत्वौचित्यादिति तत्त्वम् ॥ ११०-११२ ॥

अर्थादिति । प्रकरणादित्यर्थः ।

न्यायसिद्धान्तमुक्तावली।

रपरमाणुविश्लेषे तदुपचये वावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम्,

परमाणुविश्लेषे हि द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च त्रसरेणुनाशः। एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात्, सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापलपितुमशक्यत्वात्, शरीरादावयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः।

न च पटाविनाशेऽपि तन्त्वन्तरसंयोगात्परिमाणाधिक्यं न स्यादिति वाच्यम्,

तत्रापि वेमाद्यभिघातेनासमवायिकारणतन्तुसंयोगनाशात्पटनाशस्यावश्यकत्वात्। किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्, तन्त्वन्तररूपकारणाभावात्, तन्त्वन्तरस्यावयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत्,

तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वं पटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम्। अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकावत्।

न च पूर्वतन्तव एव तन्त्वन्तरसहकारात्पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम्,

मूर्तयोः समानदेशताविरोधात्तत्र पटद्वयासम्भवात्, एकदा नानाद्रव्यस्य तत्रोपलम्भस्य बाधितत्वाच्च। तस्मात्पूर्वस्य द्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेयत्वात्॥

पृथक्त्वं निरूपयति—

संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम्॥ ११३॥

संख्यावदिति। पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वम्। तन्नित्यतादिकं संख्यावत्। तथाहि–नित्येष्वेकत्वं नित्यम्, अनित्येऽनित्यमेकत्वमाश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति, तथैकपृथक्त्वमपि, द्वित्वादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः॥ ११२॥ ११३॥

मुक्तावलीमयूखः।

द्वितीयक्षणे चोत्पद्यते। इत्यनन्तरं स्वाश्रयावयवगतैकत्वासमवायिकारणकं चेति पूरणीयम्।

द्विपृथक्त्वमिति। ननु घटौ पटात्पृथगिति प्रतीतेः घटावधिकैकपृथक्त्वद्वयदिनाप्युपपत्तौ द्विपृथक्त्वादिकं नाङ्गीकर्तव्यमिति चेन्न। घटौ पटात्पृथगिति प्रतीत्योभयसमवेतद्विपृथक्त्वे सिद्धे तेनैव घटःपटात्पृथगितिप्रतीत्युपपत्तौ एकपृथक्त्वे मानाभाव

न्यायसिद्धान्तमुक्तावली ।

अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।
अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥ ११४ ॥

नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते—

न चास्तु पृथक्त्वं न त्वन्योन्याभाव इति वाच्यम्, रूपं न घट इति प्रतीत्यनापत्तेः। नहि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति, न वा घटे घटावधिकं पृथक्त्वमस्ति, येन परम्परासम्बन्धः कल्प्येत इत्यत आह— अस्मादिति ।

ननु शब्दवैलक्षण्यमेव न त्वर्थवैलक्षण्यमिति चेद्—

न–विनार्थभेदं घटात्पृथगितिवद्घटो न पट इत्यत्रापि पञ्चमीप्रसङ्गात्। तस्माद्यदर्थयोगे पञ्चमी सोऽर्थो नञर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति ॥ ११४ ॥

संयोगं निरूपयति—

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।

मुक्तावलीमयूखः ।

इत्यस्यापि वक्तुं शक्यतया विनिगमनाविरहेणोभयोरप्यवश्यमङ्गीकर्तव्यत्वादिति ।

परम्परासंबन्ध इति । सामानाधिकरण्यरूपपरम्परासंबन्धविषयकत्वमुक्तप्रतीतेः कल्प्यमित्यर्थः । किंच प्रतीतेः सामानाधिकरण्यरूपपरम्पराविषयकत्वमङ्गीकृत्यान्योन्याभावानङ्गीकारे एतद्घटावधिकपृथक्त्वस्य एतद्रूपेऽसत्त्वेन समवायेन, एतद्घटावधिकपृथक्त्वस्यैतद्घटेऽसत्त्वेन परम्परासम्बन्धेन च पृथक्त्वस्यैतद्घटरूपेऽसत्त्वेन एतद्घटरूपमेतद्घटात्पृथगिति प्रतीत्यनुपपत्तिः न च रूपावधिकस्य तद्रूपावधिकस्य वा पृथक्त्वस्य घटे सत्त्वात् स्वाधिकरणवृत्तित्वसम्बन्धेन घटनिष्ठं पृथक्त्वं रूपे वर्तते इति न दोष इति वाच्यम्, तथासति । एतद्रूपमेतद्रूपात्पृथगिति प्रतीत्यापत्तेः अन्योन्याभावस्यातिरिक्तस्याभ्युपगमे तु पृथक्पदस्यान्योन्याभावलक्षणया सर्वमुपपादनीयमिति भावः ।

गुणान्तरमिति । परे तु अन्योन्याभाव एव पृथक्त्वं न तु गुणान्तरं न च घटो नेत्यत्र पञ्चम्यापत्तिः अन्योन्याभावविशिष्टार्थकपदयोग एव 'अन्यारादितरर्ते—'इति सूत्रेण पञ्चमीविधानात् नञस्त्वन्योन्याभावमात्रार्थकत्वस्य सिद्धान्तितत्वात् यदि च घटाद्भेद इत्यत्र पञ्चम्युपपत्तये अन्यारादिति सूत्रे अन्यपदेन अन्योन्याभावार्थकपदयोगोऽपि पञ्चमीप्रयोजकतया गृह्यत इति घटो नेत्यत्र पञ्चमी दुर्वारेत्युच्यते तदा निपातातिरिक्तान्योन्याभावार्थकपदयोगस्यैव पञ्चमीप्रयोजकत्वमभ्युपेयम् अनुशासनस्य प्रयोगानुरोधित्वादित्यदोषादिति वदन्ति ॥ ११३ ॥ ११४ ॥

अप्राप्तयोरिति । अप्राप्तयोः अपृथक्सिद्धयोः या प्राप्तिः यः सम्बन्धः स

न्यायसिद्धान्तमुक्तावली ।

कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ ११५ ॥

अप्राप्तयोरिति । तं विभजते—कीर्तित इति । एषः-संयोगः ॥ ११५ ॥

तथोभयक्रियाजन्यो भवेत्संयोगजोऽपरः ।

आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥ ११६ ॥

मेषयोः संनिपातो यः स द्वितीय उदाहृतः ।

संनिपातः-संयोगः । द्वितीयः-उभयकर्मजः ॥

कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥ ११७ ॥

तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः ।

अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ ११८ ॥

शब्दाहेतुर्द्वितीयः स्याद्,

तृतीय इति । संयोगजसंयोग इत्यर्थः । तृतीयः स्यादिति पूर्वेणान्वितम् । आदिमः-अभिघातः । द्वितीयो नोदनाख्यः संयोग इति ॥

विभक्तप्रत्ययासाधारणं कारणं विभागं निरूपयति—

विभागोऽपि त्रिधा भवेत् ।

एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥ ११९ ॥

विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।

हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ १२० ॥

विभाग इति ।

एककर्मेति । तदुदाहरणं तु श्येनशैलविभागादिकं पूर्ववद् बोध्यम् ।

मुक्तावलीमयूखः ।

संयोग इत्यर्थः । घटकपालयोः समवायस्य संयोगत्ववारणाय अप्राप्तयोरिति । घटकपालौ न पृथक्सिद्धौ कपाले एव घटोपलम्भादिति भावः ।

संयोगजोऽपरः इति । ननु संयोगजसंयोगे मानाभावः यत्र कपालक्रियया कपालतरुसंयोगः ततः कुम्भतरुसंयोगस्तत्र कपालक्रियाया एव कुम्भतरुसंयोगं प्रति कारणत्वं न तु कपालतरुसंयोगस्येति चेद् ।

न समवायेन संयोगं प्रति समवायेन क्रियायाः कारणत्वम् कुम्भे समवायेन क्रियाया अभावेन कुम्भे तरुसंयोगानुपपत्तेः क्रियायाः सामानाधिकरण्येन हेतुत्वान्तरकल्पनापेक्षया समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यादित्यलम् ।

पूर्ववदिति । संयोगवदित्यर्थः ॥ ११५–११९ ॥

न्यायसिद्धान्तमुक्तावली।

तृतीयोऽपि-विभागजविभागः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति द्विविधः।

आद्यस्तावत्–यत्र कपाले कर्म ततः कपालद्वयविभागः, ततो घटारम्भकसंयोगनाशः, ततो घटनाशः, ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागो जन्यते, तत आकाशसंयोगनाशः, तत उत्तरदेशसंयोगः, ततः कर्मनाश इति।

न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यम्, एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात्, तस्माद् यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्तदारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत्।

न च कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम्,

आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात्।

द्वितीयस्तावत्–यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति, तत्र शरीरतरुविभागे हस्तक्रिया न कारणं—व्यधिकरणत्वात्। शरीरे तु क्रिया नास्त्येव–अवयविकर्मणो यावदवयवकर्मनियतत्वात्। अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति। अत एव विभागो गुणान्तरम्, अन्यथा शरीरे विभक्तप्रत्ययो न स्यात्। अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति॥ ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥

मुक्तावलीमयूखः।

आरम्भकेति। आरम्भकसंयोगः कपालद्वयसंयोगादिः तत्प्रतिद्वन्द्वी तन्नाशक इति यावत्।

विकसदिति। तत्राग्रावच्छेदेनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वात्तेन कर्मणा मूलावच्छिन्नारम्भकसंयोगविरोधिविभागोत्पत्तिस्तेन चारम्भकसंयोगनाशस्तेन कमलनाशः स्यादिति भावः।

द्रव्यनाशात्पूर्वमिति। घटाद्यात्मकद्रव्यनाशात्पूर्वमित्यर्थः तथाच पूर्वोक्तं 'ततो घटनाशः ततः कपालस्याकाशविभागो जन्यते' इत्यसङ्गतमिति भावः।

सति द्रव्ये--द्रव्यनाशं विनेत्यर्थः।

देशान्तरविभागासम्भवादिति। अन्यथा कारणमात्रविभागे संयोगविभाग-

न्यायसिद्धान्तमुक्तावली: ।

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति—

परत्वं चापरत्वं च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् ॥ १२१ ॥
परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ १२२ ॥

परत्वमपरत्वं चेति । दैशिकमिति । दैशिकपरत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते, एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते । अत्रावधित्वार्थं पञ्चम्यपेक्षा, यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२१ ॥ १२२ ॥

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।

तयोर्दैशिकपरत्वापरत्वयोः । असमवायी—असमवायिकारणम् । तत्तदाश्रये—दैशिकपरत्वापरत्वाश्रये ॥

दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥ १२३ ॥
परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ॥ १२४ ॥

दिवाकरेति । अत्र परत्वमपरत्वं च कालिकं ग्राह्यम् । यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः स ज्येष्ठः, यस्य न्यूनः स कनिष्ठः । कालिकपरत्वापरत्वे जन्यद्रव्य एव । अत्र—कालिकपरत्वापरत्वयोः ॥ १२३ ॥ १२४ ॥

अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।

तेषां—कालिकदैशिकपरत्वापरत्वानाम् ॥

मुक्तावलीमयूखः ।

योरनपेक्षं कारणं कर्मेति कर्मलक्षणस्यातिव्याप्त्यापत्तेः कारणमात्रविभागस्य द्रव्यनाशमनपेक्ष्य विभागजनकत्वादिति भावः ॥ १२० ॥

मूर्त एव तु दैशिकमिति । विभुद्रव्ये विप्रकृष्टदेशमात्रवृत्तित्वसन्निकृष्टदेशमात्रवृत्तित्वबुद्धेर्निमित्तकारणस्य, दिक्संयोगस्यासमवायिकारणस्य चाभावादिति भावः।

जन्य एवेति । अत्र जन्यपदं सप्तम्यन्तम् नित्ये तत्पूर्वोत्पन्नत्वरूपज्येष्ठत्वबुद्धेः तदनन्तरोत्पन्नत्वरूपकनिष्ठत्वबुद्धेर्निमित्तकारणस्य, कालसंयोगरूपासमवायिकारणस्य चाभावादिति भावः ।

अपेक्षाबुद्धिनाशेनेति । स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः । परे तु बहुतरसंयोगान्तरितत्वरूपविप्रकृष्टत्वाल्पसंयोगान्तरितत्वरूपसंनिकृष्टत्वाभ्यां

न्यायसिद्धान्तमुक्तावली ।

क्रमप्राप्तां बुद्धिं निरूपयितुमाह—

**बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥ १२५ ॥**

**अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते ।**

बुद्धेरिति ॥

**अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ॥ १२६ ॥**

**तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।**

**तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ॥ १२७ ॥**

तत्राप्रमां निरूपयति—तच्छून्य इति । तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः ॥

तत्प्रपञ्चोऽप्रमाप्रपञ्चः ॥ १२५ ॥ १२६ ॥ १२७ ॥

**आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ।**

**भवेन्निश्चयरूपा या,**

आद्य इति । विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम्, एवं शङ्खादौ पीतः शङ्ख इत्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रम इति ॥

**संशयोऽथ प्रदर्श्यते ॥ १२८ ॥**

**किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।**

**तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः ॥ १२९ ॥**

किंस्विदिति । किंस्विदिति वितर्के ।

निश्चयस्य लक्षणमाह—तदभावेति । तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ॥ १२८ ॥ १२९ ॥

मुक्तावलीमयूखः ।

दैशिकपरत्वापरत्वव्यवहारस्य, बहुतरस्पन्दान्तरितजन्यत्वरूपज्येष्ठत्वाल्पतरस्पन्दान्तरितजन्यत्वरूपकनिष्ठत्वाभ्यां च कालिकपरत्वापरत्वव्यवहारस्योपपत्तेर्न तयोर्गुणान्तरत्वम् । अत्र च यत्काले ज्येष्ठत्वबुद्धिरुत्पद्यते तत्कालमादाय स्पन्दन्यूनाधिकते अवसेये । अतो न कनिष्ठेऽधिकजीविनि परत्वव्यवहारापत्तिरिति वदन्ति ॥ १२१–१२५ ॥

तदभाववतीति । तत्प्रकारकं ज्ञानमित्येतन्मात्रोक्तौ प्रमायामतिव्याप्तिरतस्तदभाववतीति । तदभाववद्विशेष्यकतदभावप्रकारकप्रमायामतिव्याप्तिवारणाय तत्प्रकारकमिति । इच्छायातिव्याप्तिवारणाय ज्ञानमिति ॥ १२६–१२८ ॥

तदभावाप्रकारकमिति । संशयेऽतिव्याप्तिवारणायेदम् । अत्र च तद्विशेष्यक-

न्यायसिद्धान्तमुक्तावली ।

संशयं लक्षयति—

**स संशयो मतिर्या स्यादेकत्राभावभावयोः ।**

**साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥**

स संशय इति । एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः ।

साधारणेति । उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् । यथोच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वायं स्थाणुर्न वेति सन्दिग्धे ।

एवमसाधारणधर्मज्ञानमपि कारणम् । यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे ।

विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकार-

मुक्तावलीमयूखः ।

त्वावच्छिन्नतदभावप्रकारताशून्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानत्वं यत्र तत्र तन्निश्चयत्वमवसेयम् । नतु यथाश्रुतम् 'महानसोयं वह्निमान्नवा, पर्वतो वह्निमान्' इत्यस्य पर्वते वह्निनिश्चयत्वानापत्तेः । ज्ञानपदमिच्छायामतिव्याप्तिवारणाय ।

एकधर्मिकेति । एकधर्मिकं ज्ञानं संशय इत्युक्तौ घटो द्रव्यं पृथिवी चेति ज्ञानेऽतिव्याप्तिरतोभावाभावेति । ह्रदपर्वतौ वह्नितदभाववन्तौ इत्यत्रातिव्याप्तिवारणाय एकधर्मिकेति । वृक्षः संयोगवांस्तदभाववांश्चेति समुच्चयवारणाय विरुद्धेति । इच्छाव्युदासार्थं विशेष्यदलम् तथा च एकधर्मिकेत्यस्य एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः तेन पर्वतो वन्हिमान् द्रव्यं वह्न्यभाववदिति ज्ञानव्युदासः ॥

वस्तुतस्तु एकधर्मावच्छिन्नविशेष्यकत्वानिवेशे पर्वतो वह्निमान् द्रव्यं वह्न्यभाववदिति ज्ञानेऽतिव्याप्तिः निवेशे च निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयासंग्रहः इति स्वीयैककोटिप्रकारतावच्छिन्नप्रतिवध्यतानिरुपितप्रतिबन्धकतावच्छेदकीभूतापरकोटिप्रकारताशालिज्ञानत्वं संशयत्वमिति ध्येयम् ।

न संशयकारणमिति । समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः इति हि गौतमं सूत्रम् अयमर्थः समानधर्मः कोटिद्वयसहचरितधर्मः साधारणो धर्मः ऊर्ध्वत्वादिकमिति यावत्, अनेकस्मात सपक्षाद् विपक्षाच्च व्यावृत्तो धर्मः असाधारणोधर्मः नित्यानित्यव्यावृत्तशब्दत्वादिकमिति यावत् , तयोरुपपत्तेर्ज्ञानात् संशयः अर्थात् साधारणधर्मज्ञानमसाधारणधर्मज्ञानं च संशयजनकं, विप्रतिपत्तिः विरुद्धकोटिप्रतिपादकं वाक्यं शब्दो नित्यो नवेतिरूपं संशयजनकम्, उपलब्धिः प्रामाण्यम् अनुपलब्धिरप्रामाण्यं तयोरव्यवस्था संशयः प्रमाण्यसंशयः अप्रामाण्यसंशयश्च विषयसंशयकारणम् , चात् व्याप्यसंशयजन्यो व्यापकसंशय इत्यादेः संग्रहः । विशेषापेक्षो विमर्श इति लक्षणम्

न्यायसिद्धान्तमुक्तावली ।

णं-शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात् । किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस एवेति ।

एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशय इति । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसंनिकर्षो वा कारणमिति ॥ १३० ॥

**दोषोऽप्रमाया जनकः, प्रमायास्तु गुणो भवेत् ।**

दोष इति । अप्रमां प्रति दोषः कारणम्, प्रमां प्रति गुणः कारणम् । तत्रापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धम् । गुणस्य प्रमाजनकत्वं तु अनुमानात्सिद्धम् । यथा प्रमा ज्ञानसाधारणकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत् ।

न च दोषाभाव एव कारणमस्त्विति वाच्यम्, पीतः शङ्ख इति ज्ञान-

न्यायसिद्धान्तमुक्तावली ।

एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान् विशेषापेक्षः विमर्शः ज्ञानमिति एवं च साधारणासाधरणधर्मज्ञानस्यैव संशयजनकत्वे विप्रत्तिपत्तेः संशयाजनकत्वेन सूत्रविरोध इत्यत आह किंत्विति—

मानस एवेति । तथा च विप्रतिपत्तेरित्यत्र पञ्चम्या न जन्यत्वमर्थः किन्तु प्रयोज्यत्वमिति न सूत्रविरोध इति भावः ।

प्रामाण्यसंशयादिति । प्रामाण्यमपदप्रामाण्यस्याप्युपलक्षणम् तेन अप्रामाण्यसंशयादपि विषयसंशय इति लभ्यते ।

व्याप्यसंशयादिति । ननु व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे मानाभावः कोटिस्मरणादित एव तत्संभवादिति चेन्न महानसे हुताशो न जलह्रदे इति स्मरणवतः पर्वतमपि पश्यतः धूमसंशयसत्त्वासत्त्वाभ्यां हुताशनसंशयसत्त्वासत्त्वदर्शनाद् व्याप्यसंशयस्य व्यापकसंशयहेतुत्वसिद्धेरिति ।

न च साधारणधर्मज्ञानादेः संशयजनकत्वे परस्परं व्यभिचार इति वाच्यम् कार्यतावच्छेदकेऽव्यवहितोत्तरत्वनिवेशेनादोषात् ।

ननु साधारणधर्मज्ञानादेरिव धर्मिज्ञानस्यापि संशयजनकत्वात् तत्कृतः संशयविभागः कुतो न कृत इत्यत आह—किन्त्विति ।

संशये—संशयमात्रे । तथा च संशयत्वसमव्याप्तत्वात् धर्मिज्ञानजन्यतावच्छेदकस्य न संशयविभाजकतावच्छेदकत्वमिति भावः ।

ननु धर्मिज्ञानस्य संशयजनकत्वे मानाभावः न च धर्मिज्ञानमन्तरेण संशयापत्तिरेव मानमिति वाच्यम् इन्द्रियसंनिकर्षे सतीष्टापत्तेरित्याह-इन्द्रियसंनिकर्षोवेति॥ १३०॥

भगवज्ज्ञाने व्यभिचारवारणाय हेतौ जन्येति ।

न्यायसिद्धान्तमुक्तावली ।

स्थले पित्तदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात्, विनिगमनाविरहाद-नन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणस्य कारणताया न्याय्यत्वात् ।

न च गुणसत्त्वेऽपि पित्तेन प्रतिबन्धाच्छङ्खे न श्वैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यंतथाच किं गुणस्य हेतु-त्वकल्पनयेति वाच्यम्, तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्व-सिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वात् ।

पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥ १३१ ॥

तत्र दोषाः के इत्याकाङ्क्षायामाह-पित्तेति । क्वचित्पीतादिभ्रमे पित्तं दोषः, क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः, क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं रूपा दोषा अननुगता एव भ्रान्तिज-नका इत्यर्थः ॥ १३१ ॥

अथ के गुणाः ? इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान्दर्शयति--

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।

संनिकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥ १३२ ॥

पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।

शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३३ ॥

शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा ।

गुणः स्यात्, भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥

प्रत्यक्षे त्विति । प्रत्यक्षे विशेषणवद्विशेष्यसंनिकर्षो गुणः । अनुमि-तौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण एवमग्रेऽप्यूह्यम् ।

प्रमां निरूपयति-भ्रमभिन्नमिति ॥ १३२ ॥ १३३ ॥ १३४ ॥

मुक्तावलीमयूखः ।

दोषाभाव एवेति । तथा चार्थान्तरमिति भावः ।

ननु पित्तात्मकदोषाभावः श्वैत्यप्रमायामेव कारणं न शङ्खप्रमायामत आह—विनिगमनाविरहादिति । प्रमायां दोषाभावः गुणो वा कारणमित्यत्र विनिगम-नाविरहादिति भावः ।

वस्तुतो गुणहेतुतायामेव विनिगमकमस्तीत्याह—न्याय्यत्वादिति ।

गुणस्यापीति । तथा च पित्तादिदोषाभावसत्त्वेऽपि विशेषणवद्विशेष्यरूपगुणा-भावान्न शङ्खे पीतत्वप्रमेति दोषाभावेन न गुणस्यान्यथासिद्धिरिति भावः ।

शक्ये इति । गवयो गवयपदवाच्यइत्युपमितौ गवयत्वावच्छिन्ने शक्ये सादृश्य

न्यायसिद्धान्तमुक्तावली।

ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावादत आह—

अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्।
तत्प्रमा, न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥१३५॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्।

अथवेति। तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः। अथैवं स्मृतेरपि प्रमात्वं स्यात्, ततः किमिति चेत्, तथासति तत्करणस्यापि प्रमाणान्तरत्वं स्यादिति चेद्—न यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात्।

इदं तु बोध्यम्। येन सम्बन्धेन यद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकत्वं तेन सम्बन्धेन तत्प्रकारकत्वं च वाच्यम्, तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः।

एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावादत आह–न प्रमेति।

ननु वृक्षे कपिसंयोगज्ञानं भ्रमः प्रमा च स्यादिति चेद् न–प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्।

नच वृक्षे कपिसंयोगाभावावच्छेदेन संयोगज्ञानं भ्रमो न स्यात्तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्, तत्र संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। लक्ष्यस्याननुगमाल्लक्षणाननुगमेऽपि न क्षतिः॥ १३५॥

मुक्तावलीमयूखः।

ज्ञानं कारणम् शाब्दबोधे योग्यताप्रमा तात्पर्यप्रमा वा कारणमित्यर्थः॥१३१-१३४॥

तद्वद्विशेष्यकत्वे सतीति। तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमित्यर्थः। सति सप्तम्या अवच्छिन्नार्थकत्वात् तत्प्रकारकभ्रमेऽतिव्याप्तेस्तद्वद्विशेष्यकेति। रजते एव द्रव्यमिति बुद्धेरजतत्वप्रमात्वापत्तिरतस्तत्प्रकारकेति। ज्ञानपदं तादृशेच्छायामतिव्याप्तिवारणाय। एवं—तत्प्रकारकत्वनिवेशे इत्यर्थः।

संयोगाभावावच्छेदेनेति। मूलावच्छेदेन संयोगाभाववति वृक्षे मूलावच्छेदेन संयोगवान् इति बुद्धेर्भ्रमत्वं न स्यादित्यर्थः।

भ्रमत्वादिति। तदर्थं संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानं भ्रम इति लक्षणान्तरस्य स्वीकर्तव्यत्वादिति भावः।

नन्वेवं लक्ष्याननुगम इत्यत आह—लक्ष्यस्येति।

न्यायसिद्धान्तमुक्तावली ।

**प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥ १३६ ॥**

प्रमात्वमिति । मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति ।

तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात्तज्ज्ञानप्रमाण्यं तेनैव गृह्यते ।

भाट्टानां मते ज्ञानमतीन्द्रियम्, ज्ञानजन्या ज्ञातता प्रत्यक्षा, तया च

मुक्तावलीमयूखः ।

अथ पाकघटे श्यामरूपवत्ताप्रतीतेः प्रमात्वं स्यादिति चेद्दिष्टापत्तेः । घटस्य कदाचिच्छ्यामत्वात् वर्तमानत्वस्य च प्रमात्वाघटकत्वादित्यलम् ॥१३९॥

प्रमात्वं—तद्वति तत्प्रकारकत्वम् ।

न स्वतो ग्राह्यमिति ।

प्रामाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः ।
नैयायिकास्ते परतः, सौगताश्चरमं स्वतः ॥
प्रथमं परतस्त्वाहुः प्रामाण्यं, वेदवादिनः ।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम् ॥

इति मतसंग्रहः सर्वदर्शनसंग्रहे ।

स्वतोग्राह्यमित्यत्र स्वपदमात्मपरमात्मीयपरं च । तत्र गुरुः प्रभाकरः तन्मते स्वपदमात्मपरं तन्मते हि घट इति ज्ञानं ज्ञाता ज्ञेयं चेति त्रितयं भासते अत एव ते त्रिपुटीप्रतिभासवादिन इत्युच्यन्ते इति एतन्मते ज्ञानस्य स्वप्रकाशत्वात् स्वनिष्ठप्रामाण्यं तद्वतितत्प्रकारकत्वरूपं स्वेन गृह्यते । तदाहुर्गुरुमतानुयायिनः—

अर्थक्रियाज्ञानात्संवादाद् गुणवत्कारणज्ञानाद्वा ज्ञानप्रामाण्यनिश्चय इति पूर्वपक्षः ।

सिद्धान्तस्तु न ज्ञानमव्यभिचारनिश्चयमुखेनार्थं निश्चिनोति किन्तु स्वत एव यदि स्वतो निश्चेतुं न शक्नुयात् तदा निश्चयस्यात्यन्तासंभव एव इत्यान्ध्यमशेषस्य जगतो भवेत नहि स्वतोऽनिश्चितोऽर्थः परतोऽपि निश्चेतुं शक्यते परस्यापि पूर्ववदेवासामर्थ्यात् यथा घटज्ञानमसत्यपि घटे दृष्टमित्यनिश्चायकं तथार्थक्रियाज्ञानमपि स्वप्नावस्थायामसत्यामेव च तस्यां दृष्टमिति न केनापि निश्चेतुं शक्यते तथा घटनिश्चयस्तु दूरत एव तथा संवादो नाम तद्विषयं ज्ञानान्तरम् तस्य पूर्वज्ञानात्को विशेषः येन तेनानिश्चितमनेन निश्चीयेत तथा गुणज्ञानादपि गुणो निश्चेतुं न शक्यते किं पुनः पूर्वज्ञानप्रामाण्यम् तस्मात्स्वत एव प्रामाण्यम् परतस्त्वप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा वेदे तु दोषाभावात् स्वतः प्राप्तं प्रमाणत्वं सुस्थमिति ।

**तेनैव गृह्यते इति ।** ज्ञाने गृह्यमाणे ज्ञाननिष्ठज्ञानत्वादिधर्मवत् तन्निष्ठप्रामाण्यमपि ज्ञानग्राहकसामग्र्यैव गृह्यते इति तन्मते अयं घटो घटमहं जानामीत्यकारकं ज्ञानमिति भावः ।

न्यायसिद्धान्तमुक्तावली ।

ज्ञानमनुमीयते ।

मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते । विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः ।

तन्मतं दूषयति–न स्वतो ग्राह्यमिति । संशयेति । यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्, तदाऽनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात् । तत्र हि यदि ज्ञानं ज्ञातं तदा त्वन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः, यदि ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात्कथं संशयः । तस्माज्ज्ञाने

मुक्तावलीमयूखः ।

भट्टानां–कुमारिलभट्टानां मते ज्ञानजन्यया प्राकट्यापरपर्यायया विषयनिष्ठया ज्ञाततया ज्ञानप्रामाण्यमनुमेयमिति एतन्मते स्वतोग्राह्यमित्यत्रत्यं स्वपदमात्मीयपरं ततश्च स्वीयया ज्ञाततया प्रामाण्यं गृह्यते इत्यर्थः ।

तथा चेति । इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात् या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या यथा पटे पटत्वप्रकारिका ज्ञाततेति ।

तथा चाहुः शास्त्रदीपिकाकाराः । ज्ञानक्रिया हि सकर्मिका कर्मभूतेऽर्थे फलं जनयति पाकादिवत् तच्च फलमैन्द्रियकं ज्ञानजन्यमापरोक्ष्यम् लिङ्गादिज्ञानजन्यं तु पारोक्ष्यम् । अस्ति हि विषयाविषयविभागः सार्वजनीनः न च फलमन्तरेणायं विभागः सम्भवतीति तदाश्रीयते तदेव च फलं कार्यभूतं कारणभूतं विज्ञानमुपकल्पयति इति सिध्यत्यप्रत्यक्षमपि ज्ञानमिति । अर्थगतो वा ज्ञानजन्योतिशयः कल्पयति ज्ञानम् । अवश्यमङ्गीकरणयश्चायमतिशयस्त्रितयप्रतिभासवादिभिरपीति ।

मुरारिमिश्राणां मते ज्ञानमनुव्यवसायेन गृह्यते इति विषयनिरूप्यं ज्ञानमतो ज्ञाने गृह्यमाणे घटत्वप्रकारत्वं गृह्यते इति एतन्मतेऽपि स्वतोग्राह्यमित्यत्रत्यं स्वपदमात्मीयपरं स्वीयेन स्वविषयकज्ञानेन स्वप्रामाण्यं गृह्यते इत्यर्थः अत एव मुरारेस्तृतीयः पन्था इति लोकोक्तिः इतीमे त्रयोपि मीमांसकाः तत्र मुरारिमिश्राणां मतप्रतिपादकः कोऽपि ग्रन्थो न मिलतीति महान् खेदः ।

अनुव्यवसायेनेति । व्यवसायः ज्ञानम् अनुव्यवसायः ज्ञानानन्तरं जायमानं ज्ञानविषयकं ज्ञानम् ।

ननु ज्ञानज्ञानस्य विषयाविषयकत्वात् कथं विषयघटितप्रामाण्यं तस्य विषय इत्यतो ज्ञानज्ञानस्य विषयविषयकत्वे प्रमाणमाह–विषयनिरूप्यमिति । तथा च ज्ञानं विषयविषयकतानियतस्वविषयताकप्रत्यक्षकं विषयाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वादित्यनुमानं ज्ञानप्रत्यक्षविषयविषयकत्वे प्रमाणमिति भावः ।

अनभ्यासदशेति । अनवधृतप्रामाण्यकेत्यर्थः ।

न्यायसिद्धान्तमुक्तावली ।

प्रामाण्यमनुमेयम् ।

तथाहि—इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात्, यन्नैवं, तन्नैवं, यथाऽप्रमा । इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् । एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारज्ञानत्वात् ।

न च हेतुज्ञानं कथं जातमिति वाच्यम्, पृथवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् । तत्र गन्धाग्रहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् । तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संश(१)यानुरोधात् ।

ननु सर्वेषां ज्ञानानां यथार्थत्वात्प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं

मुक्तावलीमयूखः ।

ज्ञातमेव—निश्चितमेव । गन्धवतीति । व्याप्यवति व्यापकप्रकारकत्वस्य व्यापकवति व्यापकप्रकारकत्वव्याप्यत्वादिति भावः ।

ननु सर्वेषां ज्ञानानां यथार्थत्वादिति । इदं हि प्रभाकरमतं तन्मते याथार्थ्यं सर्वज्ञान साधारणं सर्वस्य ज्ञानस्यार्थाव्यभिचारित्वेन तन्नियमात् ।

ननु कथमव्यभिचारः इदं रजतं पीतश्शङ्खः इत्यादिविपर्ययस्य, स्थाणुर्वापुरुषोवेत्यादेः संशयस्य; स्वप्नस्य, वाऽतथात्वात् रजतप्रतिपत्तिश्च पुरोगतां शुक्तिमेव रजतत्वेनाध्यवस्यति रजतमात्रगोचरत्वे च 'इदं रजतम्' इति सामानाधिकरण्यं न स्यात् र-

---

संशयानुधादिति । एतदन्तरम्—

( १ ) न च प्रमात्वस्य प्रसिद्धिः कथमिति वाच्यम् ज्ञानप्रमात्वस्य स्वतो ग्राह्यत्वात् । न च प्रकारभेदेन प्रमाण्यभेदाद् घटत्वप्रकारकत्वादेः कथं प्रसिद्धिरितिवाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतो ग्राह्यत्वात् घटस्य च पूर्वमुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः व्यवसायपरं तु प्रामाण्यं न गृह्यते तत्र संशयसामग्रीसत्वे संशयस्यैवोपपत्तेः किं चाभ्यासदशायां तृतीयानुव्यवसायादिना प्रामाण्यस्य स्वतएव ग्रहसम्भवात् प्रथमानुव्यवसायपरं न तद्ग्राहकमिति कल्प्यते संशयानुरोधात् ।

अथप्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषयनिश्चयरूपत्वार्थं तत्र प्रमाण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलमुखी कारणमुखी वाऽनवस्थेति चेद्—न—अगृहीताप्रमाण्यग्राहकस्यैव निश्चयरूपत्वात् यत्र च प्रामाण्यसंशयस्तत्रैव प्रमाण्यानुमितेरपेक्षा यावदाशङ्कं प्रामाण्यानुमितिरिष्यत एव सर्वत्र तु न संशयः क्वचित्कोट्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसंचारादिति संक्षेपः । इति विद्याविलासमुद्रिते **महामहोपाध्याय लक्ष्मणशास्त्रि** द्राविडसंशोधितेऽधिकः पाठः स च दिनकरेणाव्याख्यातत्वात्प्रक्षिप्त इव प्रतिभाति ।

मुक्तावलीमयूखः ।

जतार्थिनः पुरोवर्तिनि शुक्तिशकले प्रवृत्तिर्न स्यात् अवगतिप्रतिपत्त्योरेकविषयत्वात् एवं पीतः शङ्ख इत्यादिवित्तयोऽप्यन्यथाख्यातिरूपाः इति चेद्—

उच्यते यस्यां संविदि योऽर्थो ऽवभासते स तस्या विषयो नान्यः तस्य तत्रानवभासात् अनवभासमानस्य विषयत्वेऽतिप्रसङ्गात् तेनान्यस्यान्यथाभानं प्रतीतिविरुद्धमेव ततोऽत्र न रजतप्रतीतिः शुक्तिगोचरा तत्र तस्यानवभासात् । किन्तु रजतगोचरैव ।

ननु तर्हि पुरोर्तिनि इदं रजतवमिति विशिष्टधीनिर्वाहः कथम् ? इत्थम् प्रथममिन्द्रियार्थसन्निकर्षे सति शुक्तिकामात्रमगृहीतविशेषधर्मकम् 'इदम्' इति सामान्येन गृह्यते तदनु दोषवशात तदंशविकलं तत्सदृशं रजतमात्रं स्मर्यते लोके च सदृशदर्शनात्सदृशस्मृतिर्दृष्टैव तच्च स्मरणं तदंशप्रमोषादनुभवसमानाकारं एतावत्तावदावयोरविवादम् तत्र गृह्यमाणस्मर्यमाणयोर्ग्रहणस्मरणयोर्वा भेदाग्रहात् केवलसामान्याकारोपलम्भाद्विशिष्टव्यवहारः न तु विशिष्टधीतः तत एव प्रवृत्तिरपि युक्ता उत्तरकालं च भेदग्रहणे व्यवहारविसंवादाद्बाधोऽप्युपपन्नः स च न पूर्वज्ञानविषयापहारः तयोर्यथार्थत्वात् किन्तु व्यवहारविसंवाद एव न हि ज्ञानं बाध्यं तस्य यथार्थत्वात् किन्तु व्यवहार एव ।

ननु भवेन्नामेदमंशोऽनुभवः रजतांशस्तु कथं स्मृतिः तत्तांशप्रमोषात् न हि तत्र तदिति प्रतीतिरुदेति ततोनुभवत्वमेवोचितम् सत्यम् न तावच्चाक्षुषोऽनुभवः तदसंप्रयोगात् । नाप्यनुमितिर्लिङ्गाभवात परिशेषात् स्मृतिरेव तदंशप्रमोषस्तु दोषवशात् अत एव पामराणां तत्रानुभवव्यवहारः परीक्षकाणां त्वन्यथा ।

ननु यद्गोचरं ज्ञानं तत्रैव प्रवृत्तिः रजतज्ञानं च न शुक्तिगोचरं अतः कथं तत्र प्रवृत्तिरिति चेत्सत्यम् सम्यग्रजतस्थले तथैव अत्र तु सा केवलभेदाग्रहनिबन्धना ।

तथा पीतशङ्खबोधोऽपि यथार्थ एव तथा हि नेत्रवर्तिनि स्वच्छे पित्तद्रव्ये तद्रश्मिभिः सह निर्गते तद्गतपीतिमाऽत्र गृह्यते तथा दोषवच्छङ्खमात्रं च परस्परसाकाङ्क्षयोस्तयोर्विद्यमानोऽप्यसंबन्धो न बुध्यते ततश्च तत्रासम्बन्धाग्रहाद्विशिष्टधीव्यवहारः प्रवृत्तिरपि तत एव ।

द्विचन्द्रज्ञानेऽप्यङ्गुल्यवष्टम्भादिदोषाद्विधोः प्रविभक्तो नायनरश्मिरेकस्मिश्चन्द्रमसि द्वित्वं जनयति तत्र द्वित्वस्य चन्द्रमसश्चासंबन्धाग्रहाद् द्वौ चन्द्रावित्येवं व्यवहारः । तथा सर्वतोदिशमाशुसंचारिण्यलातदण्डेऽपि निरन्तरधियोजायन्ते तत्रान्तरालाग्रहणाच्चक्रबुद्धिव्यवहारः अलाते च चक्रव्यवहारः तथादर्पणे नयनरश्मिर्निपतितः प्रथमं सविशेषं दर्पणं गृह्णाति पश्चात्तु प्रतिहतः परावृत्तो मुखमात्रं तत्र दर्पणस्य मुखस्य च भेदाग्रहाद्दर्पणे मुखव्यवहारः ।

स्वप्नस्तु स्मृतिरेव न ह्यननुभूते स समुदेति दोषाच्च तत्ताप्रमोषः ।

तथा संशयोऽपि नैकं ज्ञानं किन्तु द्वे एते स्थाणुत्वपुरुषगोचरे प्रमुष्टतत्तांशे परस्परविनिर्मुक्ते पुरस्थितोर्ध्ववस्तुदर्शनाज्जायमाने स्मृतिरूपे एतत्सर्वं यथार्थमेव परस्परवि-

न्यायसिद्धान्तमुक्तावली ।

व्यर्थम्—

न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात्-तव मते भ्रमस्याभावादिति वाच्यम्, तत्र हि दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् ।

सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात्तदेव कारणम्, अस्तु वा तत्रापि रजतभेदाग्रहः एव कारणमिति ।

न चान्यथाख्यातिः सम्भवति, रजतप्रत्यक्षकारणस्य रजतसंनिकर्षस्याभावाद्रङ्गे रजतबुद्धेरनुपपत्तेरिति चेद्--

न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वादन्यत्रापि तत्कल्पनात् ।

न च संवादिप्रवृत्तौ तत्कारणं, विसंवादिप्रवृत्तौ च भेदाग्रहः कारणमिति वाच्यम्, लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् ।

इत्थं च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्यादोषत्वात् ।

मुक्तावलीमयूखः ।

निर्मुक्तयोस्तयोर्विशेषयोः पुरःस्थिते धर्मिणि एकस्यापि व्यवस्था नास्तीति व्यवस्थितव्यवहारं प्रवर्तयितुमशक्नुवन् संशेत इति भवति तत्र संशयव्यवहारोऽतः सर्वं ज्ञानं यथार्थमिति सिद्धम् ।

अतएव श्रीभाष्यकारैरपि 'यथार्थं सर्वविज्ञानमिति वेदविदांमतम्' इत्युक्तम् ।

व्यर्थमिति । तद्व्यावर्त्याया अन्यथाख्यातेरभावात् ।

भ्रमजन्येति । न्यायनये भ्रमजन्या प्रवृत्तिस्त्वन्मते न स्यादिति भावः ।

भ्रमस्य—अन्यथाख्यातेः । तत्र—रङ्गगोचरविसंवादिरजतार्थिप्रवृत्तौ । रजते 'इदं रजतम्' इति ज्ञानकाले रजतभेदाग्रहसत्त्वाद्विसंवादिप्रवृत्त्यापत्तिवारणाय दोषाधीनस्येत्युक्तं न्यायनये दोषाधीनो यो रजतभ्रमस्तत्स्थानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषाधीनत्वादिति भावः ।

हेतुत्वादिति । न्यायनयेऽपि 'इदं रजतम्' इतिभ्रमे हेतुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव हेतुत्वं युक्तं तद्धेतोरेव तत्त्वे किंतेनेति न्यायादिति भावः ।

ननु रजतत्वांशे संनिकर्षाभावान्नान्यथाख्यातिः संभवति इत्यत आह इत्थं चेति । प्रवृत्तिमात्रे विशिष्टबुद्धेर्हेतुत्वसिद्धौ चेत्यर्थः । स्वसंयुक्तमनःसंयुक्तात्मसमवेतस्मृतिविषयत्वरूपज्ञानलक्षणप्रत्यासत्त्या रजतत्वस्य भानमिति भावः ।

फलमुखेति । निषादस्थपत्यधिकरणसिद्धान्तसिद्धोऽयं न्यायः । तथाहि 'वास्तुमयं रौद्रं चरुं निर्वपेत्' इति प्रकृत्य श्रूयते 'एतया निषादस्थपतिं

न्यायसिद्धान्तमुक्तावली।

किञ्च ( यत्र ) रङ्गरजतयोरिमे रजते रङ्गे वेति ज्ञानं जातं तत्र न कारणबाधोऽपि।

अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात्, त्वन्मते दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात्।

किञ्चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा। यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितम्। ( सेयमुभयतःपाशा रज्जुः )।

इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं रङ्गं रजततयाऽवेदिषमित्यनुभवादिति सङ्क्षेपः॥ १३६॥

मुक्तावलीमयूखः।

याजयेत्' अत्र संशयः निषादानां स्थपतिः इति षष्ठीतत्पुरुषेण निषादस्वामी कश्चित्त्रैवर्णिकः, निषादश्चासौ स्थपतिरिति कर्मधारयेण निषाद एव वा विवक्षितः तत्र निषादस्य सङ्कीर्णजातिमतो वेदानधिकरात् षष्ठीतत्पुरुषेण त्रैवर्णिक एवेति पूर्वपक्षे षष्ठीतत्पुरुषे निषादपदस्य निषादसम्बन्धिनि लक्षणायां गौरवेण लाघवात् कर्मधारय एव ततश्च एतद्यागोपयोगिमन्त्रेष्वधिकारः निषादस्य कल्प्यते इति सिद्धान्तः। अनेन आदौ लाघवमनुसृत्यान्ते गौरवसहनं न दोषावहमिति स्पष्टमेवावगम्यत इति।

ननु ममापि प्रवृत्तिमात्रे भेदाग्रह एव कारणं न तु विसम्वादिप्रवृत्तिस्थले भेदाग्रहः सम्वादिप्रवृत्तिस्थले च विशिष्टज्ञानं कारणमिति वैषम्यमित्यपरितोषादाह—किञ्चेति। यत्र रङ्गे रजते च युगपदिन्द्रियसंनिकर्षात् रजतरङ्गयोः इमे रजते रङ्गे वेति ज्ञानं जातं तत्र रजतत्वेन रङ्गत्वेन च स्वसंयुक्तसमवायस्य सत्त्वात् रजते रङ्गत्वस्य रङ्गे रजतत्वस्य वा भानसम्भवात् अन्यथाख्यातिस्वीकारे बाधकाभावः न चेदं प्रमेतिभ्रमितव्यं विशेषणद्विशेष्यसंनिकर्षरूपप्रमासामग्र्यभावादिति भावः।

ननु तत्तद्विशेष्ये तत्तद्विशिष्टबुद्धिं प्रति तत्तद्विशेषणे तत्तद्विशेष्यघटितसन्निकर्षो हेतुः। तथाच रजतघटितसंयुक्तसमवायेन रङ्गे न रजतत्वभानसम्भव इति नान्यथाख्यातिसम्भव इत्यत आह—अपिचेति।

प्रवृत्तिनिवृत्ती इति। रजते इष्टभेदाग्रहरूपा प्रवृत्तिसामग्रीसत्त्वेन प्रवृत्तिः, रङ्गे अनिष्टभेदाग्रहरूपनिवृत्तिसामग्रीसत्त्वेन च निवृत्तिः स्यादिति भावः।

रङ्गे रङ्गभेदग्रहे—इत्यस्य रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वेनेत्यादिः। तथा च रङ्गभेदाग्रहे सति दोषादेव रङ्गभेदग्रहो वाच्य इति अन्यथाख्यात्यापत्तिरिति भावः।

न्यायसिद्धान्तमुक्तावली।

पूर्वं व्याप्तिरुक्ता, तद्ग्रहोपायस्तु न दर्शित इत्यतस्तं दर्शयति—

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे, तर्कः क्वचिच्छङ्कानिवर्तकः॥ १३७॥

व्यभिचारस्येति। व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणम्। व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात्तदभावः कारणमित्यर्थः।

एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता। भूयोदर्शनं तु न कारणं-व्यभिचारास्फूर्तौ सकृद्दर्शनेऽपि क्वचिद्व्याप्तिग्रहात्। क्वचिद्व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमुपयुज्यते।

यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकस्तर्कोऽपेक्षितः। तथाहि-वह्निविरहिण्यपि धूमः स्यादिति यद्याशङ्का भवति, तदा सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसन्धानान्निवर्तते। यद्ययं वह्निमान्न स्यात्तदा धूमवान्न स्यात् कारणं विना कार्यानुत्पत्तेः। यदि च क्वचित्कारणं विनापि कार्यं भविष्यति तदाऽहेतुक एव भविष्यतीति तत्राप्याशङ्का भवेत्, तदा सा व्याघातादपसारणीया। यदि हि कारणं विना कार्यं स्यात्, तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य वा नियमत उपादानं

मुक्तावलीमयूखः।

ननु रङ्गे रजतभेदाग्रहप्रयोजकदोषस्य प्रतिबन्धकस्य सद्भावान्न रङ्गे निवृत्तिः एवं रजते रङ्गभेदाग्रहप्रयोजकदोषस्य प्रतिबन्धकस्य सद्भावान्न प्रवृत्तिरित्यत आह—किञ्चेति।

भेदाग्रहस्य—व्याप्यवद्भेदाग्रहस्य।

ननु ह्रदे वह्निव्याप्यधूमवद्भेदाग्रहान्न ह्रदो वह्निमान् इत्यन्यथाख्यातिरूपानुमितिः किन्तु अनुभवस्मरणरूपं ज्ञानरूपमेवागृहीतसंसर्गकमित्यरुचेराह—इत्थं चेति। तथा चानुव्यवसाय एवान्यथाख्यातौ प्रमाणमिति भावः॥ १३६॥

ननु प्रमाण्यस्यानुमानगम्यत्वं प्रतिपादितं तच्चानुमानस्य प्रमाणत्वसिद्धौ स्यात् तदेवेन ग्राहकाभावेन व्याप्तिज्ञानाभावादतः प्रमाण्योपपादकत्वेनोपोद्घातसङ्गत्या व्याप्तिग्रहोपायमाह—पूर्वमिति।

प्रतिबन्धकत्वादिति। कारणीभूताभावप्रतियोगित्वं हि प्रतिबन्धकत्वम्।

यद्ययमिति। अयं—धूमवान्पर्वतः। कारणं विनेति। तथाच यदि धूमो वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादिति तर्काकारो बोध्यः। यथाश्रुतं तु न युक्तं तस्य विषयपरिशोधकत्वेन व्याप्तिग्रहानौपयिकत्वादिति ध्येयम्।

व्याघातमेव दर्शयति—यदि हीति।

ननु तर्कप्रत्यापाद्यापादकवत्ताज्ञानं कारणं तत्र व्याप्तिज्ञानप्रतिबन्धकव्यभिचारश-

न्यायसिद्धान्तमुक्तावली ।

तवैव न स्यादिति । यत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तम्—तर्कः क्वचिच्छङ्कानिवर्तक इति ॥ १३७ ॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति—

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥ १३८ ॥

साध्यस्येति । साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकत्वमुपाधित्वमित्यर्थः ।

स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वं नोपाधिः स्यात्—तस्य साध्यव्यापकत्वाभावाच्छ्यामत्वस्य घटादावपि सत्त्वात्,

मुक्तावलीमयूखः ।

ङ्कानिवर्तकस्तर्कोऽपेक्षित एवमग्रेपीत्येनवस्थेत्यत आह—यत्रेति । स्वत एव—शङ्कासामग्रीविरहादेव ।

तर्कापेक्षेत्यनन्तरमता नानवस्थेति शेषः । ननु तर्कस्य न व्यभिचारशङ्कानिवर्तकत्वं तर्ककारणीभूतव्याप्तिज्ञानेनैव तन्निरासादिति चेदत्र केचित्—अनाहार्यशङ्कानिवर्तनस्य तर्ककारणीभूतव्याप्तिज्ञानसाध्यत्वेऽपि आहार्यशङ्कानिवर्तनाय तर्कस्यापेक्षणात् । आहार्यज्ञानस्य व्याप्तिज्ञानाप्रतिबध्यत्वादनिष्टप्रसञ्जनात्मकतर्केण तु आपादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषो जन्यते तेन चापादकज्ञाने इच्छाप्रतिबन्धः क्रियते । एवं च इच्छारूपकारणाभावादेव नाहार्यशङ्कोत्पत्तिरिति अर्थात्सिद्धं तर्कस्य निवर्तकत्वम् ।

तर्कश्च आहार्यारोपविशेषः । तर्कत्वं च मानसत्वव्याप्यो जातिविशेषो तर्कयामीत्यनुभवसिद्धः । तर्कश्च द्विविधः । विषयपरिशोधकः व्याप्तिग्राहकश्चेति । आद्यः निर्धूमः स्यान्निर्वह्निः स्यादित्यादिः । द्वितीयः धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादिः ॥ १३७ ॥

इदानीमिति । व्याप्तिग्रहोपायनिरूपणानन्तरं वैपरीत्यसम्बन्धेन व्याप्तिनिश्चयाभावप्रयोजकव्यभिचारशङ्काकारणज्ञानविषयत्वेन उपाधेः स्मरणात् स्मृतत्वे सत्युपेक्षानर्हत्वरूपप्रसङ्गसङ्गत्योपाधिनिरूपणमिति भावः ।

स श्याम इति । काकः श्यामो मित्रातनयत्वादित्यादावित्यर्थः अत एव ध्वंसो विनाशी जन्यत्वादित्येन न पौनरुक्त्यम् अस्य साधनावच्छिन्नसाध्यव्यापकत्वाद् ध्वंसो विनाशी इत्यस्य साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् ।

ननु साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीयमतो नोक्ताव्याप्तिरतः पक्षधर्माव-

न्यायसिद्धान्तमुक्तावली ।

एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात्-प्रत्यक्षत्वस्यात्मादिषु सत्त्वात्तत्र च रूपाभावात्,

एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात्—विनाशित्वस्य प्रागभावेऽपि सत्त्वात्तत्र च भावत्वाभावादिति चेद्—

न यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् ।

मित्रातनयत्वावच्छिन्नश्यामत्वस्यव्यापकं शाकपाकजत्वं, तदवच्छिन्नसाधनाव्यापकं च ।

एवं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वम्, बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं च ।

एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वं बोध्यम् ।

सद्धेतौ तु एतादृशो धर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य चाव्यापकं किञ्चित्स्यात् ।

व्यभिचारिणि त्वन्तत उपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधि-

मुक्तावलीमयूखः ।

च्छिन्नसाध्यव्यापकोपाधावव्याप्तिमाह—एवं वायुरिति ।

उद्भूतरूपवत्त्वमिति । ननु प्रत्यक्षं प्रति उद्भूतरूपस्याव्यापकत्वे रूपस्य सुतरामव्यापकत्वमिति उद्भूतपदं व्यर्थमिति चेन्न । उद्भूतपदस्य उपाधेः साध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कदर्शनार्थं सत्त्वात् ।

व्यभिचारिणि त्विति । धूमवान् वह्नेरित्यत्रार्द्रेन्धनसंयोग उपाधिः, उपाधेरार्द्रेन्धनसंयोगस्य, साध्यस्य धूमस्य, चाधिकरणं महानसादिकमुपाधिनाऽऽर्द्रेन्धनसंयोगेन शून्यं धूमव्यभिचारनिरूपकाधिकरणं च अयोगोलकं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं वह्निरूपसाधनाव्यापकत्वं चार्द्रेन्धनसंयोगस्येति । वायुः प्रत्यक्षो द्रव्यत्वादित्यत्र प्रत्यक्षत्वरूपसाध्याधिकरणमात्मा उद्भूतरूपात्मकोपाधिशून्यं साध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्य उद्भूतरूपेऽभावादाह उपाध्यधिकरणमिति ।

उद्भूतरूपाधिकरणपरमाण्वाकाशान्यतरत्वावच्छिन्नसाध्याप्रसिद्ध्या तद्दोषतादवस्थ्यमतः—साध्याधिकरणमिति ।

उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटादि तद्वृत्तिद्रव्यत्वात्मकधर्मावच्छिन्नसाध्यव्यापकत्वाभावादुक्तं यच्चेत्यादि ।

न्यायसिद्धान्तमुक्तावली ।

शून्यं साध्यव्यभिचारनिरूपकमधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेरन्ततः सम्भवतीति ॥ १३८ ॥

अत एव लक्षणमप्युपाधिरूपमेतदनुसारेण दर्शयति—

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥ १३९ ॥

सर्व इत्यादिना । स्वसाध्येति । स्वम्—उपाधिः, स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारितेत्यर्थः ॥ १३९ ॥

उपाधेर्दूषकताबीजमाह—

व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् ।

व्यभिचारस्येति । उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः ।

तथाहि—यत्र शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनैवोपाधिव्यभिचारेण साध्यव्यभिचारानुमानम् । यथा धूमवान्वह्नेरित्यादौ वह्निर्धूमव्यभिचारी तद्व्यापकार्द्रेन्धनसंयोगव्यभिचारित्वादिति, व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात् ।

यत्र तु किञ्चिद्धर्मावच्छिन्नसाध्यव्यापक उपाधिस्तत्र तद्धर्मवति

मुक्तावलीमयूखः ।

तत्रापि साध्यव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वादुपाधिशून्यमिति ।

तत्रैवोपाध्यधिकरणं साध्याधिकरणं घट उपाधिशून्यमधिकरणमात्मा तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावात् साध्यव्यभिचाराधिकरणमिति ।

उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटः यच्चोद्भूतरूपशून्यं प्रत्यक्षत्वाभावाधिकरणमतीन्द्रियरूपादि तदन्यतरत्वावच्छिन्नद्रव्यत्वरूपसाधनाव्यापकत्वस्य उद्भूतरूपेऽभावात्साध्याभावाधिकरणमिति परित्यज्य साध्यव्यभिचाराधिकरणमित्युक्तं तदर्थश्च साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणत्वमिति ॥ १३८ ॥

सर्वे इति । साध्यसमानाधिकरणास्ते सर्वे उपाधयः स्युः ते के इत्याकाङ्क्षायामाह—येषां एकस्मिन्नाश्रये एकाधिकरणावच्छेदेन स्वमुपाधिः साध्यं च तयोर्व्यभिचारित्वं हेतौ स्यादित्यर्थः ।

अयंभावः धूमवान् वह्नेरित्यत्र अयोगोलके धूमरूपसाध्यसमानाधिकरणस्यार्द्रेन्धनसंयोगस्य अयोगोलकावच्छेदेन वह्नौ आर्द्रेन्धनसंयोगरूपोपाधेर्धूमरूपसाध्यस्य च व्यभिचारो वर्तते इति ॥ १३९ ॥

न्यायसिद्धान्तमुक्तावली।

उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति।

बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात्स्वव्याघातकत्वाच्च नोपाधिः।

बाधोन्नीतस्तूपाधिर्भवत्येव। यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपाधिः।

यस्य तूपाधेः साध्यव्यापकता सन्दिह्यते स सन्दिग्धोपाधिः।

पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः कथकसम्प्रदायानुरोधादिति।

केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम्। तथाहि—अयोगोलकं धूमवद्वह्नेरित्यादावयोगोलकं धूमाभाववदार्द्रेन्धनाभावादिति सत्प्रतिपक्षसम्भवात्। इत्थं च साधनव्यापकोऽपि क्वचिदुपाधिः। यथा करका पृथ्वी कठिनसंयोगवत्त्वादित्यादावनुष्णाशीतस्पर्शवत्त्वम्। न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम्, सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात्। अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरित्याहुः॥

मुक्तावलीमयूखः।

तद्धर्मवत्युपाधिव्यभिचारेणेति। तद्धर्माधिकरणीभूतं यत्साध्यभावाधिकरणं तद्वृत्तित्वेनेत्यर्थः। वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ तु प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि वह्निर्द्रव्ये उद्भूतरूपव्यभिचारित्वादित्यादि द्रष्टव्यम्।

ननु पक्षेतरत्वेतिव्याप्तिः न च तस्य लक्ष्यत्वमेव, एकाश्रये येषामित्यादिमूलेन प्रदर्शितस्य लक्ष्यतावच्छेदकस्य तत्राभावात् तत्र हेतौ पक्षेतरत्वव्यभिचारस्य पक्षमादायैव सत्त्वात् साध्यभिचारस्य च पक्षमादायासम्भवादत आह—बाधानुन्नीतेति।

बाधानुन्नीतपक्षेतर इति। बाधेन पक्षे साध्याभाववत्तया न उन्नीतः न साध्यव्यापकत्वेन निश्चितः इत्यर्थः।

स्वव्याघातकत्वाच्चेति। उपाधिमात्रस्य दूषकताव्याघातकत्वादित्यर्थः। पक्षेतरत्वस्योपाधित्वे पक्षेतरत्वस्य सर्वत्र सत्त्वेनानुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्यासम्भवादिति भावः।

ननु यत्र साध्यव्यापकताग्राहकं प्रमाणमस्ति तत्र पक्षेतरत्वे लक्षणातिव्याप्तिर्दुर्वारेत्यत आह—बाधोन्नीतस्त्विति। तथा चेष्टापत्तिरिति भावः।

पक्षावृत्तिरिति। पक्षवृत्तित्वे तु पक्षे तदभावेन साध्याभावासाधनादिति भावः।

न्यायसिद्धान्तमुक्तावली।

शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ॥ १४० ॥
अनुमानगतार्थत्वादिति वैशेषिकं मतम्।
तन्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः ॥ १४१ ॥

शब्दोपमानयोरिति। वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम्। शब्दोपमानयोस्त्वनुमानविधयैव प्रामाण्यम्।

तथाहि—दण्डेन गामानयेत्यादिलौकिकपदानि यजेतेत्यादिवैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वाद् घटमानयेतिपदकदम्बवत्।

यद्वा एते पदार्था मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात् तादृशपदार्थवत्। दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति।

एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्। असति च वृत्त्यन्तरे वृद्धैर्यत्र यत्प्रयुज्यते तत्र तत्तत्प्रवृत्तिनिमित्तकम्, यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम्।

यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पक्षधर्मताबलाद्गवयत्वप्रवृत्तिनिमित्तकत्वं सिद्धयति।

तन्मतं दूषयति—तन्न सम्यगिति। व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वात्। न हि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्तीति।

किञ्च सर्वत्र शब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियतामिति ध्येयम् ॥ १४० ॥ १४१ ॥

मुक्तावलीमयूखः।

प्रभाकरमते लौकिकः शब्दोऽनुवादकः वैदिक एव प्रमाणं तन्मतदूषणायाह—वैदिकेति।

नन्वनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमात् प्रमापूर्वकत्वत्वेन प्रमापूर्वकत्वसिद्धावपि रजतत्वप्रकारकज्ञानस्य तस्मादनुपपत्तिरतः शब्दप्रामाण्यस्वीकार आवश्यक इत्यरुचेराह—यद्वेति।

ननु दृष्टान्ते साध्यसिद्ध्यभावात् कथं व्याप्तिग्रह इत्यत आह—दृष्टान्तेऽपीति।

ननु सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञानं कल्प्यतामित्यत आह—किञ्चेति।

न्यायसिद्धान्तमुक्तावली।

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यं तु भवेद् व्याप्तेरन्वयव्यतिरेकतः॥ १४२॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते।

त्रैविध्यमिति। अनुमानं हि त्रिविधं—केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्।

तत्रासद्विपक्षः केवलान्वयी, यथा घटोऽभिधेयः प्रमेयत्वादित्यादौ, तत्र हि सर्वस्यैवाभिधेयत्वाद्विपक्षासत्त्वम्।(१)

असत्सपक्षः केवलव्यतिरेकी, यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ, तत्र हि जलादित्रयोदशभेदस्य पूर्वमनिश्चिततया निश्चितसाध्यवतः सपक्षस्याभाव इति।

सत्सपक्षविपक्षोऽन्वयव्यतिरेकी, यथा–वह्निमान्धूमादित्यादौ, तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वमिति॥

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति—

साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत्॥ १४३॥

साध्याभावेति। साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः।

अत्रेदं वोध्यम्। यत्सम्बन्धेन यदवच्छिन्नं प्रति येन सम्बन्धेन येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानात्तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति(२)। इत्थं च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धाभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिध्यति।

मुक्तावलीमयूखः।

**असद्विपक्षः** अत्यन्ताभावाप्रतियोगिसाध्यक इत्यर्थः।

---

(१) ननु सर्वेषां धर्माणां व्यावृत्तत्वात् केवलान्वय्यासिद्धिरिति चेन्न व्यावृत्तत्वस्य सर्वसाधारण्ये केवलान्वयित्वात् किंचिद्वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं तच्च गगनाभावादौ प्रसिद्धम्, इति क्वचित्पुस्तकेऽधिकः पाठः।

(२) येन रूपेण येन सम्बन्धेन यत्र व्यापकता गृह्यते तेन रूपेण तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभाववत्ताज्ञानात् यत्सम्बन्धेन यं प्रति यस्य व्याप्यता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति पाठान्तरं क्वचित्पुस्तके।

न्यायसिद्धान्तमुक्तावली ।

यत्र तु तादात्म्यसम्बन्धेनेतरव्यापकता गन्धाभावस्य गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिध्यति । स एवान्योन्याभावः ।

एवं यत्र संयोगसम्बन्धेन धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति, अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् ।

केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिज्ञानमपि कारणम् । यत्र व्यतिरेकसहचाराद् व्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते । साध्यप्रसिद्धिस्तु घटादावेव जाता पश्चात्पृथिवीत्वावच्छेदेन साध्यत इति वदन्ति ॥ १४२ ॥ १४३ ॥

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥ १४४ ॥

अर्थापत्तिरिति । अर्थापत्तिः प्रमाणान्तरमिति केचन मन्यन्ते । तथाहि—यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीविनो गृहासत्त्वं वहिःसत्त्वं विनाऽनुपपन्नमिति वहिःसत्त्वं कल्पयति, इति तदप्यनुमानेन गतार्थत्वान्नेष्यते। तथाहि—यत्र जीवित्वस्य वहिःसत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतं तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्ववाधाद्वहिःसत्त्वमनुमितौ भासते ।

एवं 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनसिद्धौ दिवाभोजनवाधे रात्रिभोजनं सिध्यतीति ।

मुक्तावलीमयूखः ।

इतरव्यापकतेति । इतरस्य व्यापकता इतरव्यापकता इतरनिष्ठव्याप्यतानिरूपितव्यापकतेत्यर्थः ।

आचार्यमतमाह—केचित्त्विति । व्यतिरेकसहचारेण—अन्वयसहचारनिरपेक्षव्यतिरेकसहचारेण । अन्वयव्याप्तिरेवेत्येवकारेण व्यतिरेकव्याप्तेर्व्यवच्छेदः ।

ननु घटादौ साध्यनिर्णये कथमितरभेदानुमितिः सिद्धेः प्रतिबन्धकत्वादत आह—पश्चादिति । अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन सिद्धेरप्रतिबन्धकत्वादिति भावः ॥ १४२-१४३ ॥

केचनेति मीमांसका इत्यर्थः । दिवा न भुङ्क्ते इत्यादावित्यादिना मयूरः पर्वतेतरस्मिन् न नृत्यति नृत्यति चेत्यस्य संग्रहः । नन्वेतद्वाक्यान्मयूरः पर्वते नृत्यतीति ज्ञानमुत्पद्यते नत्वेतद्व्यतिरेकिणः सम्भवति पर्वतनृत्यस्य साध्यस्याप्रसिद्धौ व्यतिरेकव्याप्त्यभावादिति, अर्थापत्तेः प्रमाणान्तरत्वमावश्यकमिति चेन्न मयूरनृत्यं पर्वताधि-

न्यायसिद्धान्तमुक्तावली ।

अभावप्रत्यक्षस्यानुभविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम् । किञ्चानुपलम्भस्याज्ञातस्य हेतुत्वे ज्ञानाकरणकत्वात्प्रत्यक्षत्वम्, ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था ।

एवं चेष्टापि न प्रमाणान्तरं तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्छब्द एवान्तर्भावात् । यत्र च व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति ॥ १४४ ॥

सुखं निरूपयति—

**सुखं तु जगतामेव काम्यं धर्मेण जायते ।**

सुखं त्विति । काम्यमभिलाषविषयः । धर्मेणेति धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः ॥

दुःखं निरूपयति—

**अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥ १४५ ॥**

अधमति । अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः । प्रतिकूलमिति । दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः ॥१४५॥

इच्छां निरूपयति—

**निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ।**
**इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥ १४६ ॥**

निर्दुःखत्व इति । इच्छा द्विविधा फलविषयिणी उपायविषयिणी च । फलं तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अत एव पुरुषार्थः संभवति । यज्ज्ञातं सत्स्ववृत्तितयेष्यते स

मुक्तावलीमयूखः ।

करणकं पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्वतत्ववदित्यन्वयव्यतिरेकिणैव पर्वताधिकरणकमयूरनृत्यज्ञानसम्भवादिति ध्येयम् ।

आनुभविकत्वादिति । येन इन्द्रियेण या व्यक्तिर्गृह्यते तद्गताजातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते, इति नियमाद्विशेषणतासंनिकर्षेण चक्षुरादिभिरेव घटाभावादेर्ग्रहणसंभवादिति भावः ।

धर्मत्वेनेति । समवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्नधर्मत्वावच्छिन्ना कारणता धर्मे स्वीक्रियते इति ।

इदं च प्राचां मतेनोक्तम् । नवीनमते तु नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं बोध्यम् ।

यज्ज्ञातंसदिति । नन्वस्य स्वविषयज्ञानजन्येच्छा विषयत्वमर्थः । तच्चोपायेऽति-

न्यायसिद्धान्तमुक्तावली ।

पुरुषार्थ इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः ।

उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम् ॥ १४६ ॥

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् ।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥ ८४७ ॥

चिकीर्षति । कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणीच्छा चिकीर्षा—पाकं कृत्या साधयामीति तदनुभवात् । चिकीर्षा प्रति कृति साध्यताज्ञानमिष्टसाधनताज्ञानं च कारणम् । तद्धेतुरिति । अत एव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा ॥ १४७ ॥

बलवद्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ।

बलवदिति । बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकम्, अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा ।

बलवद्द्वेषः प्रतिबन्धक इत्यन्ये ।

तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥ १४८ ॥

तदहेतुत्वेति । बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः । कृति-साध्यताज्ञानादिमतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टाजनक-त्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात् कस्यचिन्मत इत्यस्वरसो दर्शितः ॥ १४८ ॥

द्वेषं निरूपयति ।

द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् ।

द्विष्टसाधनतेति । दुःखोपायविषयकं द्वेषं प्रति बलवद्द्विष्टसाधनता-ज्ञानं कारणमित्यर्थः । बलवदिष्टसाधनताज्ञानं च प्रतिबन्धकम्, तेन नान्त रीयकदुःखजनके पाकादौ न द्वेषः ॥

प्रयत्नं निरूपयति—

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥ १४९ ॥
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् ।

मुक्तावलीमयूखः ।

व्याप्तं फलविषयकं यदिष्टसाधनताज्ञानं तज्जन्या या उपायेच्छा तद्विषयत्वस्य फले सत्त्वादत आह—इतरेच्छानधीनेच्छेति । तथा च उपायेच्छायाः फलेच्छाधीनत्वेन तद्विषय उपाये नातिव्याप्तिः ।

ननु अगम्यागमनं बलवद्द्विष्टस्य नरकस्य साधनमिति ज्ञानवतोऽपि तादृशद्वेष शून्यदशायां चिकीर्षाप्रवृत्त्योर्दर्शनेन व्यभिचार इत्याशयेनाह—बलवद्द्वेष इति । तत्र

न्यायसिद्धान्तमुक्तावली।

प्रवृत्तिश्चेति। प्रवृत्ति-निवृत्ति-जीवनयोनियत्नभेदात्प्रयत्नस्त्रिविध इत्यर्थः॥

चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा॥ १५०॥
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्।

चिकीर्षेत्यादि मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वज्ञानेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः। कृतिसाध्यताज्ञानादिवद्बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति।

कार्यताज्ञानं प्रवर्तकमिति गुरवः। तथाहि-ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति। सा च कृतिसाध्यताज्ञानसाध्या—इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात्। चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा। तत्र कृतिसाध्यत्वं प्रकारः, तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा च प्रवृत्तौ हेतुर्नत्विष्टसाधनताज्ञानं तत्र हेतुः—नित्ये तदभावात्।

ननु कृत्यसाध्येऽपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः न चिकीर्षाकारणं किन्तु कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेद्—

न तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्।

न च द्वयोरपि हेतुत्वं गौरवात्।

ननु त्वन्मतेऽपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्यताज्ञानस्य सत्त्वादिति चेद्—

न स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात्। काम्ये हि यागपाकादौ कामना स्वविशेषणम्, ततश्च बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्यताज्ञानम्, ततः प्रवृत्तिः। तृप्तश्च भोजने

मुक्तावलीमयूखः।

चिकीर्षायाम्—तथा च कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं बलवदनिष्टाजनकत्वज्ञानं च चिकीर्षायां कारणमित्यर्थः।

प्रभाकरमतमाह—कार्यताज्ञानमिति। अयं भावः प्रवृत्तौ चिकीर्षा कारणम् तत्र च कार्यताज्ञानं कारणमिति परम्परया कार्यताज्ञानस्य प्रवृत्तौ कारणत्वमिति।

इष्टसाधनताज्ञानं तु न प्रवृत्तौ कारणं नित्ये कर्मणि फलजनकत्वाभावेनतत्रेष्टसाधनताज्ञानाभावात्प्रवृत्त्यनापत्तेः।

स्वविशेषणेति। स्वं प्रवर्तमानपुरुषः तद्विशेषणं काम्येकामना, नित्येकालशौचादि तद्वत्ता—पक्षेतत्सम्बन्धः तस्य प्रतिसंधानं ज्ञानं कार्यताज्ञाने हेतुः, तद्धेतुता च

न्यायसिद्धान्तमुक्तावली ।

न प्रवर्तते-इदानीं कामनायाः पुरुषविशेषणत्वाभावात् । नित्ये च शौचादिकं पुरुषविशेषणम्, तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृत्तिः ।

ननु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानविशिष्टकार्यताज्ञानमेव हेतुरस्तु, बलवदनिष्टाननुबन्धित्वं चेष्टोपत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेद्—

न—इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्साध्यत्वसाधनत्वयोर्विरोधात् । असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम् । न चैकमेकनैकदा सिद्धमसिद्धं चेति ज्ञायते, तस्मात्कालभेदादुभयं ज्ञायत इति ।

मैवम् लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात् । न च साध्यत्वसाधनत्वयोर्विरोधो, यदा कदाचित् साध्यत्वसाधनत्वयोरविरोधादेकदा साध्यत्वसाधनत्वयोश्चाज्ञानात् ।

नव्यास्तु-ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्तकम्, अनागते तस्य ज्ञातुमशक्यत्वात् । किन्तु यादृशस्य पुंसः कृतिसाध्यं यद् दृष्टं तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्तते । तेनौदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः पाकः कृतिसाध्यस्तादृशश्चाहमिति प्रतिसन्धाय पाके प्रवृत्तिरित्याहुः ।

तन्न स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना संभोगादिप्रवृत्तौ च तदभावात् ।

मुक्तावलीमयूखः ।

पाकोमत्कृति साध्यः मत्कृतिं विनानुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्यनुमानेनावगम्यते इति ।

अनूदितं प्रभाकरमतं दूषयति—मैवमित्यदिना एककालीनयोः कृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधात्तयोर्हेतुत्वं नास्माभिरङ्गीक्रियते किन्तुकृतिसाध्यत्वेष्टसाधनत्वज्ञानस्यैवहेतुत्वादितिभावः ।

लाघवेनेति । नियमादिघटितजन्यत्वापेक्षया विषयत्वस्य लघुत्वेनेति भावः ।

प्रभाकरमतानुयायिनां नवीनानांमतमाह—नव्यास्त्विति ।

ज्ञातुमशक्यत्वादिति । तैः सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारेण प्रत्यक्षस्य, पक्षज्ञानाभावेनानुमितेश्चासम्भवादित्याशयः ।

ननु सिद्धान्ते इष्टसाधनत्वकृतिसाध्यत्वयोर्ज्ञानस्य प्रवृत्तौ हेतुत्वात् भावियौवराज्ये बाले कालान्तरीणकृतिसाध्यताज्ञानस्य, तृप्तस्य कालान्तरीणेष्टसाधनताज्ञानस्य

न्यायसिद्धान्तमुक्तावली ।

इदं तु बोध्यम् । इदानीन्तनेष्टसाधनत्वादिज्ञानं प्रवर्तकं, तेन भावियौवराज्ये बालस्य न प्रवृत्तिः—तदानीं कृतिसाध्यत्वाज्ञानात् । एवं तृप्तश्च भोजने न प्रवर्तते-तदानीमिष्टसाधनत्वाज्ञानात् । प्रवर्तते च रोषदूषितचित्तो विषादिभक्षणे-तदानीं बलवदनिष्टानुबन्धित्वाज्ञानात् ।

न चास्तिककामुकस्यागम्यागमने शत्रुवधादिप्रवृत्तौ च कथं बलवदनिष्टानुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति वाच्यम्, उत्कटरागादिना नरकसाधनताधीतिरोधानात् ।

वृष्टयादौ तु कृतिसाध्यताज्ञानाभावान्न चिकीर्षाप्रवृत्ती किन्त्विष्टसाधनताज्ञानादिच्छामात्रम् । कृतिश्च प्रवृत्तिरूपा बोध्या, तेन जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः ।

इत्थञ्च प्रवर्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वादिकमेवार्थः ।

इत्थञ्च 'विश्वजिता यजेत' इत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते ।

ननु 'अहरहः सन्ध्यामुपासीत' इत्यादाविष्टानुत्पत्तेः कथं प्रवृत्तिः ? न चार्थवादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम्, तथा सति काम्यत्वेन नित्यत्वहान्यापत्तेः, कामनाभावे चाकरणापत्तेः; इत्थञ्च यत्र फलश्रुतिस्तत्रार्थवादमात्रमिति चेद्—

न ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् ।

मुक्तावलीमयूखः ।

च भोजने सत्वादत आह—इदंत्विति । अयमाशयः, इदानीन्तनकृतिसाध्यताज्ञानस्य इदानींतनेष्टसाधनताज्ञानस्य च हेतुत्वात् तत्र दोषाभावात् । आद्ये तत्कालिककृतिसाध्यताज्ञानस्य द्वितीये तत्कालिकेष्टसाधनताज्ञानस्य चाभावादिति ।

इत्थं चेति । प्रवृत्तिं प्रतीष्टसाधनताधियो हेतुत्वे चेत्यर्थः । जलताडनादौ प्रवृत्त्यभावाय इष्टसाधनताज्ञानस्य मधुविषसम्पृक्तान्नभोजने प्रवृत्त्यभावाय बलवदनिष्टानुबन्धित्वज्ञानस्य सुमेरुशृङ्गाहरणे प्रवृत्त्यभावाय कृतिसाध्यताज्ञानस्य हेतुत्वमिति ।

स्वर्गः फलं कल्प्यत इति । तदुक्तं जैमिनिना पूर्वमीमांसायां 'स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात्' अ० ४-पा० ३-सू० १९ । इति, अयमाशयः विश्वजिति प्रवृत्त्यर्थमिष्टसाधनताज्ञानमवश्यमपेक्षणीयं तच्च इष्टं किमिति नियामकं नास्ति विश्वजिता यजेतेति श्रुतौ फलविशेषानिर्देशादिति । किञ्चित्फलं स्वेच्छया कल्पनीयमिति पूर्वपक्षे स विश्वजिद्यागफलं स्वर्गः स्यात् सर्वपुंसामिष्टत्वादिति सिद्धान्तः । अयमत्रसंग्रहः ।

न्यायसिद्धान्तमुक्तावली।

न च कामनाभावेऽकरणतापत्तिः, त्रिकालस्तवपाठादाविव कामनासद्भावस्यैव कल्पनात्।

ननु वेदबोधितकार्यताज्ञानात्प्रवृत्तिः संभवत्येवेति चेन्न—इष्टसाधनत्वमविज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसंभवात्।

यदपि पण्डापूर्वं फलमिति, तदपि न—कामनाभावेऽकरणापत्तेस्तौल्यात्। कामनाकल्पने स्वार्थवादिकफलमेव रात्रिसत्रन्यायात्कल्प्यते, अन्यथा प्रवृत्त्यनुपपत्तेः। तेनानुत्पत्तिमेव प्रत्यवायस्यान्ये मन्यन्ते।

एवम्—

सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥

एवम्—

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्—

इत्यादिवचनप्रतिपादितब्रह्मलोकादिकमेव फलमस्तु।

न च पितृप्रीतिः कथं फलं? व्यधिकरणत्वादिति वाच्यम्, गयाश्राद्धादाविवोद्देश्यत्वसम्बन्धेनैव फलजनकत्वस्य क्वचित्कल्पनात्।

अत एवोक्तं—शास्त्रदर्शितं फलमनुष्ठानकर्तरीत्युत्सर्ग—इति।

पितृणां मुक्तत्वे तु स्वस्य स्वर्गादिफलं, यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात्। पण्डापूर्वार्थं प्रवृत्तिश्च न संभवति। न हि तत्सुखदुःखाभाववत्स्वतः पुरुषार्थो, न वा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेदित्थम्—यथा हि नित्ये कृते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः, एवं प्रत्यवायाभावस्य सत्त्वे दुःखप्राग-

मुक्तावलीमयूखः।

नैवास्ति विश्वजिद्यागे फलमस्त्युत नाश्रुतेः।
भाव्यापेक्षाद्विधेः कल्प्यं फलं पुंसः प्रवृत्तये॥
सर्वं फलमुतैकं स्यात् सर्वमस्त्वविशेषतः।
एकेन तन्निराकाङ्क्षमतोऽनेकं न कल्प्यते॥
एकं यत्किञ्चिदथवा नियतं न नियामकम्।
तस्मादाद्यः सर्वपुंसामिष्टत्वात् स्वर्ग एव तत्॥ इति।

**पण्डापूर्वमिति।** पण्डो नपुंसकः स इवापूर्वम् पण्डापूर्वम्। नित्यकर्मणा स्वर्गादिफलाजनकमपूर्वं जायते इति कल्प्यते तदेव पण्डापूर्वमित्युच्यते इति प्रभाकरमतं दूषयति यदपीति।

**रात्रिसत्रन्यायादिति।** रात्रिसत्रशब्दवाच्यानां ज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासायामत्यन्ताश्रुतस्वर्गादिकल्पने गौरवाद्विश्वजिन्न्यायेन 'प्रतितिष्ठन्तिह

न्यायसिद्धान्तमुक्तावली।

भावस्त्वं तदभावे तदभाव इति योगक्षेमसाधारणकारणताया दुःखप्रागभावं प्रत्यपि सुवचत्वात्। एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति।

ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थे कथं नञर्थान्वयः? इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेद्--

न तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते।

अथवा बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः। तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति।

ननु-'श्येनेनाभिचरन् यजेत' इत्यादौ कथं बलवदनिष्टाननुबन्धित्वं विध्यर्थः? श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात्।

न च वैधत्वान्न निषेध इति वाच्यम्, अभिचारे प्रायश्चित्तोपदेशात्।

न च मरणानुकूलव्यापारमात्रं यदि हिंसा, तदा खड्गकारस्य कूप-

मुक्तावलीमयूखः।

वा य एता रात्रीरुपयन्ति इति श्रुतौ प्रतिष्ठैव फलमिति सिद्धान्तितम्, तथात्रापि आर्थवादिकं ब्रह्मलोक एव फलं लाघवादित्यर्थः। तथा च न्यायमाला—

स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहादिमः।
पूर्ववत्स्यात्प्रतिष्ठा च श्रुता तेनाश्रुताद्वरम्॥

तदभावे-नित्यकर्माभावे। तदभावः-प्रत्यवायाभावाभावः। तदभावे-प्रत्यवायाभावाभावे प्रत्यवायरूपे। तदभावः दुखप्रागभावाभावो दुखरूपः। एवं चान्वयव्यतिरेकाभ्यां दुखप्रागभावं प्रति प्रत्यवायाभावस्य हेतुत्वं सिध्यति। ननु दुःखप्रागभावस्य जन्यतया कथं प्रत्यवायाभावस्य तं प्रति हेतुतेत्याह—योगक्षेमेति। दुःखप्रागभावपरिपालनमेव दुःखप्रागभावजनकत्वमिति भावः।

कलञ्जमिति। शूल्यं मांसं कलञ्जमिति केचित्।

विषदिग्धबाणाहतमृगमांसं कलञ्जमित्यन्ये।

पलाण्डुः कलञ्जमिति परे।

वस्तुतस्तु कलञ्जं रक्तलशुनम्। 'कलञ्जपलाण्डुपारीरका' इत्यापस्तम्बधर्मसूत्रव्याख्याने हरदत्तेन, वीरमित्रोदये वीरमिश्रेण, च कलञ्जं रक्तलशुनमिति व्याख्यातत्वादिति।

अभिचरन्—मरणं कामयन्। वधत्वात्—श्येनेनाभिचरन्यजतेति विधिसिद्धत्वात्। मा हिंस्यादिति निषेधस्तु अवैधहिंसाविषय इति भावः।

प्रायश्चित्तेति। 'अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति' इति वचनादिति

न्यायसिद्धान्तमुक्तावली।

कर्तुश्च हिंसकत्वापत्तिर्गलच्छेदाजन्यमरणे स्वात्मवधकत्वापत्तिश्चेति वाच्यम्, मरणोद्देश्यकत्वस्यापि विशेषणत्वात्, अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेद्—न, तत्र बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वाभावात्।

वस्तुतःश्येनवारणायादृष्टाद्वारकत्वेन विशेषणीयम् अत एव काशीमरणाद्यर्थं कृतशिवपूजनादेरपि न हिंसात्वम्।

न च साक्षान्मरणजनकस्यैव हिंसात्वं, श्येनस्तु न तथा, किन्तु तज्जन्यापूर्वमिति वाच्यम्, खड्गाघातेन ब्राह्मणे व्रणपाकपरम्परया मृते हिंसात्वानापत्तेः।

केचित्तु श्येनस्य हिंसा फलं, न तु मरणम्, तेन श्येनजन्यखड्गघातादिरूपा हिंसाऽभिचारपदार्थः, तस्य च पापजनकत्वम्, अतः श्येनस्य वैधत्वात्पापाजनकत्वेऽपि अग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्तन्त इत्याहुः।

आचार्यास्तु—आप्ताभिप्रायो विध्यर्थः। 'पाकं कुर्याः' इत्यादावाज्ञादिरूपेच्छावाचित्ववल्लिङ्मात्रस्येच्छावाचित्वं लाघवात्। एवं च 'स्वर्गकामो

मुक्तावलीमयूखः।

शेषः। तथाच श्येनस्य बलवदनिष्टाजनकत्वे प्रायश्चित्तोपदेशवैयर्थ्यं स्यादिति माहिंस्यादिति निषेधस्य श्येनातिरिक्तपरत्वं न सम्भवतीति भावः।

ननु मरणोद्देश्यकत्वनिवेशे यत्रान्योद्देश्येन क्षिप्तनाराचेन ब्राह्मणमरणं तत्र प्रायश्चित्ताभावः स्यात्तस्याहिंसात्वेन माहिंस्यादिति निषेधाविषयत्वादित्यत आह—अन्योद्देश्यकेति।

वाचनिकमिति। ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत्। भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वाशवशिरोध्वजम्॥ इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते। इति वचनबोधितं प्रायश्चित्तं न तु मा हिंस्यादिति निषेधविषयतयेतिभावः।

अदृष्टाद्वारकत्वेनेति। श्येनस्यादृष्टद्वारैव वैरिमरणसाधनत्वमिति भावः।

ननु श्येनस्य हिंसात्वे इष्टापत्तिरिति व्यर्थमिदविशेषणमत आह—अत एवेति। काशीमरणार्थकृतशिवपूजनादेर्हिंसात्ववारणाय अदृष्टाद्वारकत्वविशेषणमावश्यकमिति भावः

ननु साक्षान्मरणजनकस्यैव हिंसात्वमिति स्वीकारेणैव श्येने तादृशशिवपूजनादेरपिन हिंसात्वमिति अदृष्टाद्वारकत्वरूपगुरुविशेषणं व्यर्थमत आह न चेति।

अदृष्टाद्वारकत्वविशेषणं विनैव श्येने बलवदनिष्टाननुबन्धित्वमुपपादयतां मतमाह—केचित्त्विति।

आचार्यास्त्विति। आचार्या उदयनाचार्याः तथा च तदीये पद्ये—

विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः।

न्यायसिद्धान्तमुक्तावली ।

यजेत' इत्यादौ यागः स्वर्गकामकृतिसाध्यतया आप्तेष्ट इत्यर्थः । ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्तते । कलञ्जभक्षणे तदभावान्न प्रवर्तते । यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावद्गर्भ इव श्रुतिकुमार्याः पुंयोगे मानम् । न च कर्त्रस्मरणं बाधकं, कपिलकणादादिकमारभ्याद्यपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात्, अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः । तत्रैव कर्तृस्मरणमस्तीति चेद्वेदेऽपि 'छन्दांसि जज्ञिरे तस्मात्' इत्यादिकर्तृस्मरणमस्त्येव । एवं—

प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते ।

इत्यपि द्रष्टव्यम् ।

स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा ।
शिवादिऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ॥

इति तु वेदस्य स्तुतिमात्रम् ।

न च पौरुषेयत्वे भ्रमादिसंभवादप्रामाण्यं स्यादिति वाच्यम्, नित्यसर्वज्ञत्वेन निर्दोषत्वात् ।

अत एव पुरुषान्तरस्य भ्रमादिसम्भवान्न कपिलादेरपि कर्तृत्वं वेदस्य, किञ्च वर्णानामनित्यत्वस्य वक्ष्यमाणत्वात्सुतरां तत्सन्दर्भस्य वेदस्यानित्यत्वमिति संक्षेपः ॥

उपादानस्येति । उपादानस्य—समवायिकारणस्य, अध्यक्षं-प्रत्यक्षं प्रवृत्तौ कारणमिति ॥

**निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टोपायत्वधीर्यदि ॥ १५१ ॥**

निवृत्तिरिति । द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति दुःखसाधनविषयक निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः ॥ १४९ १५०-१५१ ॥

मुक्तावलीमयूखः ।

अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता ।।
कृत्स्न एव हि वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद्विधौ ॥ कुसुमाञ्जलौ पञ्चमस्तबके श्लो० १५।१६॥

समवायिकारणस्याध्यक्षमिति । तत्साध्यकप्रवृत्तिं प्रति तत्समवायिकरणात्मकतदुपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वम् ।

ननु शब्दसाध्यकप्रवृत्तिर्गगनादौ न स्यात् शब्दसमवायिकारणस्य गगनस्यातीन्द्रियत्वेनाप्रत्यक्षत्वात् किं च ध्वंससाध्यकप्रवृत्तिरपि न स्यात्तत्समवायिनोऽप्रसिद्धेरिति चेन्न इष्टापत्तेः शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव मृदङ्गादिगोचरायाः उपगमादिति प्राचीनाः ।

न्यायसिद्धान्तमुक्तावली ।

यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् ।

यत्न इति । जीवनयोनियत्नो यावज्जीवनमनुवर्तते । स चातीन्द्रियः ।

तत्र प्रमाणमाह—

शरीरे प्राणसंचारे कारणं परिकीर्तितः ॥ १५२ ॥

शरीर इति । प्राणसञ्चारो हि अधिकश्वासादिर्यत्नसाध्यः । इत्थं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वमनुमानात् । प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिर्यत्नः ॥ १५२ ॥

गुरुत्वं निरूपयति—

अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ १५३ ॥
तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ।

अतीन्द्रियमिति । अनित्य इति । अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यम् । नित्ये परमाणौ नित्यम् । गुरुत्वमित्यनुवर्तते । तद्गुरुत्वमसमवायि—असमवायिकारणम् । पतनेति । आद्यपतन इत्यर्थः ।

द्रवत्वं निरूपयति—

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ॥ १५४ ॥
सांसिद्धिकं तु सलिले द्वितीये क्षितितेजसोः ।
परमाणौ जले नित्यमन्यत्रानित्यमिष्यते ॥ १५५ ॥

सांसिद्धिकमिति । द्रवत्वं द्विविधं-सांसिद्धिकं नैमित्तिकं चेत्यर्थः । परमाणाविति । जलपरमाणौ द्रवत्वं नित्यमित्यर्थः । अन्यत्र-पृथवीपरमाण्वादौ जलद्व्यणुकादौ च द्रव्यत्वमनित्यम् ॥१५३॥१५४॥१५५॥

कुत्रचित्तेजसि कुत्रचित्पृथिव्यां च नमित्तिकं द्रव्यत्वं तत्र को वा नैमित्तिकार्थस्तद्दर्शयति—

नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ।

नैमित्तिकमिति । वह्नीति पदं तेजोऽर्थकम् । तथाच अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम् । तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिषु

मुक्तावलीमयूखः ।

नव्यास्तु प्रकृतेऽधिष्ठानमात्रमुपादानं तेन च यागादेर्हविः, शब्दस्य मृदङ्गादि, प्राणसंचारादेश्च प्राणवहनाड्यादि, उपादानमिति वदन्ति ॥ १४९-१५१ ॥

द्वितीयादिपतनस्य वेगासमवायिकारणकत्वादाह—आद्येति ।

न्यायसिद्धान्तमुक्तावली।

पृथिव्यां च वर्तत इत्यर्थः ॥

द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥ १५६ ॥

द्रवत्वं स्यन्दने हेतुरिति। असमवायिकारणमित्यर्थः। संग्रहे-सक्तु-कादिसंयोगविशेषे। तत्-द्रवत्वं, स्नेहसहितमिति वोद्धव्यम्। तेन द्रुत-सुवर्णादीनां न संग्रहः ॥ १५६ ॥

स्नेहं निरूपयति--

स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ।
तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ॥ १५७ ॥

स्नेहो जले इति। जल एवेत्यर्थः। असौ—स्नेहः।

ननु पृथिव्यामपि तैले स्नेह उपलभ्यते, न चासौ, जलीयः, तथा सति दहनप्रातिकूल्यं स्यादत आह—तैलान्तर इति। तत्प्रकर्षात्। तैले उपलभ्यमानः स्नेहोऽपि जलीय एव, तस्य प्रकृष्टत्वादग्नेरानु-कूल्यम्। अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः ॥१५७॥

संस्कारं निरूपयति—

संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।

संस्कारेति। वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः।

मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ॥ १५८ ॥

मूर्तमात्र इति। कर्मजवेगजभेदाद्वेगो द्विविध इत्यर्थः। शरीरादौ हि नोदनजनितेन कर्मणा वेगो जन्यन्ते, तेन च पूर्वकर्मनाशस्तत उत्तरं कर्म। एवमग्रेऽपि। विना च वेगं कर्मणः कर्मप्रतिबन्धकत्वात्पूर्वकर्मनाश उत्तर-कर्मोत्पत्तिश्च न स्यात्। यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः ॥ १५८ ॥

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम् ॥ १५९ ॥

स्थितिस्थापकेति। आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थिति-स्थापकसाध्यत्वात्। केचिदिति। चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तदप्रमाणमिति भावः। असौ—स्थितिस्थापकः। क्वचिदा-कृष्टशाखादौ ॥ १५९ ॥

मुक्तावलीमयूखः।

वेगो जन्यते इति। वेगत्वं जातिविशेषः प्रत्यक्षसिद्धः। स्थितिस्थापकत्वं जातिविशेषः क्रियाविशेषजनकतावच्छेदकतया सिद्धः।

वस्तुतः संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वे एव प्रमाणमस्तीत्याह—किंचेति।

न्यायसिद्धान्तमुक्तावली ।

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः ।

उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥ १६० ॥

भावनाख्य इति । तस्य—संस्कारस्य । उपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तम् । तत्संशयात्संस्कारस्यानुत्पत्तेर्निश्चय इत्युक्तम् । तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः ।

ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं, तेनोपेक्षादिस्थले न स्मरणम् । इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्त्विति चेद्—

न विनिगमनाविरहेणापि संस्कारं प्रतिउपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् । किञ्चोपेक्षास्थले संस्कारकल्पनाया गुरुत्वात्संस्कारं प्रति चोपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् ॥ १६० ॥

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।

असौ—संस्कारः । तत्र प्रमाणं दर्शयति—स्मरण इति । यतः स्मरणं प्रत्यभिज्ञानं च जनयतः संस्कारः कल्प्यते । विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्स्वस्वव्यापारान्यतराभावे कारणत्वासंभवात् । न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्, अप्रयोजकत्वात् ।

परेत्वनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः ॥

अदृष्टं निरूपयति—

धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् ॥ १६१ ॥

गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः ।

मुक्तावलीमयूखः ।

संस्कारकल्पनाया इति । अस्य स्मृतिं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वे इत्यादिः ।

संस्कारः कल्प्यते इति । नन्वनुभवध्वंस एव व्यापारोऽस्तु प्रतियोग्यभावयोरेकत्राजनकत्वमिति नियमस्याप्रयोजकत्वात् । न च कारणीभूताभावप्रतियोगित्वेन अनुभवस्य स्मृतिप्रतिबन्धकत्वापत्तिरिति वाच्यम्, संसर्गाभावत्वावच्छिन्नकारणताश्रयीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकतापदार्थत्वादिह च संसर्गाभावत्वेनाजनकत्वादिति चेन्न संस्कारानङ्गीकारे कदाचिदनुभूतस्य सर्वदा स्मरणापत्तेः अनुभवध्वंसात्मकव्यापारस्य सत्त्वादिति शिवम् ।

इत्याहुरिति । परेतु मते उद्बुद्धसंस्कारस्य स्मरणं प्रति स्मरणस्य च प्रत्यभिज्ञां प्रति हेतुताकल्पनं सन्मतेऽन्तरास्मरणव्यक्तिमकल्पयित्वा उद्बुद्धसंस्कारस्यैव प्रत्यभिज्ञां प्रति हेतुत्वकल्पने लाघवमित्यरुचिराहुरित्येनन सूचिता ॥ १६२–१६१ ॥

न्यायसिद्धान्तमुक्तावली।

धर्माधर्माविति । स्वर्गादीति । स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः । तत्र प्रमाणं दर्शयितुमाह—यागादीति । यागादिव्यापारतया धर्मः कल्प्यते । अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात्। तदुक्तमाचार्यैः—

चिरध्वस्तं फलायालं न कर्मातिशयं विना । इति ।

ननु यागध्वंस एव व्यापारः स्यात् । न च प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वं, सर्वत्र तथात्वे मानाभावात्, न च त्वन्मते फलानन्त्यं, मन्मते चरमफलस्यापूर्वनाशकत्वान्न तथात्वमिति वाच्यम्, कालविशेषस्य सहकारित्वादित्यत आह—गङ्गास्नानेति । गङ्गास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्वमेव कल्प्यते लाघवादिति भावः ॥

ननु ध्वंसोऽपि न व्यापारोऽस्तु । न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम्, अनन्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्त्वात्, अव्यवहितपूर्ववर्तित्वं हि चक्षुस्संयोगादेः कारणत्वे, न तु सर्वत्र, कार्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वे इत्यत आह—

कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥ १६२ ॥

मुक्तावलीमयूखः।

यागेति । यागत्वं च देवतोद्देश्यकस्वस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छात्वम् । होमत्वं च अग्निसंयोगानुकूलक्रियाजनकघृतादिवृत्तिनोदनादिव्यापारत्वम् । दानत्वं च मूल्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वम् ।

मीमांसकास्तु देवतामुद्दिश्यद्रव्यत्यागो यागः । त्यक्तस्य द्रव्यस्य वन्हौ प्रक्षेपो होमः । स्वकीयद्रव्यस्य स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानम् । तदुक्तं न्यायमालायाम्—

आकाङ्क्षा यागशब्दस्य त्यागेनैव निवर्तते ।
त्यागस्योपरि होमस्य विधेः क्षेपावसानता ॥
स्वीयं द्रव्यं परित्यज्य परकीयं यथा भवेत ।
तथा संपादनं दानं त्यागेष्वेषामियं भिदा ॥ इति ॥

तथात्वे—प्रतियोगिध्वंसयोरेकत्राजनकत्वे ;

चरविनष्टतयेति । ननु चिरनष्टस्याप्यनुभवस्य स्मृतिजनकत्वं दृष्टमतआह—निर्व्यापारतयेति । तथाच तस्य संस्काररूपव्यापारद्वारा स्मृतिजनकत्वमिति न दोष इति भावः ।

फलानन्त्यं—ध्वंसस्याविनाशित्वेन फलपरंपराप्रसङ्गः ।

न्यायसिद्धान्तमुक्तावली।

कर्मनाशेति। यदि ह्यपूर्वं न स्यत्तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात्। नहि तेन यागादेर्नाशः प्रतिबन्धो वा कर्तुं शक्यते तस्य पूर्वमेव वृत्तत्वादिति भावः। एतेन देवताप्रीतेरेव फलत्वमित्यपास्तम्--गङ्गास्नानादौ सर्वत्र देवताप्रीतेरसम्भवात्, देवतायाश्चेतनत्वेऽपि तत्प्रीतेरनुद्देश्यत्वात्, प्रीतेः सुखस्वरूपत्वेन विष्णुप्रीत्यादौ तदसम्भवात्, जन्यसुखादेस्तत्राभावात्। तेन विष्णुप्रीतिजन्यत्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते॥ १६१॥१६२॥

**अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।**

अधर्म इति। नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः॥

तत्र प्रमाणमाह--

**प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ॥ १६३॥**

प्रायश्चित्तेति। यदि ह्यधर्मो न स्यात्तदा प्रायश्चित्तादिना नाश्यत्वमधर्मस्य न स्यात्। न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते, तस्य पूर्वमेव विनष्टत्वादिति भावः। जीवेति। ईश्वरे धर्माधर्माभावादिति भावः॥ १६३॥

**इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः।**

इमौ-धर्माधर्मौ। वासनेति। अतो ज्ञानिना कृते अपि सुकृतदुष्कृतकर्मणी न फलायालमिति भावः। ज्ञानादपीति। अपिना भोगपरिग्रहः।

ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वं? 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति वचनविरोधात्, इत्थं च तत्त्वज्ञानिनां झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षय इति चेद्—न तत्र भोगस्य वेदबोधितनाशकोपलक्षकत्वात्। कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः। तदुक्तम्-ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इत्यादिना। श्रूयते च—

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति॥

ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादि च न स्याज्ज्ञानेन

मुक्तावलीमयूखः।

ईश्वरे इति। नन्वीश्वरे कुतो न धर्माधर्मयोरुत्पत्तिरतआह—वासनाजन्याविति। ईश्वरे वासनाया अभावादिति भावः।

ननु वासनाया धर्माधर्मजनकत्वे मानाभावोतआह—अतो ज्ञानिनेति।

सर्वकर्माणि-सर्वकर्मजन्यादृष्टानीत्यर्थः। अन्यथा कर्मणां क्षणिकत्वेन नष्टतया ज्ञाननाश्यत्वकथनासंगतिः स्यात्।

न्यायसिद्धान्तमुक्तावली ।

सर्वेषां कर्मणां नाशादिति चेद्—

न प्रारब्धेतरकर्मणामेव नाशात् । तत्तच्छरीरभोगजनकं हि यत्कर्म तत्प्रारब्धं, तदभिप्रायमेव नाभुक्तमिति वचनमिति ॥

शब्दं निरूपयति—

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ॥ १६४ ॥
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥ १६५ ॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ।

शब्द इति । नभोवृत्तिराकाशसमवेतः । दूरस्थशब्दस्याग्रहणादाह-श्रोत्रेति ।

ननु मृदङ्गावच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरत आह—वीचीति । आद्यशब्देन बहिर्देशादगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन सदृशो जन्यते । तेन चापरस्तद्व्यापकः । एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति ॥

कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥ १६६ ॥

कदम्बेति । आद्यशब्दाद्दशसु दिक्षु दश शब्दा उत्पद्यन्ते । तेभ्यश्चान्ये दश शब्दा उत्पद्यन्त इति भावः । अस्मिन्मते कल्पनागौरवादुक्तं—कस्यचिन्मत इति ॥ १६४ ॥ १६५ ॥ १६६ ॥

ननु शब्दस्य नित्यत्वादुत्पत्तिकथनमसङ्गतमत आह—

उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ।

उत्पन्न इति । शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः ॥

ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम्, इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपैवेत्यत आह—

सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥ १६७ ॥

सोऽयं क इति । साजात्यमिति । तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो न तु तद्व्यक्त्यभेदो विषयः—उक्तप्रतीतिविरोधात् । इत्थञ्च द्वयोरपि प्रतीत्योर्न भ्रमत्वमिति ॥ १६७ ॥

मुक्तावलीमयूखः ।

कल्पनागौरवादिति । दशशब्दानां तत्प्रागभावानां तेषां कार्यकारणभावस्य च कल्पने गौरवादित्यर्थः ॥ १६२–१६६ ॥

द्वयोरपीति । अत्र मीमांसकाः । स एवायं गकार इति प्रत्यभिज्ञाबलाद्गकारस्य तावत्कालं स्थितेरभ्युपेयत्वात् नाशकसामग्र्यभावान्नित्यत्वम् । नचेयं प्रत्यभिज्ञा

न्यायसिद्धान्तमुक्तावली ।

ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह–

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥ १६८ ॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यकृता कारिकावली समाप्ता ॥

तदेवेति ॥ यदौषधं मया कृतं तदेवान्येनापि कृतमित्यादिदर्शनादिति भावः ॥ १६८ ॥

इति न्यायसिद्धान्तमुक्तावल्यां गुणनिरूपणं समाप्तम् ।

इति महामहोपाध्याय-विद्यानिवासभट्टाचार्यसुत-श्रीविश्वनाथपञ्चानन-भट्टाचार्यविरचिता न्यायसिद्धान्तमुक्तावली सम्पूर्णा ॥

---

मुक्तावलीमयूखः ।

साजात्यविषयिणी न तु व्यक्त्यभेदविषयिणीति वाच्यम् । सैवेयं दीपकलिकेत्यादौ व्यक्तिभेदस्य स्पष्टमवगमात् तादृशप्रतीतेः साजात्यविषयत्वेऽपि सएवायंगकार इति प्रतीतेः व्यक्त्यभेदांशे बाधकाभावेन साजात्यविषयकत्वे मानाभावात् तज्जातीयोऽय-मित्यप्रतीतेश्च ।

न च तारत्वमन्दत्वादिविरुद्धधर्म्माध्यासोऽभेदबाधक इति वाच्यम् । प्रत्यभिज्ञा-बलेन तस्य नित्यत्वसिद्धौ तारत्वादेर्वायुधर्मत्वाङ्गीकारेणादोषात् एकस्मिन्निरूपकभेदे-न पितृत्वपुत्रत्वयोरिव तारत्वमन्दत्वयोरपि समावेशेन विरोधाभावाच्चेत्याहुः ।

तन्न तथासति कत्वगत्वादेरपि व्यञ्जकवायुधर्मत्वापत्त्याककारगकारयोरपिभेदा-भावप्रसङ्गात् वर्णनित्यतापक्षे कण्ठताल्वाद्यभिघातानां कसाक्षात्कारत्वस्य जन्यतावच्छे-कत्वाङ्गीकारे गौरवाच्च मम तु कत्वमेव तथेति लाघवमिति ध्येयम् ॥ १६७-१६८ ॥

नगवसुनवचन्द्रैः सम्मिते वैक्रमेऽब्दे रघुपतिजनितिथ्यां मासि चैत्रे मयूखः ॥
उदित इति विपश्चित्सूर्यनारायणाख्याद्रघुपतिपदपूजादीपकार्यं श्रयेत॥ १ ॥

श्रीगर्गान्वयसिन्धुतः समुदितो रामेश्वरो यत्पिता,
देवीश्रीसुखरा च यस्य जननी, श्रीदत्तशर्मा गुरुः–
श्रीमच्चन्द्रधरश्च यस्य विदितः, साकेत प्रान्तस्थितेः
श्रीमत्सारवपारिणः कृतिरियं लोके समुज्जृम्भताम् ॥ २ ॥

साकेताख्यपुरी मनुप्रभृतिभिः श्रीरामचन्द्रान्तिमैः
सम्राड्भिः प्रथिता त्रिलोकमहिता मुक्तिप्रदा राजते ॥
तस्याः वह्निदिशं श्रिते छखकरे ग्रामाऽड्डीहाभिधे
क्रोशैर्विंशतिसंख्यकैः परिमितेवेद्या जनिर्मेबुधैः ॥ ३ ॥

इति न्यायव्याकरणाचार्य सूर्य्यनारायणशर्मशुक्लविरचिते मुक्तावलीमयूखे गुणनिरूपणं समाप्तं, समाप्तश्चायं मुक्तावलीमयूखः ।

# प्रत्यक्षखण्डस्य शुद्धिपत्रम् ।

| पृ० | प० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | १३ | न्तबोध्य | न्तपदबोध्य |
| ३ | २८ | स्तेषां | स्तासां |
| ४ | १२ | तेषां | तासां |
| ,, | १७ | सद्द्रव्येत्यस्य | सद्द्रव्यत्वस्य |
| ,, | १६ | नास्ति | नास्तीति |
| १० | ५ | विघ्न | विघ्न |
| १२ | १ | सम्भवतीति । अत | संभवतीत्यत |
| १२ | १३ | तर्हि कृतित्वेन | कृतित्वेन |
| १३ | १० | चकार्याभावः | कार्याभावः |
| ,, | १२ | कृत्यनतिप्रसक्तधर्मावच्छिन्नप्रतियोगिताकाभावप्रयोज्यः | लघ्वनतिप्रसक्तधर्मावच्छिन्नप्रयोज्यः |
| १४ | १२ | भावत्वे | भावत्वेन |
| १६ | २७ | गोत्वत्वाह्लादक | नित्यत्वाह्लादक |
| १८ | १९ | पक्षधर्मताज्ञानं | पक्षधर्मताज्ञानं ततः व्याप्तिस्मरणम् |
| १९ | २६ | कार्यतातिरिक्तत्वे | कार्यतातिरिक्तवृत्तित्वेन |
| २३ | १४ | समवेतत्वलक्षणं | समवेतत्वरूपं लक्षणं |
| २५ | ३ | नस्सामान्यत्वे | निस्सामान्यत्वे |
| २८ | ८ | नाव्याप्त्यापत्तेः | नातिव्याप्त्यापत्तेः |
| २८ | २८ | नित्यमात्रवृत्तिधर्मा | तद्व्यक्तित्वभिन्ननित्यमात्रवृत्तिधर्मा |
| ३१ | १८ | स्वयोः प्रतियोग्यनुयोगिनो रूपं | स्वौ प्रतियोग्यनुयोगिनौ रूपं यस्य स |
| ३२ | १६ | वत्वलक्षणे | वलक्षणे |
| ३२ | १८ | घटोघट इतिवत् | ० |
| ,, | ,, | विधेयतावच्छेदकयो | विधेययो |
| ३५ | १३ | भावत्वतया | भावत्वेन |
| ३६ | १५ | इति | इति । अनेकत्वेसति भाववृत्तित्वं चानेकभाववृत्तित्वम् । |
| ४१ | २२ | कारणत्व | कारणत्वं |
| ४४ | १६ | नेकद्रव्यत्वं | नेकद्रव्यवत्त्वं |
| ४४ | २६ | नेकद्रव्यत्वं | नेकद्रव्यवत्त्वं |
| ४७ | १ | नात्पन्नं | नोत्पन्नं |
| ४८ | २० | परिमाणवत्त्व | परिमाणत्वं |
| ,, | १८ | मितिपरमा | मितितद्वत्त्वेन परमा |

| पृ० | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४९ | २५ | समवायिकारणत्वस्येत्यारभ्यबोध्यमित्यन्तस्य स्थाने ज्ञानसमवायिकारणत्वस्यात्मनिसत्वात्तत्रातिव्याप्तिवारणाय द्रव्यपदम् । | |
| ५९ | १७ | म्पलब्धे | मुपलब्धे |

६३ पत्रे १७ पङ्क्त्यनन्तरं पठ्यमानाश्चतस्रः पङ्क्तयः २७ पङ्क्त्यनन्तरं पठनीयाः ।

| पृ० | पं० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ७० | १७ | सिद्धसाधना | सिद्धसाधन |
| ,, | २१ | नदपरा | नदपूरा |
| ७१ | ८ | शब्द | शब्दे |
| ७३ | १० | निरूपिताधिकरणतया | निरूपितमधिकरणतया |
| ७३ | २१ | मिमित्त | निमित्त |
| ७४ | २७ | नाश ततः क्रिया | ततः उत्तरदेशसंयोगः ततः क्रिया |
| ७४ | २८ | मर्णः | र्मणः |
| ७६ | १९ | विज्ञन | विज्ञान |
| ८० | १९ | मूत | भूत |
| ८२ | ११ | समपिता | समर्पिता |
| ८३ | १४ | जावा | जीवा |
| ८३ | १८ | विंज्ञतिः | विंशतिः |
| ,, | ७ | कल्पनन | कल्पनेन |
| ,, | ८ | मति | मिति |
| ८४ | २० | न्तङ्कःरण | न्तः करणं |
| ८५ | ११ | प्रकटो | प्रकटी |
| ८५ | २२ | दीनामापि | दीनामपि |
| ८५ | २३ | करोमि | करोमि |
| ८५ | २६ | मानात्मानं | मात्मानं |
| ८८ | ३ | तद्वश | ताद्वश |
| ,, | १० | दिति | दीति |
| ,, | ११ | न्न्यन | न्यूनत्वम् |
| ८९ | २५ | वर | वार |
| ८९ | ११ | पृथक | पृथक् |
| ९० | ७ | न्द्रियणा | इन्द्रियेणा |
| ९१ | २५ | लय | लब्य |
| ९५ | २२ | पं | पं |
| ९९ | ८ | शा | णा |

# अनुमानखण्डादिभागस्य शुद्धिपत्रम् ।

| पृ० | प० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३ | ३० | धमवान् | धूमवान् |
| ४ | ९ | विशेष्यावच्छिन्न, | विशेष्यत्वावच्छिन्ना |
| ५ | २५ | त्रयणां | त्रयाणां |
| ७ | २१ | प्रयोगिता | प्रतियोगिता |
| ,, | २७ | साक्षिकभेवद्, | साक्षिकभेदवद् |
| ११ | १८ | रित्यदाषः | रित्यदोषः |
| १५ | १ | पूर्वावृत्तत्व | पूर्वक्षणवृत्तित्व |
| २० | १६ | परामशानन्तरम् | परामर्शानन्तरम् |
| ,, | ,, | वना— | विना |
| ,, | १५ | भिन्नावषयक | भिन्नविषयक |
| २१ | २९ | निरूपिप्रतिवन्ध-, | निरूपितप्रतिवन्ध- |
| २२ | २२ | प्रत्यस्य | प्रत्ययस्य |
| २४ | २० | प्रतिध्नाति | प्रतिवध्नाति |
| ३० | २५ | वच्छदकत्व | वच्छेदकत्व |
| ३१ | १२ | शिष्यनिज्ञासा | शिष्यजिज्ञासा |
| ३२ | १० | जात्वपेक्षया | जात्यपेक्षया |
| ३३ | १० | वृातश्च | वृत्तिश्च |
| ,, | ११ | नुपपत्तः | नुपपत्तेः |
| ,, | २१ | अयमर्था | अयमर्थो |
| ३४ | २७ | ईश्वरच्छारूप, | ईश्वरेच्छारूप |
| ३६ | १५ | चत्रस्य | चैत्रस्य |
| ३९ | १४ | पौरूषयतया | पौरुषेयतया |
| ५३ | ७ | स्मरणजनिष्ठ | स्मरणमजनिष्ठ |
| ५३ | १४ | नचवं | नचैवं |
| ,, | १५ | देकस्यव | देकस्यैव |
| ५५ | १५ | द्रव्या | द्रद्रव्या |
| ५६ | २४ | गुणत्वजति | गुणत्वजाति |
| ५८ | १८ | सामाना | समाना |
| ,, | २८ | अत्यन्तग्नि | अत्यन्ताग्नि |
| ६२ | ११ | पारमाणौ | परमाणौ |
| ,, | १३ | पाकान्तरं | पाकानन्तरं |

| पृ० | प० | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ६३ | ५ | रूपवद्वत्ति | रूपवद्वृत्ति |
| ६३ | १६ | नारे | नीरे |
| ६४ | २१ | सर्वत्रयवा | सर्वावयवा |
| ६५ | २८ | च्छेन | च्छेदेन |
| ६६ | ७ | वेदक | वदेक |
| ६७ | २६ | सहाकारि | सहकारि |
| ,, | ३० | योपक्ष | यापेक्षा |
| ६८ | ७ | संयोगे | संयोगे |
| ,, | १३ | व्यभिचारणाय | व्यभिचारवारणाय |
| ,, | १९ | च्छिद्यामाना | च्छिद्यमान |
| ६८ | २१ | मेक्षा | मपेक्षा |
| ६९ | २३ | वहुतेर | वहुतरे |
| ७२ | १५ | विरवेण | विरहेण |
| ७६ | १४ | करकं | कारकं |
| ७७ | १० | सम्वन्ध | सम्वन्ध |
| ७७ | ११ | नामत्व | नात्मत्व |
| ७८ | १७ | मपद | पदम |
| ,, | २६ | विनिगक | विनिगमक |
| ८१ | १० | प्रामाण | प्रमाण |
| ८२ | १६ | करणय | करणीय |
| ८३ | ५ | प्रकारज्ञान | प्रकारकज्ञान |
| ८४ | ५ | नवभावात् | नवभासात् |
| ,, | ६ | तवमिति | तमिति |
| ८७ | १९ | निरूपि | निरूपित |
| ८७ | २३ | प्रमाण्य | प्रामाण्य |
| ८५ | २४ | तदेवेन | तदेव न |
| ९५ | ३० | स्वविषयज्ञान | स्वविषयकज्ञान |
| ९६ | २६ | फलिविषयकं | फलविषयक |
| ,, | ,, | फले | उपाये |
| ९७ | २८ | चुक्षु | चक्षुः |
| १०१ | २० | दुख | दुःख |
| १०२ | ४ | वलवनिष्टा | वलवदनिष्टा |
| १०४ | ६ | सध्य | साध्य |
| ,, | २० | पृथवी | पृथिवी |
| १०६ | १३ | जनत्य | जन्यत्व |

... OF ADVANCED STUDY
Acc. No. 23772
.. 2. 3. 68.